
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 713 विषय वैदिक

नाव. अनंत भट्टी प्रयोग (Mss.

लेखक/लिपीकार पं. विश्वनाथ धर्माधिकारी.

पृष्ठ ३२९ काळ सन 1788 पूर्ण/अपूर्ण

अ॰प्र॰

॥ १ ॥

॥ श्रीः ॥

॥ अथ अनंतभट्टीप्रयोगप्रारंभः ॥

श्री

॥ १ ॥

श्रीगणेशायनमः ॥ ॐ ॥ श्रीरामंसपरीवारंगणेशंचसरस्वतीं ॥ आश्वला
यनतधिष्याल्प्रणम्यपितरंगुरुं ॥ १ ॥ भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ॥
प्रयोगरत्नं कुरुते काश्यांशिष्टस्तुष्टये ॥ २ ॥ ग्रंथेस्मिन्गुणगणवत्वमुच्यते
चेत्स्वग्रंथंगुणगणवंतमाहकोन ॥ तत्संतः शिरसि कृतांजलि स्तुया चेशो
ध्यंतत्सदसदिहोच्यतेमयायत्र ॥ ३ ॥ नमामिपार्वतीसूनुंभक्तानांसिद्धि
दायकं ॥ क्रियतेह्युपकारायस्मार्तानुष्ठानपद्धतिः ॥ ४ ॥ दीक्षितानंतवि
ज्ञेनविश्वनाथस्यसूनुना ॥ प्रयोगोरच्यतेसम्यक्मंत्रविस्तारपूर्वकं ॥ ५ ॥
आश्वलायनशाखेस्मिन्संतिपद्धयः शतं ॥ विनापुस्तकमार्गेण कर्मकर्तुं नशक्यते। ६ ॥

तदर्थंक्रियतेयत्नः पाठबोधहितायच ॥ सुलभोपायसिद्ध्यर्थंवैदिकानांतदुच्यते ॥ ७ ॥
पंचविंशतिसंस्कारैः संस्कृतायेद्विजातयः ॥ तेपवित्राश्चयोग्याश्च श्राद्धादिषु
सुयंत्रिताः ॥ ८ ॥ गर्भाधानंपुंसवनंसीमंतोबलिरेवच ॥ बलिर्विष्णुबलिः ॥ जा
जातकर्मनामकर्मनिष्क्रमोन्नाशनंपरं ॥ चौलकर्मोपनयनंव्रतानांचचतुष्टयं ॥
स्नानोद्वाहोचाग्रयणमष्टकाचयथातथं ॥ श्रावण्यामाश्वयुज्यांचमार्गशीर्षांच

पार्वणं ॥ उत्सर्गश्चाप्युपाकर्मेहायज्ञाश्चनिरूपशः ॥ संस्कृतानियतोयेनेब्राह्मणा
स्यविशेषतद्भूनि ॥ अथस्वस्तिवाचनं ॥ तद्यत्रकर्तव्यंतदुच्यते ॥ व्यासः ॥ संप

॥अ०प्र०॥ ज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्॥ धर्मकर्मणि मांगल्ये संग्रामेऽद्भुतदर्शने॥ गृह्यपरि- स्मार्त

॥२॥ शिष्टे॥ अथस्वस्तिवाचनम्॥ ऋद्धिपूर्तेषु कृच्छ्रे द्विर्विवाहांतान्नप्राशनसंस्काराः प्रतिष्ठाद्यापनेपू-
र्त्तेन कर्मणश्चाद्यंतयोः कुर्यादिति॥ आश्वलायनस्मृतिः॥ वैदिके तांत्रिके चादौ ततः पु-
ण्याहमिष्यते॥ शौनकः॥ पुण्याहवाचनविधिं वक्ष्यामोऽथ यथाविधि॥ प्रयोक्तुः कर्मणा-
मादावंते चोदयसिद्धये इति॥ तच्च कर्मप्रयोगांतर्गतमिति केचित्॥ बहुवस्तुप्रयोगबहि-
कर्म२ र्भूतमिति॥ आद्यपक्षे प्रयोगसंकल्पं कृत्वा कार्यं द्वितीये तु तत्कृत्वा कर्मसंकल्पः॥ अ- ॥२॥
थ किंचित्संक्षेपेण प्रयोगमात्रमुच्यते॥ यजमानः कृताभ्यंगादिः स्वलंकृतो दर्भपा-

णिः शुचिर्भूत्वा मंगलसंभारं संभृत्य स्वलंकृते गृहे गोमयोपलिप्तभूमौ सोत्तरच्छदे भद्रासने उद- नो
यं२ ङ्मुख उपविश्य स्वदक्षिणपार्श्वे संस्कार्यमुदङ्मुखमुपविश्य रंगवल्ल्यादियुक्ते भूतले प्रस्थपरिमित- का२
स्य शाल्यादेस्तस्य वा धान्यस्योपरि दक्षिणोत्तरयोः सुवर्णरजतताम्रमृन्मयान्यतमकलशद्व-
यं नव्रणं मनोहरमलंकृतं शुद्धपुण्यजलपूरितं सपल्लवं निधाय तत्र वेष्टितोत्तरकलशे पंचर-
त्नानि निक्षिप्य तदुपरि सिततंडुलपूरितं सफलं पात्रं निधाय तत्पश्चिमदेशे प्रशस्तान्प्रतिव- शे२
चनसमर्थांस्तद्दिवसे श्राद्धे अभुक्तवतो निषिद्धप्रतिग्रहनिरतान् सोत्तरीयान् दर्भपवित्रपाणी- शुचीन्२
स न्युग्मान्ब्राह्मणान्प्राङ्मु[illegible]रवानासने उपविश्य गंधपुष्पादिभिरभ्यर्च्य यथाचारं॥ स्तु

हा यान्२

॥अ॰ प्र॰॥ ॥सुमुखश्चैकदंतश्चकपिलोगजकर्णकः॥लंबोदरश्चविकटोविघ्ननाशोगणाधिपः॥धूम्रकेतुर्ग
णाध्यक्षोभालचंद्रोगजाननः॥द्वादशैतानिनामानियःपठेछृणुयादपि॥विद्यारंभेविवाहे
॥३॥ चप्रवेशेनिर्गमेतथा॥संग्रामेसंकटेचैवविघ्नस्तस्यनजायते॥शुक्लांबरधरंदेवंशशिवर्णं
चतुर्भुजं॥प्रसंनवदनंध्यायेत्सर्वविघ्नोपशांतये॥अभीप्सितार्थसिध्यर्थंपूजितोयःसुरासुरैः
॥सर्वविघ्नहरेतस्मैगणाधिपतयेनमः॥सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके॥शरण्ये
त्र्यंबकेगौरीनारायणिनमोस्तुते॥सर्वदासर्वकार्येषुनास्तितेषाममंगलं॥येषांहृदिस्थो
भगवान्मंगलायतनंहरिः॥तदेवलग्नंसुदिनंतदेवतारावलंचंद्रवलंतदेव॥विद्यावलं ॥३॥

दैववलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि॥यत्रयोगीश्वरःकृष्णोयत्रपार्थोधनुर्धरः॥तत्रश्री
र्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥सर्वेष्वारंभकार्येषुत्रयस्त्रिभुवनेश्वराः॥देवादिशंतुनः
सिद्धिंब्रह्मेशानजनार्दनाः॥लक्ष्मीनारायणाभ्यांनमः॥उमामहेश्वराभ्यांनमः॥शचीपु
रंदराभ्यांनमः॥मातापितृभ्यांनमः॥इष्टदेवता[illegible]भ्यांनमः॥कुलदेवताभ्योनमः॥
सर्वेभ्योब्राह्मणेभ्योनमः॥आचम्यप्राणानायम्यदेशकालौसंकीर्त्यविष्णुर्विष्णुर्विष्णुः
श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्त्तमानस्यअद्यब्रह्मणोद्वितीयपरार्द्धेश्री ९२
श्वेतवाराहकल्पेवैवस्वतमन्वंतरेअष्टाविंशतितमेकलियुगेप्रथमचरणेभरतवर्षेभरतखं

॥अ० प्र०॥ ॐजंबूद्वीपेआर्यावर्तांतर्गताविमुक्तवाराणसीक्षेत्रेआनंदवनेमहाश्मशानेअमुकसंवत्स
॥४॥ रेअमुकायनेअमुकऋतौअमुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेअमुकन
क्षत्रेअमुकराशिस्थितेचंद्रेअमुकराशिस्थितेसूर्येअमुकराशिस्थितेदेवगुरौशेषेषु
ग्रहेषुयथायथास्थानस्थितेषुसत्सुएवंगुणविशेषणविशिष्टायांपुण्यतिथौअमुक
कर्मकरिष्येतदंगत्वेनविहितंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरि
ष्ये॥तदादौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंवरुणपूजनंचकरिष्ये॥ॐम्गणा ॥४॥
नांत्वागृत्समदोगणाधिपतिर्जगतीगणपत्यावाहनेविनियोगः॥गणानांत्वागण

पतिंहवामहेकविंकवीनामुपमश्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूति
भिःसीदसादनं॥ऋद्धिबुद्धिसहितंगणपतयेनमः॥गणपतिमावाहयामि॥गणपतयेन
मः॥आसनंसमर्पयामि॥पाद्यं॥अर्घ्यं॥आचमनीयं॥स्नानीयं॥स्नानानंतरंआच
मनीयं॥वस्त्रं॥यज्ञोपवीतं॥गंधं॥पुष्पं॥धूपं॥दीपं॥नैवेद्यं॥आचमनीयं॥फलं॥तांबू
लं॥कृतायाःपूजायाःसाद्गुण्यार्थेयथाशक्तिदक्षिणांसमर्पयामि॥निषुसीदग
णपतेगणेषुत्वामाहुर्विप्रतमंकवीनां॥नऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवंचित्र
मर्च॥गणपतयेनमः॥मंत्रपुष्पांजलिंसमर्पयामि॥मंत्रहीनंक्रियाहीनंभक्तिहीनं

॥अ० प्र०॥

॥५॥

सुरेश्वर॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥ वक्रतुंड महाकाय सूर्यकोटिसमप्रभ॥ अवि
घ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां॥ पिपृतां नो भ
रीमभिः॥ ॐ ओषधयः संवदन्ते सोमेन सह राज्ञा॥ यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि
आकलशेषु धावति पवित्रे परिषिच्यते॥ उक्थैर्यज्ञेषु वर्द्धते॥ इमं मे गंगे यमुने सरस्वति
शुतुद्रि स्तोमं सचता परुष्ण्या॥ असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सु
षोमया॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्व
ये श्रियं॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धामा

मि० २

॥५॥

नि सप्त च॥ कांडात्कांडात्प्ररोहंती परुषः परुषः परि॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता॥ गोभाज इत्किलासथ यत्सनवथ पूरुषं॥ स्यो
ना पृथिवि भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथः॥ याः फलिनीर्या अफला अ
पुष्पा याश्च पुष्पिणीः॥ बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः॥ स हिरण्यदाशुषे सुवाति
सविता भर्गः॥ तं भागं चित्रमीमहे॥ हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्य
वर्णः॥ हिरण्ययात्परि योनेः [illegible] निषद्या हिरण्यदा ददत्यन्नमस्मै॥ युवा सुवा
साः परिवीत आगात्स उ श्रेयान्भवति जायमानः॥ तं धीरासः कवय उन्नयंति स्वाध्यो

मि० ४

॥अ०प्र०॥ मनेसादेवयंतः॥पूर्णादर्विपरापततुसुपूर्णापुनरापतन॥वस्नेवविक्रीणावहाइषमूर्जंशतक्र
॥६॥ तो॥तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥वरुणावाहनेविनियोगः॥ॐतत्वायामिब्रह्म
णावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेळमानोवरुणेहबोध्युरुशंसमानु
वरुणायनमः आयुःप्रमोषीः॥उत्तरकलशेवरुणंआवाहयामि॥वरुणायनमइतिवरुणंपूजया
मि॥पुण्याहवाचनेचैवयःकुर्यात्कलशार्चनं॥दक्षिणस्यस्थिरश्चैवउत्तरस्यचरस्त
था॥नचालयेद्दक्षिणस्योत्तरस्यस्तुचालयेत्॥अन्यथाधर्महानिःस्याद्देषधर्मस ॥६॥
नातनः॥कलशस्यमुखेविष्णुःकंठेरुद्रसमाश्रिताः॥मूलेतत्रस्थितोब्रह्मामध्येमा

तृगणास्मृताः॥कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्व
णः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशांतिःपुष्टीकरीतथा
॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥
आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥मातृदेवोभव॥पितृदेवोभव॥आचार्यदेवोभ
व॥अतिथिदेवोभव॥ततःआशिषःप्रार्थयंतेसत्याआशिषएताआशिषःसंतु॥अवनिकृत
जानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकल
शंधारयित्वा॥दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचतेनायुःप्रमाणेनपुण्याहंदी

||अ० प्र|| र्घमायुरस्तु॥शिवा आपः संतु॥सौमनस्यमस्तु॥अक्षतं चारिष्टं चास्तु॥गंधाः पांतु॥सुमंगल्यं चा
स्तु॥अक्षताः पांतु॥आयुष्यमस्तु॥पुष्पाणि पांतु॥सौश्रियमस्तु॥तांबूलानि पांतु॥ऐश्वर्यम
||७|| स्तु॥दक्षिणाः पांतु॥बहुधनं चास्तु॥दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चास्तु॥श्रीर्यशो विद्या विन
यो वित्तं बहुपुत्रं चायुष्यं चास्तु॥यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः
प्रवर्तंते॥तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भव
द्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये॥वाच्यतां॥ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमा ||७||
क्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥द्रविणोदा द्रविणसस्तु

रस्य द्रविणोदाः सनरस्य प्र यंसत्॥द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमा
युः॥सविता पश्चातात्सविता पुरस्तात्सविता उत्तरात्तात्सविता धरात्तात्॥सविता नः सुवतु सर्व
तातिं सविता नो रासतां दीर्घमायुः॥नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रं॥भागं
देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः॥उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्व
दाः सह ते सूर्येण॥हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः॥आपउंदं
तु जीवसे दीर्घायुत्वाय वर्चसे॥यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि॥
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां॥यस्मै त्वं सुकृते जातवेद उलो

धर्मसमृद्धिरस्तु ।४

॥अ० प्र०॥ कमग्निस्तृणवस्योनं॥अग्निर्नः सपुत्रिणं वीरवंतं गोमंतं रथिनं शतस्वस्ति॥सं लोसिं चामिपजुषा
॥९॥ प्रजामामुर्ई नेच॥व्रतनियमतपः स्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधी
यतां॥समाहितमनसस्म ः॥प्रसीदंतु भवंतः॥प्रसन्नाः स्मः॥शांतिरस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु
वृद्धिरस्तु॥अवि[illegible]घ्नमस्तु॥आयुष्यमस्तु॥आरोग्यमस्तु॥शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु
वेदसमृद्धिरस्तु॥शास्त्रसमृद्धिरस्तु॥धनधान्यसंपदस्तु॥पुत्रसंपदस्तु॥बहिः॥अरिष्टनि
रसनमस्तु॥यत्पापं तत्प्रतिहतमस्तु॥यच्छ्रेयस्तदस्तु॥उत्तरे कर्मण्यविघ्नमस्तु॥उत्तरोत्तर
महरहरभिवृद्धिरस्तु॥उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॥तिथिकरणमुहूर्त ॥१०॥

इष्टसंपदस्तु३

नक्षत्रसंपदस्तु॥तिथिकरणमुहूर्तनक्षत्र [illegible] ग्रहलग्नाधिदेवताः प्रीयंतां॥तिथिकर
णेमुहूर्ते नक्षत्रे सग्रहे सदैवते प्रीयेतां॥दुर्गापांचाल्यौ प्रीयेतां॥अग्निपुरोगा विश्वेदेवाः प्री
यंतां॥इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां॥माहेश्वरीपुरोगा उमा
मातरः प्रीयंतां॥वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां॥अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां॥
ऋषयः छंदांस्याचार्या वेदा यज्ञाश्च प्रीयंतां॥ब्रह्म च ब्राह्मणाश्च प्रीयंतां॥श्रीसरस्वत्यौ प्रीये
तां॥भगवती कात्यायनी प्रीयतां॥भगवती माहेश्वरी प्रीय[illegible]तां॥भगवती पुष्टिकरी प्रीयतां
भगवती तुष्टिकरी प्रीयतां॥भगवती ऋद्धिकरी प्रीयतां॥भगवती वृद्धिकरी प्रीयतां॥भग

श्रद्धामेधे प्रीयेतां२

॥अ०प्र०॥ वंतौ विघ्नविनायकौ प्रीयेतां॥ भगवान्स्वामीमहासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थान[illegible]गतः प्रीयतां॥ हरिहरहिरण्यगर्भाः प्रीयंतां॥ सर्वाग्रामदेवताः प्रीयंतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ सर्वाः

॥२॥

इष्टदेवताः प्रीयंतां॥ बहिः॥ हता ब्रह्मद्विषः॥ हताः परिपंथिनः॥ हता अस्य कर्मणो विघ्नकर्तारः शत्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पापानि॥ शाम्यं[illegible]तयः॥ शुभानि वर्द्धंतां॥ शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा अनिषयः संतु॥ अहोरात्रे शिवे स्यातां॥ निकामे निकामे नः पर्जन्यो वर्षतु॥ फल[illegible]न ओषधयः पच्यंतां॥ योगक्षेमो नः कल्पतां॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां॥ भगवं

॥२॥

क०१ x शिवा आहुतयः संतु॥ शिवा ओषधयः संतु॥ शिवा वनस्पतयः संतु॥

वान्नारायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीयतां॥ भगवान्स्वामीम[illegible]हासेनः प्रीयतां॥ पुण्याहकालान्वाचयिष्ये॥ वाच्यतां॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद॥ याज्यया यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तं लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते॥ यत्पुण्यं नक्षत्रं तद्बट्कुर्वीतोप[illegible] व्युषं॥ यदा वै सूर्य उदेति॥ अथ नक्षत्रं नैति॥ यावति तत्र सूर्यो गच्छेत्॥ यत्र जघन्यं पश्येत्॥ तावति कुर्वीत यत्कारी स्यात्॥ पुण्याह एव कुरुते॥ तानि वा एतानि यमनक्षत्राणि [illegible]॥ यान्येव देवन[illegible]क्षत्राणि॥ तेषु कुर्वीत यत्कारी स्यात्॥ पुण्याह एव कुरुते॥ मत्वं सह कुटुंबिने महाजनान्नम

॥अ०प्र॥ स्कुर्वाणा याशीर्वचनमपेक्ष[illegible]माणाय अमुककर्मणः पुण्याहं भवंतो ब्रुवंतु॥ इति त्रिर्वदेत्॥ पुण्या
॥१०॥ हादेस्त्रिरभ्यासे मंद्रमध्योच्चस्वनैरिति कारिकायां॥ तथैव॥ ॐ पुण्याहमिति त्रिर्विप्राः॥
ॐ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय
आदित्यासो भवंतु नः॥ आदित्य उदयनीयः पथ्ये ये वेतः स्वस्त्या प्रयंति पथ्यां स्वस्तिमभ्युध
निस्वस्त्य वेतः प्रयंति स्वस्त्यु घंति स्वस्त्यु घंति॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववे
नि२ दाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ अश्रेदेवा वसवः सोम्यासः॥ ॥१०॥
चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं पांतु रजसः पुरस्तात्॥ संवत्सरीणममृतं स्वस्ति म

सं[illegible]मित्यादि कर्मेदं संपूर्ववत् स्वस्ति भवंतो ब्रुवंत्विति त्रिः॥ आयुष्मते स[illegible]स्ती[illegible]प्रति
वचनं त्रिः॥ ॐ ऋध्याम स्तोमं सनुयाम वाजमानो मंत्रं सरथेहोपयातं॥ यशो न पक्वं मधु गोष्वंत
रा भूतांशो अश्विनोः काममप्राः॥ सर्वामृद्धिमृघ्नुयामिति तं वै तेजसैव पुरस्तात्सर्यभंवर्द्धो
भिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्या सर्वतो द्वादशाहं परिभू[illegible]य सर्वामृद्धिमाभोत्सर्वामृद्धिम
प्नोति य एवं वेद॥ ऋध्यास्म हव्यैर्नमसोपस[illegible]द्य॥ मित्रं देवं मित्रधेयं नो अस्तु॥ अनूराधान् हवि
षा वर्धयंतः॥ शतं जीवेम शरदः सवीराः॥ त्रीणि त्रीणि वै देवानां ऋद्धानि त्रीणि छंदांसि
पु१ त्रीणि सवनानि॥ त्रय इमे लोकाः॥ ऋध्याम वत्तद्वीर्यं एषु लोकेषु प्रतितिष्ठति॥ मयमित्यादि पूर्ववत्॥

ना१

॥अ०प्र०॥ अस्य कर्मणः ऋद्धिं भवंतो ब्रुवंत्विति त्रिः॥ ऋध्यतामिति त्रिः॥ ॐ श्रिये जातः श्रिय आ निरियाय श्रियं वयो
॥११॥ जरितृभ्यो दधाति॥ श्रियं वसाना अमृतत्वमायन्भवंति सत्या समिथा मितद्रौ॥ श्रिय एवैनं तच्छ्रि
यामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य एवं वेद॥ यस्मिन्नू ब्रह्माभ्य
जयत्सर्वमेतत्॥ अमुं च लोकमिदमू च सर्वं॥ तं नो नक्षत्रमभिजिद्विजित्य॥ श्रियं दधात्वहृणीय
मानं॥ अहे बुध्निय मंत्रं मे गोपाय॥ यमृषयस्त्रैविदा विदुः॥ ऋचः सामानि यजूंषि॥ सा हि
श्रीरमृता सतां॥ मयभिस्यादि श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिः॥ अस्तु श्रीरिति त्रिः॥ [illegible] ॥११॥
निभवंतु॥ वर्षशतं पूर्णमस्तु॥ शिवं शिवमस्तु॥ गोत्राभिवृद्धिरस्तु॥ प्रजापतिः प्रीयतां॥ शु

केभिरंगैरजनत्वान्क्रतुं पुनानः कविभिः पवित्रैः॥ शोचिर्वसानः पर्यायुरपां श्रियो मिमीते
बृहतीरनूनाः॥ तदप्येष श्लोकोभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे॥ आविक्षित
स्य कामप्रेर्विश्वेदेवाः सभासद इति॥ तत उत्तरकलशं दक्षिणहस्ते दक्षिणकलशं [illegible] वामहस्ते
गृहीत्वा॥ ताभ्यां धाराद्वयं संततं पात्रे निषिंचेदेभिर्मंत्रैः॥ ओं वास्तोष्पते प्रतिजानीह्यस्मान्स्वा
वेशो अनमीवो भवा नः॥ यत्त्वेमहे प्रतितं नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥ वास्तोष्पते प्र
तरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो
जुषस्व॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि [illegible]रावया गातुमत्या॥ पाहि क्षेम उत यो

समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप् ॥ अभिषेके विनियोगः ॥ × २

अ॰ प्र॰
१२

गोवर्द्धनो यूयं पात स्वस्तिभिः सदा नः ॥ अमी व ह्या वास्तोष्पते विश्वारूपाण्याविशन् ॥ सखा सुशेव ए धि नः ॥ शिवं शिवं ॥ अभिषेके पत्नीवाम नः ॥ ओं समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्य निविशमानाः ॥ इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु ॥ या आपो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयं जाः ॥ समुद्रार्था याः शुचयः पावकास्ता आपो ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां ॥ मधुश्चुतः शुचयो याः पावकास्ता आपो देवी॰ ॥ यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदंति ॥ वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो॰ ॥ आयं तामिहदेवास्त्रायं ताम रुतां गणः ॥ त्रायंतां

१२

विश्वा भूतानि यथायमरपा असत् ॥ आप इद्वा उ भेषजीरापो अमीव चातनीः ॥ आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं ॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी ॥ अनामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि ॥ इमा आपः शिवतमा इमाः सर्वस्य भेषजीः ॥ इमा राष्ट्रस्य वर्द्धनीरिमा राष्ट्रभृतोमृताः ॥ याभिरिंद्रम [illegible] भ्यषिंचत्प्रजापतिः सोमं राजानं वरुणं यमं मनुं ॥ ताभिरद्भिरभिषिंचामि त्वामहं राज्ञां त्वमधिराजो भवेह ॥ महांतं त्वा महीनां सम्राजं चर्षणीनां ॥ देवी जनित्र्यजीजनत् भद्रा जनित्र्यजीजनत् ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि ॥ बलाय श्रियै यशसे

स्य ३
स्य १

अ०प्र०
१३

नाथायास्मै भुवस्वः अमृताभिषेकोस्तु ॥ इंद्रियं वा एतदस्मिंल्लोके यद्दधि यद्दध्नाभिषिंचतींद्रियमे
वास्मिंस्तद्दधाति ॥ रसो वा एष ओषधिवनस्पतिषु यन्मधु यन्मध्वा [illegible] भिषिंचति रसमेवास्मिं
स्तद्दधाति ॥ तेजो वा एतत्पशूनां यद्घृतं यद्घृतेनाभिषिंचति तेज एवास्मिंस्तद्दधाति ॥ अमृतं
वा एतदस्मिंल्लोके यदापो यदद्भिरभिषिंचत्यमृतत्वमेवास्मिंस्तद्दधाति ॥ सोभिषिक्तोभिषेक्त्रे
ब्रा[illegible]ह्मणाय हिरण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं चतुष्पाद्दद्यादथाप्याहुरसंख्यातमेवापरि
मितं दद्यादपरिमितो वै क्षत्रियोपरिमितस्यावरुध्या इत्यथास्मै सुराकंसमादधाति स्वा
दिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सुत इति तां [illegible] पिबेद्यदत्र शिष्टं रसिनः

१३

हस्ता२

सुतस्य यदिंद्रो अपिबच्छचीभिः ॥ इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि ॥ अभि
त्वा वृषभा सुते सुतं सृजामि पीतये । तृंपा व्यश्नुही मदमिति यो ह वाव सोमपीथः सुरायां
प्रविष्टः स हैवं तेनैंद्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो भवति न सुरा तां पी
त्वाभिमंत्रयेत ता पान सोमं शं नो भवति तद्यथैवादः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सु
खं शिवमुपस्पृशत्या विस्रस एवं हैवं तेनैंद्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा
वा सोमो वान्यद्वान्नाद्यं सुखं शिवमुपस्पृशत्या विस्रसः ॥ इत्यादि ब्राह्मणं ॥ सुरास्त्वामभि
षिंचंतु ब्रह्माविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरु

डुश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥२॥ वरुणः
पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते स
दा॥३॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शांतिः कां
तिस्तुष्टिश्च मातरः॥४॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो
बुधजीवसितार्कजाः॥५॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः॥ देवदानवगंधर्वाय
क्षराक्षसपंनगाः॥६॥ ऋषयो मुनयो गावो देवमातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चा
प्सरसां गणाः॥७॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च रत्नानि का

लस्यावयवाश्च ये॥८॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वामभिषिं
चंतु सर्वकामार्थसिद्धये॥९॥ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्व
स्तिरस्तु नः स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे॥
नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः॥ नमो वाचे नमो वाचस्प
तये नमो विष्णवे महते करोमि॥ भद्रं नो अपिवातय मनः॥ ॐ शांतिः ३ भूर्भुवः स्वः अ
मृताभिषेकोस्तु॥ तत आचारप्राप्तं वस्त्रादिदानं तत्परिधानं च॥ युवं वस्त्राणि पी
वसा वसाथे युवोरछिद्रा मंतवो ह सर्गाः॥ अवातिरतमनृतानि विश्व ऋतेन मित्रा

अ० प्र०
१५

वरुणस्संचेथे॥ एवं स्वस्तिवाचनं कृत्वा मातृकाः पूजयेत्॥ गौरी पद्मा शची मेधा सा
वित्री विजया जया॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्त
था तुष्टिरात्मनः कुलदेवताः॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वारा
ही च तथेंद्राणी चामुंडाः सप्त मातरः॥ गौर्यादिषोडशमातृः॥ ब्राह्म्यादिसप्तमा
तृः॥ आवाहयामि॥ तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तं॥
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥ गृहा वै प्रतिष्ठा सूक्तं त
त्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशूंल्लभते गृहानेवै

श्री
१५

नानाजिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा॥ सुप्रतिष्ठितमस्तु॥ गौर्यादिषोडश
मातृभ्यो नमः॥ ब्राह्म्यादिसप्तमातृभ्यो नमः॥ आसनं॥ पाद्यं॥ अर्घ्यं॥ आचमनीयं॥ स्ना
नीयं॥ दक्षिरागं समर्पयामि॥ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्प
दी॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ मंत्रपुष्पांजलिं समर्पया
मि॥ ततो नांदीश्राद्धं कृत्वा कुर्यात्॥ आश्वलायनानां तु आनुलोम्येन मात्रादिक्रमेणे आ
श्वलायनाचार्यवचनात्॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः
पाद्यं स्वाहा न मम इयं च वृद्धिः॥ मातृपितामही प्रपितामह्यः नांदीमुखाः भूर्भुवः स्वः इ

१३

अ० प्र०
१९

दंवःपाद्यंस्वाहानममइदंचवृद्धिः॥प्रितृपितामहप्रपितामहाः[illegible]नांदीमुखाःभूर्भुवःस्वइदंवः
पाद्यंस्वाहानममइदंचवृद्धिः॥मातामहमातुःपितामहमातुःप्रपितामहाःपत्नीसहिताःनां
दीमुखाःभूर्भुवःस्वःइदंवःपाद्यंस्वाहानममइदंचवृद्धिः॥सत्यवसुसंज्ञकाविश्वेदेवाःनांदी
मुखाःभूर्भुवःस्वःइदंवःआसनगंधाद्युपचारकल्पनंस्वाहानममइदंचवृद्धिः॥मातृपिता
महीप्रपितामह्यःनांदीमुखाःभूर्भुवःस्वइदंवःआसनगंधाद्युपचारकल्पनंस्वाहानममइ
दंचवृद्धिः॥प्रपितामहपितामहपितरःनांदीमुखाःभूर्भुवःस्वःइदंवःआसनगं[illegible]धाद्यु
पचारकल्पनंस्वाहानममइदंचवृद्धिः॥मातामहमातुःपितामहमातुःप्रपितामहाः
पत्नीसहिताःनांदीमुखाःभूर्भुवःस्वःइदंवःआसनगंधाद्युपचारकल्पनंस्वाहानमम

श्री
१९

आमनिष्क्रयीभूतंद्रव्यं

इदंचवृद्धिः॥सत्यवसुसंज्ञकाविश्वेदेवाःनांदीमुखाःभूर्भुवःस्वःवःयुग्मब्राह्मणभोजनपर्या
प्तंदास्यमानमन्नंयथाशक्तिसोपस्करंस्वाहानममइदंचवृद्धिः॥मातृपितामहीप्रपितामह्यःनां
दीमुखाःभूर्भुवःस्वःवःयुग्मब्राह्मणभोजनपर्याप्तंदास्यमानमन्नंयथाशक्तिसोपस्करंस्वाहा
नममइदंचवृद्धिः॥प्रपितामहपितामहपितरःनांदीमुखाःभूर्भुवःस्वःवःयुग्मब्राह्मणभोज
नपर्याप्तंदास्यमानमन्नंयथाशक्तिसोपस्करंस्वाहानममइदंचवृद्धिः॥मातामहमातुःपिता
महमातुःप्रपितामहाःपत्नीसहिताःनांदीमुखाःभूर्भुवःस्वःवःयुग्मब्राह्मणभोजनप०वृ
द्धिः॥गौर्यादिषोडशमातरःब्राह्म्यादिसप्तमातरःवःयुग्मब्राह्मभोजपर्या०वृद्धिः॥प्रजा
पतेनत्वदेतान्यन्योविश्वाजाता[illegible]निपरिताबभूव॥यत्कामास्तेजुहुमस्तन्नो

अ॰ प्र॰
१७

अस्तु वयं स्याम पतयो रयीणां ॥ अनेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिः ॥ उपास्मै गायता नरः पवमानायेंदवे ॥ अभिदेवां इयक्षते ॥ अभि ते मधुना पयो थर्वाणो अशिश्रयुः ॥ देवं देवाय देवयु ॥ स नः पवस्व शं गवे शं जनाय शमर्वते ॥ शं राजन्नोषधीभ्यः ॥ बभ्रवे नु स्वतवसे रुणाय दिविस्पृशे ॥ सोमाय गाथमर्चत ॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन ॥ मधावाधावता मधु ॥ अहं नमीपदं तस्य वप्रियाअधूषत ॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती यो जान्विंद्र ते हरी ॥ कृतस्य नांदीश्राद्धस्य प्रतिष्ठासिध्यर्थं द्राक्षामलक निष्क्रयीभूतं यथाशक्ति द्रव्यं स्वाहानमद्दुयं च वृद्धिः मातापितामहिश्चैव तथैव प्रपितामही ॥ पितापितामहश्चैव तथैव प्रपितामहः ॥ मातामहस्तत्पिता च प्रमातामहकादयः ॥ एते भवंतु सुप्रीताः प्रयच्छंतु च मंगलं ॥ इलामग्ने पुरुदंस

श्री
१७

सनिं गोः शश्वत्तमं हवमानाय साध ॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ शिवं शिवं ॥ अनेन कर्मणा नांदीमुखदेवताः प्रीयंतां वृद्धिः ॥ इति पुण्याहवाचन नांदीश्राद्धप्रयोगः ॥ श्री ॥

नांदीश्राद्ध
२न

अथ विस्तरेण नांदीश्राद्धं लिख्यते ॥ तच्च पार्वणवत् ॥ विशेषो लिख्यते ॥ पूर्वाह्णे वैश्वदेवं तंत्रेण कुर्यात् ॥ कर्ता प्राङ्मुख उपवीती तिलं न कार्यं यवैः कुर्यात् ॥ उपचारप्रदक्षिणः युग्म ब्राह्मणाः ॥ १ वैश्वदेवार्थे द्वौ पित्रादिभ्यस्तु प्रत्येकं द्वौ द्वौ वर्गवा द्वौ द्वौ दत्ते च स्नान द्रव्यैः कृतः स्नानाः कार्याः ॥ जवोदर्भो अम्लाः गंधादीनां द्विर्द्विर्दानं वैकल्पिकं षष्ठीप्रयोगो न कार्यः प्रथमाप्रयोगः कार्यः ॥ चतुर्थीप्रयोगोपि क्वचित् ॥ मधुरं भोजनं दघान्नाम्लं ॥ रक्तपुष्पाणि वर्ज्यानि ॥

अ० प्र०

१८

संबंधमरूपाणिक्वाचिद्दृश्यानि॥ संबंधनामरूपाणि वर्जयेदत्र कर्मणीति कारिकोक्तेः॥ सव्यं जानुनिपातनं॥ पितृसूक्तं मांसापसव्यादि च वर्ज्यानि॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य॥ मुकककर्मांगभूतं नांदीश्राद्धं करिष्ये॥ समस्तसंपदिति ब्राह्मणान्प्रार्थयेत्॥ सत्यवसुसंका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः स्थानेक्षणं दत्ता भवद्भिः प्रसादः कर्तव्यः॥ मातृपितामहीप्रपितामह्यः नांदीमुखाः भूर्भुवः स्वः स्वस्थानेक्षणं दत्वा० व्यः॥ पितृपितामहप्रपितामहाः नांदीमुखाः भूर्भुवः स्वः स्वस्थानेक्षणं० व्यः॥ मातामहमातुःपितामहमातुःप्रपितामहाः सपत्नीसहिताः नांदीमुखाः भूर्भुवः स्वः स्वस्थाक्षणं० व्यः॥ ततो चतुरस्रपाद्यार्थं मंडले

नं १

श्री

१८

पं कृत्वा॥ सत्यवसुसंज्ञका विश्वेदेवास्स्वागतं॥ नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी युगधारिणे नमः॥ गंधादिभिरभ्यर्च्य॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यं स्वाहा न मम मेति जलं क्षिपेत्॥ एवं पितृवर्गसपत्नीकमातामहवर्गयोः पाद्यं दत्वा॥ द्वौ द्वौ विप्रौ प्राङ्मुखावुपविश्य प्रक्रांतं नांदीश्राद्धकर्म करिष्ये॥ देवेह स्तोदकं कृत्वा ऋजुदर्भैः सदर्भैः संसनं दक्षिणतो दत्वा आपो दत्ता नांदीश्राद्धे देवेक्षणः क्रियतामिति कर्ता वदेत्॥ विप्राः ॐ तथा प्राप्नुतां भवंतो॥ विप्राः प्राप्नुवः॥ कर्ता यवैरर्चयेत्॥ अर्घ्यपात्रे प्राक्संस्थे निधाय॥ जलमापूर्य यवोसीति मंत्रे

अ० प्र० १९

णयवान्निक्षिप्य गंधपुष्पाणि क्षिप्त्वा॥ विश्वेदेवास आगत शृणुतामइमं हवं॥ एदं बर्हिर्निषी
दत॥ विश्वेदेवाः शृणुतेमं हवं मे ये अंतरिक्षे उप द्यविष्ठ॥ ये अग्निजिह्वा उत वा यजत्रा आस
द्यास्मिन् बर्हिषि मादयध्वमिति मंत्रद्वयेन पादादिमूर्द्धानं पर्यंतं यवैरर्चयेत्॥ आगच्छंतु म
हाभागा विश्वेदेवा महाबलाः॥ ये अत्र विहिता श्राद्धे सावधाना भवंतु ते॥ इति मंत्रेण प्रार्थये
त्॥ देवपात्रे संपन्ने॥ सुसंपन्ने॥ स्वाहार्घ्यो अस्तु स्वाहेति प्रतिवचनं देयं॥ सत्यवसुसंज्ञका
विदेवा इदं वो अर्घ्यं स्वाहा न ममेति सकृदर्घ्यदानं कृत्वा॥ ततो गंधपुष्पधूपदीपाच्छादनादि
दत्वा॥ ततो मात्रादिभ्यः कर्तुर्नैर्ऋत्यां दक्षिणतो प्राग्वदासनं परिकल्प्य प्राक्संस्थार्घ्यपात्रेषु अ
प आपसिच्य शंनो देवीरित्यभिमंत्र्य॥ यवोसि सोमदेवत्यो गोसवे देवनिर्मितः॥ प्रत्नवद्भिः

श्री

१९

प्रत्तः पुष्ट्या नांदीमुखान् पितॄनिमांल्लोकान्प्रीणयाहि नः स्वधा न ममेति प्रतिपा
त्रेषु यवान्निक्षिप्य अन्यत्सार्वं पूर्ववदर्घ्यदानादि कृत्वा नांदीमुखा मातर इदं वो अर्घ्य
मिति सकृदर्घ्यदानं अन्येभ्योप्येवमेवार्घ्यं दद्यात्॥ प्रतिब्राह्मणमं आवृत्तिः॥ या
दिव्या आपः पृथिवी संबभूवुर्या अंतरिक्षा उत पार्थिवीर्याः॥ हिरण्यवर्णा यज्ञिया
स्ता न आपः शं स्योना भवंतु॥ गंधादीनि द्विर्द्विर्दत्वा॥ पाणिहोमांते समानं कार्यं॥ तत्र
विशेषः॥ अग्नये कव्यवाहनाय स्वाहेति न मम॥ सोमाय पितृमते स्वाहेति॥ अन्ये
षामपि पाणिषु आहुतीषु दत्वा॥ अन्नेषु परिवेष्टितेषु हुतशिष्टं दद्यात् यथा॥ ततो गा[illegible]

अ० प्र०

२०

यत्र्या जलमभ्युक्ष्य॥ पृथिवीतेपात्रं द्यौरपिधानंब्रह्मणस्त्वा मुखेअमृतेजुहोमिस्वे
ब्राह्मणानांत्वाप्राणानांत्वाप्राणापानयोर्जुहोम्यक्षितमसिमेमापांक्षेष्ठा अमुत्रामुष्मिं
ल्लोके इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूढमस्यपांसुरे॥ विष्णोहव्यंरक्षस्व॥ ब्रा
ह्मणांगुष्ठमूलेनतत्पात्रंब्राह्मणायनिवेद्य॥ इदमन्नममृतंरूपंपरिविष्टंपरिवेक्ष्यमाणंच
आतृप्तेस्वाहानममेतिजलंक्षिपेत्॥ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकाद
शस्थ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमंजुषध्वं॥ इतिप्रार्थ्य॥ ततो
मातृवर्गेभ्यः सपत्नीकं पितृवर्गेभ्यः सपत्नीकमातामहवर्गेभ्यः यथालिंगं अंगु
ष्ठादिनिवेशनांतंसर्वंकुर्यात्॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताब

श्री

२

भूव॥ यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां॥ इत्यनेनमंत्रेणनांदीमुखदे
वताभ्यःप्रीयंतांनममेतिजलमुत्सृजेत्॥ ब्राह्मणास्तुबलिदानवर्ज्यंभुंजीत॥ तत्रपितृसू
क्तेनजपेत्॥ रक्षोघ्नानैंद्रांजपेत्॥ तृप्तिप्रश्नांतंसमानं॥ तत्रविशेषः॥ मधुवाताऋच
स्थानेउपास्मैगायतानरइतिपंचर्चं अक्षन्नमीमदंतेतिचोक्त्वा संपन्नंदैवेरुचिरमिति
तृप्तिप्रश्नः॥ तत्रैववर्गत्रयस्यरुचिरमितिपृष्टास्तेपितथैवब्रूयुः॥ पिंडदानांतंसमा
नं॥ तत्रविशेषः॥ आचांतेषुविप्रेषुगोमयोपलिप्तेभोजनस्थले प्रागग्रान्दर्भानास्ती
र्यदधिसंयुक्ताज्यमिश्रं बदरीफलमिश्रं च भुक्तशेषमन्नंगृहीत्वाउपरितंतंत्रंकृता

अ० प्र० २२

नांदीमुखीभ्योमातृभ्यः स्वाहेति एकं पिंडं दत्वा द्वितीयं तु छीं दद्यात्॥ एवं प्रत्येकं द्वौ द्वौ पिंडौ निर्वपेत्॥ पिंडदाने न कुलदेशाचारतो व्यवस्था भविष्यत्पुराणे॥ पिंडनिर्वपणं कुर्यान्न वा कुर्यान्नराधिप॥ वृद्धिश्राद्धे महाबाहो कुलधर्मान्निवेक्ष्य तु॥ पिंडानुमंत्रणादि वैकल्पिकं पिंडमात्रमधोमुखं न कुर्यात्॥ कृतस्य नांदीश्राद्धस्य प्रतिष्ठासिध्यर्थं द्राक्षामलकनिष्क्रयणीभूतं द्रव्यं दातुमहमुत्सृजे ज्येष्ठा॥ ॐ संपन्नमिति विसर्जेत्॥ तथैव ब्राह्मणाः संपन्नमिति ब्रूयुः॥ ततो दाता वरयाचनं कुर्यात्॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव नः॥ श्रद्धा च नो मा व्यगमद्बहुधैयं देयं च नोस्तु॥ अन्नं च नो ब

श्री २२

श्र० १

हु भवेदतिथींल्लभेमहि॥ याचितारश्च नः संतु मा च याचिष्म कंचन॥ तथैव ब्राह्मणा ब्रूयुः॥ ततः माता पितामही चैव तथैव प्रपितामही॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ एते ■ भवंतु मे प्रीताः प्रयच्छंतु च मंगलमिति॥ इहैव स्तं मा वियोष्टं विश्वमायुर्व्यश्नुतं॥ क्रीळंतौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥ इति ब्राह्मणैराशिषो देया यथाचारं सर्वं कुर्यात्॥ इळामग्ने पुरुदंसं सनिं गोरित्यनेन पात्रसंघट्टनं घंटाशब्दं वा कुर्यात्॥ ततो मातृका विसर्जयेत्॥ जीवन्मातृकस्य न मातृपार्वणं॥ जीवन्मातामहस्य न मा■तामहपार्वणं॥ जीवत्पितृकस्तु येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति॥

विप्राणामुषिष्टानि आसयंबर्हिर्नेऊह्रासपेद॥ नतः स्वस्ति नो मिमी तामश्विनाभगः
स्वस्तिदेव्यदितिरनर्वणः॥ स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना॥
स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्वस्तये स्व
स्तय आदित्यासो भवंतु नः॥ विश्वेदेवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये॥
देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः॥ स्वा॥ स्वस्ति मित्रावरुणा स्वस्ति
पथ्ये रेवति॥ स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि॥ स्वस्ति पंथामनु चरेम
सूर्याचंद्रमसाविव॥ पुनर्ददताघ्नता जानता संगमेमहि॥ स्वस्त्ययनं तार्क्ष्यमरि

ष्टनेमिं महद्भूतं वायसं देवतानां॥ असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवारुहे
म॥ अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं॥ प्रयतपाणिः शरणं प्रपद्ये
स्वस्ति संबाधेष्वभयं नो अस्तु॥ शंन इंद्राग्नी भवतामवोभिः शंन इंद्रावरुणा रातहव्या

ता

शमिंद्रासोमा सुविताय शंयोः शंन इंद्रापूषणा वाजसातौ॥ शंनो भगः शमु नः शंसो अ
स्तु शंनः पुरंधिः शमु संतु रायः॥ शंनः सत्यस्य सुयमस्य शंसः शंनो अर्यमा पुरुजातो
अस्तु॥ शंनो धाता शमु धर्ता नो अस्तु शंन उरूची भवतु स्वधाभिः॥ शंरोदसी बृहती शंनो
अद्रिः शंनो देवानां सुहवानि संतु॥ शंनो अग्निर्ज्योतिरनीको अस्तु शंनो मित्रावरुणावश्वि

ना

ता॰ १

अ० प्र०

२३

नाशं ॥ शंनः सुकृतां सुकृतानि संतु शंन इषिरो अभिवातु वातः ॥ शंनो द्यावापृथिवी पूर्व
हूतौ शमंतरिक्षं दृशये नो अस्तु ॥ शंन ओषधीर्वनिनो भवंतु शंनो रजसस्पतिरस्तु जि
ष्णुः ॥ १ ॥ शंन इंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ॥ शंनो रुद्रो रुद्रेभिर्ज
लाषः शंनस्त्वष्टा ग्नाभिरिह शृणोतु ॥ शंनः सोमो भवतु ब्रह्म शंनः शंनो ग्रावाणः श
मु संतु यज्ञाः ॥ शंनः स्वरूणां मितयो भवंतु शंनः प्रस्व१ः शम्वस्तु वेदिः ॥ शंनः सूर्य उ
रुचक्षा उदेतु शंनश्चतस्रः प्रदिशो भवंतु ॥ शंनः पर्वता ध्रुवयो भवंतु शंनः सिंधवः शमु
संत्वापः ॥ शंनो अदितिर्भवतु व्रतेभिः शंनो भवंतु मरुतः स्वर्काः ॥ शंनो विष्णुः शमु

श्री

२३

पूषा नो अस्तु शंनो भवित्रं शंम्वस्तु वायुः ॥ शंनो देवः सविता त्रायमाणः शंनो भवंतूषसो
विभातीः ॥ शंनः पर्जन्यो भवतु प्रजाभ्यः शंनः क्षेत्रस्य पतिरस्तु शंभुः ॥ २ ॥ शंनो देवा
विश्वदेवा भवंतु शं सरस्वती सहधीभिरस्तु ॥ शमभिषाचः शमु रातिषाचः शंनो दिव्याः
पार्थिवाः शंनो अप्याः ॥ शंनः सत्यस्य पतयो भवंतु शंनो अर्वंतः शमु संतु गावः ॥
शंन ऋभवः सुकृतः सुहस्ताः शंनो भवंतु पितरो हवेषु ॥ शंनो अज एकपाद्देवो अ
स्तु शंनोहिर्बुध्न्य१ः शं समुद्रः ॥ शंनो अपां नपात्पेरुरस्तु शंनः पृश्निर्भवतु देवगो
पा ॥ आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रियमाणं नवीयः ॥ शृण्वंतु नो दिव्याः पा

अ॰ प्र॰
२४

र्विवासो गो जाता उतयेयज्ञियासः ॥ ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृताऋतज्ञाः ॥ ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ आत्वमृभुवामिनं देवजूतं सहावानं तरुतारं रथानां ॥ अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहाहुवेम ॥ इंद्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवारुहेम ॥ उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ॥ सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान ॥ सहस्रसाः शतसा अस्य रंहिर्न स्मा वरंते युवतिं न शर्याम् ॥ इति पठेत् ॥ इति नांदी श्राद्धप्रयोगः ॥ अथ विवाहोत्तरं कर्तव्यः स्थालीपाकः प्रथमं उच्यते ॥ तत्रां

श्री
२४

वि

गानाम्नुक्रमे [illegible] नामन्येषु निर्देशेन प्राप्तेः ॥ स च विवाहा[illegible]नंतरं क[illegible]र्तव्यं गृहप्रवेशनीयहोमोत्तरभाविन्यां पौर्णमास्यामारंभणीयः ॥ नत्वमावास्यायां ॥ यदि च आरंभकाले मलमास गुरुशुक्रास्त बाल्य वार्द्धक्य ग्रहण पौष मासादि भवति तदा विप्रारंभ[illegible] कार्यः ॥ यादि तु त[illegible]त्रारंभनि[illegible]षेधकानि ॥ उपरागो धिमासश्च यदि प्रथमपर्वणि ॥ तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते ॥ गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे तथेत्यादि संग्रहकारादिवचनानि तानि आलस्यादिना स्वकालानुप[illegible]

त्रि॰ १

क्रांतस्थालीपाकादिप्रारंभविषयाणीतिप्रयोगपारिजातकारः॥ तथाचाह पराकेस्थंगर्ग
वचनंउदाहृत्य हारः॥ नामकर्म चंद्रदर्शेस्त्रियथाकालंसमाचरेत्॥ अतिपातेस्तितयोःप्र
शस्तेमासिपुण्यभेदइतिस्थालीपाकारंभकालः॥ अथपर्वनिर्णयः॥ पूर्णिमादर्शपर्व
श्च॥ तत्रान्वाधानंप्रतिपदीष्टिरि[illegible]त्युत्सर्गः॥ तत्रपर्वचतुर्थोंशः प्रतिपदश्चाद्यास्त्रयोंशाः॥ सूर्योदयोत्तरमुहूर्तत्रयेविद्यमानोयागकालः॥ सूर्यास्तमानपर्यंतंयत्रपर्वखंडं
डंतत्रनसंदेहः॥ यदितुखंडंपर्वतत्रनिर्णयः॥ अन्हामध्येन[illegible]तः पूर्वंवापर्वप्रतिप
दोःसंधौतदहर्यागः पूर्वेद्युरन्वाधानं॥ मध्यात्सरेसंधौतदहरन्वाधानंपरेद्युर्यागइ

ति॥ संधिश्चप्रतिपदोह्रासवृद्ध्योरर्द्धंपर्वणिप्रक्षिप्यज्ञेयः॥ इष्टेःपर्वणिसमाप्तोपुन
रिष्टिःकर्तव्यतापत्तेःसाप्रतिपद्येवसमापनीयानपर्वमध्ये॥ अपराह्णेसंधौपरेद्युः
प्रतिपच्चतुर्थांशेपियागेनदोषः॥ चंद्रदर्शनदिनेइष्टिनिषे[illegible]धवचनानिननिर्णय
कानिसंभवंत्यो[illegible]यानियानितुपौर्णमासीसंगवा[illegible]दूर्ध्वमावर्त्तनात्पूर्वंसंधिमतीसा
सद्यस्[illegible]लेतितस्यांन्वाधानंयागश्च॥ अथविकृतौनिर्णयः॥ आवर्त्तनेतुतःपूर्वंवापर्व
संधौतदाहरात्सौप्रकृतियागंकृत्वापश्चादाग्रयणादिविकृतिःकार्या॥ परतःसंधौ
तुविकृतियागएवसंधिदिनेप्रकृतिस्तुतदुत्तरदिनइति॥ अथस्थंडिलकरणादिनि

इती का टीका पं २

अ०प्र०

२६

र्णयः॥तत्रचौलादिहोमो लौकिकाग्नौ॥चौलकर्मोपनयने विवाहः प्रथमस्तथा॥व्र
तानि स्नानमित्येषां लौकिकाग्निरितिस्थितिः॥तत्रलौकिकाग्नौ होमे स्थंडिलकरणाग्नि दी
प्रतिष्ठापनादौ विधिर्नियतः॥यदापि समिदादौ वह्निसमारोपस्तदा गृह्याग्निकर्त्तव्ये
पि स्थालीपाकादौ नियतः॥कारिकाकारः॥प्रतिष्ठाप्याथ लेखासु होमायालं हविर्भु
जं॥एतदंतं प्रकुर्वीत होष्यं संस्थापितेनले इति॥अन्यथा संस्थापितेनले होष्यंनिति
मर्थस्यात्॥एवं स्थंडिलकरणादिविषयं निर्णीय स्थंडिलादि कुर्यात्॥तत्र यजमानः श्री
कृतनित्यक्रियः शुचिः परिहितधौतवाससा दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्य २६

ला:५

२ नतमंगुलो २

तो द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य परमेश्वरप्रीत्यर्थं अमुककर्म करिष्ये॥तदंग
होमं कर्तुं स्थंडिलादि करिष्ये॥इति संकल्प्य गोमयादि लिप्ते शुद्धे देशे शुद्धमृदा ईशान्या
मारंभ मुदक्संस्थं चतुरंगुलोन्नतं वा चतुर्दिक्षु मिलितान्द्विसप्तत्यंगुलपरिधिकं फलितम
ष्टादशांगुलविस्तृतं होमानुसारेण तदधिकं वा नतु ततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात्॥त
द्गोमयेन प्रदक्षिणमुपलिप्य तं दक्षिणे ष्टौ उदीच्यां द्वे प्राच्याम द्वे मित्यंगुलानि त्यक्त्वा दक्षि
णोपक्रमामुदक्संस्थां प्रादेशमात्रामेकां लेखां तस्या दक्षिणोत्तरयोः प्रागायते पूर्वरेख
या असंस्पृष्टे प्रादेशसंमिते द्वे लेखे लिखित्वा तयोर्मध्ये परस्परमसंस्पृष्टा उदक्संस्थाः प्रागाय

स्थं० रं० गोमयेनोप० भवेत्॥अष्टोदमुना०

यज्ञीय

ताः प्रादेशसंमितास्तिस्रइतिषट्खलेरवांशाकलम्खलेनदक्षिणहस्तेनोद्धिरव्यलेरवासुत्तरशक
लमुदगग्रंनिधायस्थंडिलमद्भिरभ्युक्ष्यशकलमाग्नेय्यांनिरस्यापाणिंप्रक्षाल्यवाग्यतोभ
वेत्॥छेदनेभेदनेचेवपैत्तकेरौद्रराक्षसे॥आत्माभिमर्शनेचैवनिरस्यापउपस्पृशेत्॥ततेज
सादिपात्रेपिधानसहितमग्निमानीयस्थंडिलाग्नेय्यांनिधाय॥जुष्टोदमूनाआत्रेयो
वसुश्रुतोग्निस्त्रिष्टुप्॥अग्न्यावाहनेविनियोगः॥ओंजुष्टोदमूनाअतिथिर्दुरोणइमंनो
यज्ञमुपयाहिविद्वान्॥विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभोजनानि॥एह्यग्ने
राहुगणोगोतमोग्निस्त्रिष्टुप्॥अग्न्यावाहनेविनियोगः॥ओंएह्यग्नइहहोतानिषीदाद

दि। शि।

२ २
श्री
२९

इत्यक्ष तैरावाह्य। आ। छा। स। बृहती। आ। त्रि। प्र। ते। यो। ग।

ब्धः सुपुरएताभवानः॥अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान्॥भूर्भुवस्व
रोग्निंप्रतिष्ठाप्य॥चत्वारिशृंगावामदेवोग्निस्त्रिष्टुप्॥अग्निमूर्तिध्यानेविनियोगः॥
चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य॥त्रिधाबद्धोवृषभोरोरवीति
महोदेवोमर्त्याआविवेश॥सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः॥त्रिपात्प्र
संनवदनःसुखासीनःशुचिस्मितः॥स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा॥बि
भ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं॥तोमरंव्यजनंवामेघृतपात्रंचधारयन्॥आत्मा
भिमुखासीनएवंरूपोहुताशनः॥एषहिदेवःप्रदिशोनुसर्वाःसर्वाःपूर्वोहिजातःसउग

अ। प्रो। दे। दे।
२९

वरदो

अ॰ प्र॰ 28

मैअंतः॥ सवित्रे जायमानः सजनिष्यमाणः प्रत्यङ्मुखास्तिष्ठतिविश्वतोमुख॥ अग्नेवैश्वानर शांडिल्यगोत्रमेषध्वजप्राङ्मुखममसन्मुखोभव॥ ततोयदिसमिदादौसमारोपितोअग्निस्तर्हिप्रत्यवरोहणं कार्यं॥ ओंप्रत्यवरोह जातवेदः पुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन्॥ प्रजांपुष्टिंरयिमस्मासुधेत्वथाभवयजेमानायपुंशंयोरितिमंत्रेणसमारोपिताऽग्निं समिधंस्थापितेअग्नौप्रक्षिपेत्॥ अथस्थालीपाकप्रयोगः॥ गृहप्रवेशनीयहोमाद्याः पौर्णमास्यागमिष्यति॥ तस्यांप्रारंभोतेतिवृत्तिकारादिभाषितं॥ प्रातरौपासनंहुत्वासमिधौद्वेनिधायच॥ अथवातिस्रआदध्यात्तुसंकल्पपूर्वकं॥ सद्यस्कालोभवेद्यद्वापौर्णमासस्तुपार्व

तं॰ 2 श्री 28

\+ प्रत्यवरोहेत्यस्यमंत्रस्यहिरण्यगर्भोग्निस्त्रिष्टुप् समित्समारोपितगृह्याग्निप्रत्यवरोहणेविनियोगः॥ २ +

अग्निप्रज्वाल्य॥ चत्वारि॰ दोभव॥ २ क्रियमाणेदर्शस्थालीपाकहोमेदेवतापरिग्रहार्थमन्वाधानंक॰॥ समिध इध्म सादय॰ +

णः॥ ततआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंदर्शपूर्णमासाभ्यांस्थालीपाकाभ्यांयक्ष्ये॥ तत्रेदानींपौर्णमासेनस्थालीपाकेनयक्ष्ये॥ दर्शेतुपूर्वसंकल्पितेनदर्शस्थालीपाकेनयक्ष्ये॥ तदंगमन्वाधानंकरिष्ये॥ अस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिं॥ प्रजापतिंचाघारदेवते आज्येनअग्नीषोमौचक्षुषीआज्येनात्रप्रधानं अग्निमग्नीषोमौचप्रधानदेवते चरुद्रव्येण॥ दर्शेतुअग्निमिंद्राग्नीप्रधानदेवतेचरुद्रव्येण॥ शेषेणस्विष्टकृतमग्निंइध्मसंनहनेनरुद्रं अयासमग्निंदेवान्विष्णुमग्निंवायुंसूर्यंप्रजापतिंचैताःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिवर्हणार्थंत्रिवारमग्निंमरुतश्चआज्येनअंगदेवताःप्रधानदेवताःसर्वाःसंनिहि

विश्वांदेवांत्संस्रावेण

गो पा

अ० प्र०

२९

द्रव४

ताः संतुरवंसांगेनकर्मणासद्योयक्ष्ये॥सद्यस्कालेतुसद्योयक्ष्येइति॥तूष्णीं समस्तव्याहृतिभिर्वास
समिद्धोमंकुर्यात्॥भूर्भुवः स्वः स्वाहा॥प्रजापतयइदं॥इध्माबर्हिषोश्चसंनहनंकृत्वोपरिनिदध्या
त्॥तद्दिनेकलहक्रयविक्रयप्रहासा... नतबहुभाषणचौर्यादिव्यसनपर्यंकशयनदंतधाव
नकरंभकुलत्थकोद्रवशाकमसूरवैंतार्कक्षारलवणकोरदूषकमधुमाषमांसमद्यपरान्नोपवासंतै
लमैथुनानिवर्जयेतां॥दधिघृतपयोमिश्रं हविष्यान्नं दिवैवसकृद्भुंजीयातां॥श्रारूकृत्तुश्राश्रे
पंमाषाद्यंनभुंजीत॥ततप्रतिपदिप्रातरौपासनंहुत्वाऽग्निंपरिसमुह्यपरिस्तरणीयात्॥तत्रेत्थं॥
अग्नेःषोडशभिर्दर्भैःप्राच्यादिषुपरिस्तृतिः॥युग्मैःप्रादेशमात्रैश्चपूर्वाग्रैःसर्वदिक्षुपिंकांश्वि

समस्तव्याहृतीनांपरमेष्ठीप्रजापतिप्रजापतिर्बृहती॥अन्वाधानसमिद्भ्यः

पार

श्री

विंत्रेच्छत्वाअपास्यिकृत्स्नपात्राण्युत्तानानिकृत्वाइध्मंचविंस्यसर्वाणिपात्रा
णित्रिःप्रोक्षयेत्ताआपःकिंचितकमंडलौदिनेपादत्येकेतेपवित्रेप्रणीतापात्रेनिधा

अत्रैर्दर्भैः
राछादयेत्

दुत्तरतोदर्भानास्तीर्यपरिषिंचति॥दर्भेषूत्तरतोद्वेद्वेपात्राणिन्यांचसादयेत्॥ततकृमंभगवानाहप्लो
केनैकेनवत्तिकृत्॥दर्भेषुदक्षिणसव्यपाणिभ्यांक्रमेणचरुस्थालीप्रोक्षण्योदर्वीस्रुवौप्रणीताज्य
पात्रेइध्माबर्हिषीश्चर्मकृष्णाजिनमुलूखलमुसलेचेति॥द्वेद्वेउदगपवर्गं प्राकृसंस्थंचस्रुवंआन्यासा
दयेत्॥आज्यमात्रहोमेतुप्रोक्षणीस्रुवौप्रणीताज्यपात्रेइध्माबर्हिषीचतथाकुर्यात्॥प्रोक्षणीपा

सामसमस्थल

त्रमुत्तानंकृत्वातत्रानंतर्गर्भितैप्रादेशमात्रेकुशद्वयरूपेपवित्रेनिधाय॥शुद्धाभिरद्भिःपूरयित्वा...
~~...ण्युत्तानानिकृत्वाइध्मंचविस्रस्यसर्वाणिपात्राणित्रिःप्रोक्षये~~त्॥प्रणीता
पात्रमग्नेःप्रत्यङ्निधाय~~...~~उदकंपूरयित्वागंधपुष्पाक्षतान्निक्षिप्यास्मिन्कर्मणि

तत्पात्रंप्रणपित्वागंधपुष्पाक्षतान्निक्षिप्यहस्तयोरंगुष्ठोपकनिष्ठिकाभ्यांउदगग्रेषु्यकृप

+ ईशान्यां प्राग्वा खड्गउपविश्य ब्रह्मवरणं ईन्यामिव ० +
इशान्यां प्राग्वा

ब्रह्मा १

अ० प्र० ब्रह्मत्वेन त्वामहं वृणे पाणिना पाणिं स्पृष्ट्वा ततो ब्रह्मा वृतोऽस्मीत्युक्त्वा॥ आचम्य समस्तपाणांगुष्ठेन
३० त्वाग्नेर्दक्षिणतस्तिष्ठन् निरस्तः परावसुरिति तृणं गृहीत्वा निर्ऋत्यां निरस्यापस्पृष्ट्वा इदमहमर्वा
वसोः सदने सीदामि॥ इत्युक्त्वोपविशेत्॥ ओं बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं
गोपायेत्युपविश्य जपेत्॥ ब्रह्मन्नपः प्रणेष्यामीति श्रुत्वा॥ ततो ब्रह्मा भूर्भुवः स्वर्बृहस्पतिप्रसूत इति
स २ जपित्वों प्रणयेत्युच्चैर्वदेत्॥ निरस्यापवेश[illegible]श्वेत[illegible]था ब्रह्मजपोऽपि च॥ प्रायश्चित्तमुपस्थानं
ब्रह्मणः कर्मपंचकं॥ यदि ब्रह्मा न भवेत्तत्तनो यजमानस्तत्वरणीतापात्रं ना॥ वसिकृासमीपे नीत्वा
उत्तरतोऽग्नेर्निधाय दर्भैराच्छादयेत्॥ ते पवित्रे भूर्धे निधायाग्नेय त्वा जुष्टं निर्वपामीति मंत्रा ३०

×१ ततः प्रस्य गग्नेः कुशेषु सुपंनि धायात त्रपा गग्ने ×

+ प्रोक्षणीपात्रस्थिताभिरद्भिः प्रोक्ष्य यद्यद्धोमं द्रव्यं तत्तत्त्वपवित्रे स्थाप्य प्रोक्षयेत् ×

त्स्या व्रीहीणां चतुरो मुष्टीन्निरूप्याग्नीषोमाभ्यां त्वा जुष्टं निर्वपामीति तथैव निरूप्य ते पवित्रे व्रीही
णामुपरि निधायोत्पूताभिरद्भिरग्नये त्वा जुष्टं प्रोक्षामीति निर्वापसंख्यया प्रोक्षयेत्॥ एवमग्नी
षोमाभ्यां प्रोक्षयेदिति॥ दर्शे तु अग्नीषोमस्थाने इंद्राग्निभ्यां त्वेत्यादि निर्वापप्रोक्षणे विशेषः॥
एवं नाममंत्रक होमे निर्वापे प्रोक्षणं च यथाप्रधानदैवतं देवतानामग्रहणेन कार्यं॥ समंत्रक हो
दो०२ मे॥ तु श्रवणाकर्मादौ तूष्णीं चतुरश्चतुरो मुष्टीन्निर्वपेत् प्रोक्षेच्च॥ ततः प्रत्यग्ग्रीवं कृष्णाजिनं पाश्चात्
निधाय तदुपरि उलूखलं निधाय व्रीहीन्नोप्य पत्नी तंडुलान् त्रिः शुक्लीकुर्यात्॥ त्रिः प्रक्षाल्यामुत्तरतः
ग्नेः श्रपयेत्॥ ततः परिस्तरणं॥ ब्रह्मणः उत्तरतः अंगारानपोह्य तदुपरि आज्यपात्रं निधाय २

× ते पवित्रे आज्यपात्रे निधायत् प्रागं पुरतः संस्थाप्य तास्मिन्नाज्यमासिच्याग्नेरुत्तरतः ×
संस्थितांगारानपास्य तत्रा सन्नाग्नेरुदक

अंगुष्ठपर्वमात्रं+

अ० प्र० ३१

विलीनोज्यं निक्षिप्य वामहस्ते दर्भाग्रद्वयं धृत्वा एकेनोल्मुकेनावज्वल्य दर्भद्वयं निक्षिप्योल्मुकेन च द्वि
रुसहितं त्रिः पर्यग्निकरणं कुर्यात् उल्मुकं निरस्याप उपस्पृश्य अंगारानग्नौ क्षिपेत् ॥ अंगुष्ठोपक
निष्ठिकाभ्यां उत्तानाभ्यां पाणिभ्यां पवित्रे गृहीत्वा ॥ सवितुष्ट्वेति मंत्रस्य हिरण्यस्तूप ऋषिः स
विता देवता पुरउष्णिक् छंदः आज्यस्योत्[illegible]वने विनियोगः ॥ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण
पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ प्रागुत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीं ते पवित्रे अद्भिः प्रोक्ष्या
ग्नौ प्रहरेत् ॥ स्कंदाय स्वाहा स्कंदायेदं ॥ ततो बर्हिरास्तरणात् उपरि आज्यपात्रं निधाय दक्षिण
हस्तेन स्रुवं स्रुवे गृहीत्वा सव्येन कांश्चित् दर्भानादाय सहैवाग्नौ प्रताप्य दर्वीं निधाय दक्षिणहस्ते
न स्रुवं वामहस्ते गृहीत्वा स्रुवबिलं दर्भाग्रैः त्रिः संमृज्य तथैव स्रुवपृष्ठं दर्भाग्रेण आत्माभि

तत्र बर्हिः संनह्य नीरजनमूर्द्ध ग जां प्रसार्य तस्या बर्हिः प्रागग्रमुदगपवर्गमविरलमा
स्तीर्य तस्मिन्नाज्यपात्रं निधाय स्फ्यादि संमार्जयेत् ॥

+२४ मेव दर्भाग्रपाः+

मुखं त्रिः संमृज्य ॥ कुशमूलेन पृष्ठादारभ्य बिलपर्यंतं त्रिस्त्रिः संमृज्य प्रोक्ष्य प्रताप्य घृतादुत्तरतः स्था
पयेत् ॥ पुनस्तथैव स्रुचं संमृज्य प्रोक्ष्य प्रताप्य स्रुवादुत्तरतः स्थापयेत् ॥ संमार्गान् प्रोक्ष्याग्नौ प्रह
रेत् ॥ स्रुवेणाज्यं गृहीत्वा चरुमभिघार्योदगुद्वास्याज्यपार्श्वे निनीताज्याद्दक्षिणतो बर्हिषि
सांतेमासाद्य ततन्मध्ये रकपात्रं निधाय अग्निमलंकृत्य ॥ विश्वानि न इति त्रिस्तृणा आत्रे
यो वसुश्रुतोग्निस्त्रिष्टुप् छंदः अभ्यर्चने त्योपस्थाने विनियोगः ॥ विश्वानि नो दुर्गहा जातवेदः सिं
धुं न नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्नमसा गृणानो ऽस्माकं बोध्यविता तनूनां ॥ यस्त्वा हृ
दा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु धेहि प्रजा[illegible]भिरग्ने

[अ०प्र० ३३]

×मूलमध्याग्नेषु स्रुक्वेणपृथक्तन्निर× भिघार्य मूलमध्याग्रेषु भागेषु गृहीत्वा×

अनन्तलमश्यां॥ यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवस्योनं॥ अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति॥ अष्टदिक्षु गंधपुष्पादिभिरायतनं द्वाभ्यां मलं कृत्य यत्कायो रूपस्थायसंतो पासीने ध्मधमादायाभिघार्यायं त इध्म इत्यस्य मंत्रस्य वामदेव ऋषिः जातवेदा अग्निर्देवता त्रिष्टुप् छंदः इध्महवने विनियोगः॥ ॐ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा॥ अग्नये जातवेदस इदं॥ स्रुवेणाज्यं गृहीत्वा वायव्यदिशमारभ्याग्नेयीपर्यन्तमाज्यधारामृजुं हरेत्॥ प्रजापतिं मनसा ध्यायन् स्वाहेति जुहुयात्॥ तथैव निर्ऋतीदिशमारभ्य ईशानीपर्यन्तं जुहुयात्॥ उभयं प्रजापतय इदं॥ [पं ३२]

[पं ३]

[श्री ३२]

अग्नये स्वाहा उत्तरतः॥ सोमाय स्वाहेति दक्षिणतः॥ अग्नय इदं सोमायेदं॥ चरोरुत्तरार्धमुद्धृत्य इदमग्नय इदमग्नीषोमाभ्यां भिन्नभिन्नपात्रे दर्व्यामुपस्तीर्य चरुस्थालीगतमंगुष्ठमात्रं मध्याद्गृहीत्वा॥ पूर्वार्द्धाच्च चरुमभिघार्यावत्तमभिघारयेत्॥ पंचावत्तिनस्तु॥ जामदग्न्या वत्सविदा वार्ष्टिषेणास्तथैव च॥ भार्गवश्च्यावनाप्नोवाः पंचावत्तिन ईरिताः॥ स्रुक्पार्श्वेन अग्नये स्वाहा॥ अग्नय इदं॥ तथैव पाकान्तराद्गृहीत्वा अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं॥ दर्शे तु अग्नीषोमस्थाने इंद्राग्निभ्यां स्वाहेति विशेषः॥ त्यागस्तथैव प्राक्संस्थमुदक्संस्थं वा हुत्वा पुनर्दर्व्यामुपस्तीर्य चरोरुपस्तीर्य तत्राद्गृहीत्वा सकृत्सकृद्गृहीत्वा दर्व्यामोप्य पंचावत्ती

[पं २]

[दर्व्यामोप्य २ तथैव गृहीत्वा]

अ०प्र०

३३

जुहविर्भागद्वयेपि उत्तरार्द्धात्स्रुवौर्द्धाच्चद्विर्द्विरवद्यायपात्रस्थमनभिघार्य अवत्तंतुद्विरभिघार्यय
दस्यकर्मणइत्यस्यमंत्रस्यहिरण्यगर्भऋषिः।अग्निस्स्विष्टकृद्देवता अतिधृतिश्छंदः स्वि
ष्टकृद्धोमे विनियोगः।यदस्यकर्मणोत्यरीरिचं यद्वान्यूनमिहाकरं। अग्निष्टत्स्विष्टकृद्वि
द्वांत्सर्वंस्विष्टंसुहुतंकरोतुमे।अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामा
नांसमर्द्धयित्रेसर्वान्नःकामान्समर्द्धयःस्वाहा अग्नयेस्विष्टकृतइदं।त्रिसंधानंविस्र
स्यप्रोक्ष्यरुद्रायस्वाहारुद्रायेदं।अपस्पृ[illegible]श्यस्रुवेणप्रायश्चित्ताहुतीः सप्तजुहुयात्॥ श्री
तत्रमंत्राः।अयाश्चा[illegible]त्यस्यमंत्रस्यविमदऋषिः।अया अग्निर्देवतापङ्क्तिश्छंदः।प्राय ३३

पशुपये२४ पशुपतय२८ ज्या२

श्चित्ताज्याहुतिहोमे।अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमया असि।अयासाकृतोया
सन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा।अग्नयेअयासइदं।अतोदेवाइतिद्वयोःकाण्वो
मेधातिथिऋषिः।आद्यायोदेवादेवताद्वितीयायादेवतोविष्णुर्देवतागायत्रीछंदः।प्रायश्चित्ता
ज्याहु।अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे।पृथिव्याःसप्तधामभिःस्वाहादेवेभ्यइदं।
इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं।समूढमस्यपांसुरेस्वाहा।विष्णवइदं।व्यस्तसमस्त
व्याहृतीनांविश्वामित्रजमदग्निभरद्वाजभृगवऋषयः।अग्निर्वायुःसूर्यप्रजापतयोदे
वतागायत्र्युष्णिगनुष्टुप्बृहत्यःछंदांसि।प्रायश्चित्ताज्याहु।ओंभूःस्वाहा।अग्नयइदं।

अ० प्र०
३४

ज्या

ॐ भुवः स्वाहा। वायव इदं। ॐ स्वः स्वाहा। सूर्यायेदं। भूर्भुवः स्वः स्वाहा। प्रजापतय इदं। ततो ब्रह्मा
कर्तारं परित्याग्नेर्वायव्यदेशे तिष्ठं नेता स्रुवसम्भृताहुती जुहुयात्। त्यागस्तु यजमानो त्रकु
र्यात्॥ अनाज्ञातमितिमंत्रद्वयस्य हिरण्यगर्भ ऋषिः अग्निर्देवता त्रिष्टुप् छंदः ज्ञाताज्ञा
तदोषनिर्हरणार्थे प्रायश्चित्ताज्या। अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने
तदस्य कल्पय त्वं हि वेत्थ यथा तथं स्वाहा। अग्नय इदं। पुरुषसंमितो यज्ञो यज्ञः पुरुषसं
मितः। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथा तथं स्वाहा अग्नय इदं। यत्पाकत्रेत्यस्य मंत्रस्य
आस्यस्त्रित ऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। न्यूनातिरिक्तपूर्णार्थे प्रायश्चित्ताज्याहुति।

अग्न ३

श्री
३४ स्मितो

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो दे
वां ऋतुशो यजाति स्वाहा। अग्नय इदं। यद्वो देवा इत्यस्य मंत्रस्य अभितप्या ऋषिः। मरुतो
देवता त्रिष्टुप् छंदः। मंत्रविपर्यासादिनिमित्तप्रायश्चि॰ यद्वो देवा अतिपातयानि वा
चा च प्रयुती देवहेळनं॥ अरायो अस्मां अभिदुच्छुनायते न्यत्रास्मन्मरुतस्तन्निधेतन
स्वाहा। मरुद्भ्य इदं। बर्हिषि पूर्णपात्रं निनयेत्। पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सु
पूर्णं मे भूयाः। सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः। अक्षितिरसि मा मे क्षेष्ठाः।
प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां। दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां।

सांगतासि॰ त्वे

भूर्भुवः स्वः

+ ता ओ पः समुद्रं ग छेत प्रागा सि प दी स्तार णा न्यु दरे च सुजे ठ +

प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां। उदीच्यां दिश्यापओषधयो वनस्पतयो मार्जयंतां। ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां॥ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु॥ विश्वं हि रिप्रं प्रवहंति देवी रुदिदाभ्यः शुचिरापूत एमि॥ इदमापः प्रवहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥ सुमित्र्यान आप ओषधयः संतु इत्येतेन मंत्रेण मार्जनं कुर्यात्। दुर्मित्र्यास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ स्तंहन्मीतिनिर्ऋति देशे कुशाग्रेरपः सिंचेत्॥ मा हं प्रजां परासिचं यानः सयावरी स्थन। समुद्रे वो निनयानि स्वं पाथो अपीथ॥ आग्नेयाभिमुखस्तिष्ठन्॥ ओं चमे स्वरश्च मे० स्वस्ति श्रद्धां मेधां यशः

॥ ततो ब्रह्मा यजमानो वा वामपाणिस्थितपत्न्यंजलि पात्रस्थं जलं दत्वा

मंत्रमेकं श्रुत्वा पत्न्या वाचयन् स्वयं वा पठन्नस्य अञ्जलिं निषिच्यांजलिस्थजलैः पापापनोदनार्थं मालानां यजमानं पत्नीं च प्रोक्षयेत्॥ पत्नी तज्जलं बर्हिषि निषिंचेत्॥ अथवा यजमान एव स्ववामपाणावुत्तानबर्हिषि निधाय तत्र दक्षिणपाणिना पूर्णपात्रमादाय माहं प्रजामित्यनेन मंत्रेण तज्जलं प्रत्यञ्जलिं निषिच्य तामापः समर्पयित्वा पाणिस्थजलैः रोमाणि पत्नीं च प्रोक्षयेत्

प्रज्ञां विद्यां बुद्धिं श्रीः श्रियं बलं। आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनोऽग्ने नमो नमः॥ मानस्तोके इति मंत्रस्य कुत्स ऋषिः रुद्रो देवता जगती छंदः विभूतिग्रहणे विनियोगः॥ मानस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे। त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषं शतायुषं। यथास्थानं विभूतिधारणं कुर्यात्॥ परिस्तरणं विरस्य। परिसमुह्य। पर्युक्ष्य। हविरुच्छिष्टं ब्राह्मणेभ्यो तदभावे ब्राह्मणेभ्यो दातुमहमुत्सृज्ये। अनेन पोर्णमासस्थालीपाकेन कर्मणा श्रीपरमेश्वरः प्रीयतां॥ यस्य स्मृत्या च नामोक्त्या तपो यज्ञः क्रि

अ० प०
३६

यादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणा
देव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ इति स्थालीपाकप्रयोगः ॥ अथेष्टि
प्रायश्चित्तानि ॥ प्रतिपद्यप्रविष्टायां यदि त्विष्टिः समाप्यते । पुनः प्रणीय कृच्छ्रेष्टिः कर्त्तव्या याग
वित्तमैः ॥ प्रमादाद्यदन्याग्नौ पत्नी स्वयं यजेत स्वाग्नौ वान्यो वा यजेत चेत्तदा प्रायश्चित्तं पथिकृच्चरुं हो
मं कृत्वा पुनस्तमीयादि तिथिषु अन्वाधानपूर्वकमिष्टिं कुर्यात् ॥ अथातिपन्नेष्टिप्रयोगः ॥ अन्वा
ध्याधानात्पूर्वं चेत् स्त्री रजस्वला भवति तदा पंचमादि दिवसे सद्यस्काला न्वाधानपूर्वकं जुहु
यात् ॥ अन्वाधानस्य रते रजस्वला चेत् सांग्रहांतरो स्थापयित्वा प्रतिपद्येव जुहुयात् ॥ स

श्री
३६

तकादिनेष्टिं कुर्यात् ॥ ता न स्वप्यातिक्रमे अं न्वानरे पर्व णि पथिकृद्यागपूर्वकमतिपन्नयागं
कृत्वा तत्पर्वणो न्वाधानं कुर्यादिति ॥ अथ चंद्रग्रहणे शौनक आह ॥ तद्यथा ॥ इष्टिदिने हवि
रासादनांते कृते अन्वाधाने ष्टिमध्ये चंद्रग्रहणजनितवैगुण्यपरिहारार्थं शौनकोक्ताभा
ज्याहुतिमुपस्थानं चाहं करिष्ये ॥ इति संकल्प्य ॥ अत्राह गोरित्यस्य राहूगणो गोतमश्चंद्र
मा गायत्री इष्टिमध्ये चंद्रग्रहणवैगुण्यपरिहारार्थमाज्यहोमे वि० ॥ ॐ अत्राह गोरमन्वत ना
म त्वष्टुरपीच्यं ॥ इत्था चंद्रमसो गृहे स्वाहा चंद्रमस इदं ॥ नवो नव इत्यस्याः सूर्या सावित्री चंद्र
मास्त्रिष्टुप् ॥ चंद्रोपस्थाने विनियोगः ॥ ॐ नवो नवो भवति जायमानो ह्नां केतुरुषसामे

त्सगं॥भागंदेवेभ्यो विदधात्यायं प्रचंद्रमास्तिरतेदीर्घमायुः॥सूर्यग्रहणेतुसंकल्पादौ चंद्रपद
स्थानेसूर्यपदेप्रयोक्तव्यं॥उद्वयमितित्यस्याःप्रस्कण्वः सूर्योनुष्टुप्॥उद्वयंतमसस्परि०॥उत्त
रं॥देवंदेवत्रासूर्यम०॥रुत्तमंस्वाहासूर्यायेदं०॥चित्रमित्यस्य कुत्सः सूर्यस्त्रिष्टुप्सूर्योपस्थाने
विनियोगः॥चित्रंदेवामुद०नस्युषश्च॥इतिश्रिमध्येग्रहणेनिर्णयः॥अथाग्न्यनुगतप्रायश्चित्त
विधिः॥आचम्यप्राणानायम्यदेशकालौसंकीर्त्यानुगतप्रायश्चित्तंकरिष्येउपलिपादिश्रोत्रि
यांगारात्स्वगृहाद्वाग्निंप्रतिष्ठाप्याज्योत्पवनादिकृत्वा॥अयाश्चेत्यस्यमंत्रस्यविमदऋषिः॥अ
याअग्निर्देवतापंक्तिःछंदः॥अनुगताग्निप्रायश्चित्ताज्यहोमेविनियोगः॥अयाश्चाग्नेस्य०॥

श्री

मेषजंस्वाहाअग्नेयअयासइदं॥भूर्भुवःस्वःस्वाहाप्रजापतयइदं॥परिसमूहनादिस
र्वंकुर्यात्॥सायंवाप्रातर्वाहोमंकुर्यात्॥इतिअनुगतप्रायश्चित्तं॥अथप्रसंगात्॥
अत्रैवनैमित्तिकप्रायश्चित्तान्युच्यंते॥अत्रकारिका॥अर्वाक्शम्यापरासात्तु
वहिस्यपतनाद्भुतं॥प्रायश्चित्तसमाप्त्यंतंसमर्थोजीवितुंयदि॥इदंतएकंपरउत्तएकंतृ
तीयेनज्योतिषासंविशस्व॥संवेशनेतन्व१श्चारुरेधिप्रियोदेवानांपरमेजनित्रे॥स्व
स्वस्थानेग्निंप्रक्षिपेत्पुनः॥आज्याहुतीश्चजुहुयात्॥व्याहृत्यारव्येश्चपूर्ववत्॥शम्या
षट्त्रिंशदंगुलेत्यापस्तंबः॥तदुक्तंकारिकायां॥अतिक्रांतोयदाशम्यापरासमन

अ० प्र०

३८

लो भवेत्॥ चरुः पार्थिकृत्तः कार्यः पूर्णाहुतिमथापि वा॥ पूर्णाहुतिलक्षणं कारिकायामुक्तं।
आज्यं द्वादश कृत्वस्तु गृहीत्वा परस्येत्स्रुचं॥ तया याज्याहुतिः कार्या सा पूर्णाहुतिरिष्यते।
स्रुव पूर्णाहुतिर्वा स्यादित्येके याज्ञिका विदुः॥ यद्यग्निः स्वयं ज्वलति तदा॥ उद्दीप्यस्व
जातवेदोपघ्नं निर्ऋतिं मम॥ पशूंश्च मह्यमावह जीवनं च दिशो दिश॥ मा नो हिं-
सीज्जातवेदो गामश्वं पुरुषं जगत्॥ अबिभ्रदग्न आगहि श्रिया मा परिपातयेतिमं
त्राभ्यामभि हूयमभ्या वदध्यात्। अग्ने अमलं त्वाघुपघाते। पुनस्त्वादित्या रुद्रा
वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथयज्ञैः॥ घृतेन त्वं तन्वो वर्द्धयस्व सत्याः

श्री

३८

संतु यजमानस्य कामाः॥ समिधमादध्यात्॥ अथ स्कन्नप्रायश्चित्तं॥ ओं देवांजनमगन्यज्ञ
स्तस्य माशीरवतु वर्द्धतां॥ भूतिर्घृतेन मुंचतु यज्ञो यज्ञपतिमंहसः॥ भूपतये स्वाहा॥ भुवनपत
ये स्वाहा॥ भूतानां पतये स्वाहा॥ यज्ञस्य त्वा प्रमयोन्मयाभिमया प्रतिमयात्॥ इत्यनेन ताम
भिमृश्य। ओं द्रप्सश्चस्कंद प्रथमां अनुद्यूनिमं च योनिमनु यश्च पूर्वः। समानं योनिमनु संचरं
तं द्रप्सं जुहोम्यनु सप्त होत्राः स्वाहा। स्कंदायेदं०। भूर्भुवस्वः स्वाहा। प्रजापतय इदं०। तत
स्कन्नमनले क्षिपेत्॥ अत्र कारिका॥ आहुतिर्हूयमाना तु बहिः स्कन्दे तदैव यदा। देवांजनमगन्य
ज्ञइत्येनेनाभिमृश्य तां। द्रप्सश्च इत्याहुतिं तां च प्रक्षिपेदनले पुनः। देवांजनेति सर्वत्र स्कन्नं त्व

भिमृश्यतां॥ इध्मस्यैव त्याहुतिशेषेद्धविः होतव्याः व्याहृतिस्तत्र व्याहृत्याख्यैः समुच्चयेत्॥ यागात्प्रा
गन्वाधाननिर्वापादिषु ज्ञातो देवताव्युत्क्रमो यदा ज्ञातं स्तदा व्याहृतिभिर्हुत्वा विहितं देवतां यजेद्यथा
गात्पूर्वं देवताव्युत्क्रमे ज्ञाने तु व्याहृतिभिर्हुत्वा तं यागं नावर्त्तयेत्॥ यदा त्वप्रकृतिं कांचिद्देवतां यजे
त्। तदा व्याहृतिभिर्हुत्वा प्रकृतदेवतायै यागमावर्त्तयेत्॥ अत्र कारिका॥ प्राग्याव्युत्क्रमे ज्ञाते इदं कृत्वा
यजेत्तदा॥ अविज्ञातविपर्यासो विहितां देवतां स्मरन्॥ इष्टवांस्तत ऊर्ध्वं तु व्युत्क्रमापगमे सति॥ प्राय
श्चित्तमिदं कृत्वा यागं नावर्त्तयेत्तदा॥ यदा त्वमिति विहितां कांचिद्देवताभिष्टवांस्तदा॥ प्रायश्चित्तमि
दं कृत्वा यागं त्वावर्त्तयेत्क्वचं॥ इदं व्याहृतिहोमात्स्यं॥ अन्यान्यपि प्रायश्चित्तानि कारिकायां॥ पवि

त्रं पदि नश्येत्तत्स्थाने पवित्रवते चरुः॥ यदा हविरपक्वं स्यात्तदा तेनैव हविषा यजेत्॥ चतुःशरावमात्रं
तु पक्वे द्वीहि[illegible]भिरोदनं॥ भोजयेत्तेन चां[illegible]नेन चतुरो ब्राह्मणान् तथा॥ बहुदग्धमदग्धं वा किंचि
देव यथा हविः॥ श्लिष्टेन्न च्छा पुनर्यागस्यादारभ्यादि तस्तदा॥ कृत्स्नं दग्धं यदा तत्स्यात्तु न रूपाद
येद्धविः॥ स एव यागः कर्त्तव्यः पुनर्यागस्तु नेष्यते॥ मध्यात्पूर्वार्धतो वत्तं यदि दुष्टं हविर्भवेत्॥ त
स्यैव हविषो वद्येन्मध्यात्पूर्वार्द्धतः पुनः॥ इध्माधाने कृते दुष्टं प्रधानहविरत्र येत्॥ तत्स्थाने जु
हुयादाज्यमदुष्टं च जुहोत्यथ॥ एवं समाप्य च दुष्टं तदप्सु प्रक्षिपेत्पुनः॥ अन्वाधानादिको यागः
पुनः कर्त्तव्य एव तु॥ प्रागिध्माधानतो दुष्टं प्रधानविधिवत्तथा॥ तद्धविः पुनरुत्पाद्य पूर्ववत्त

त्समापयेत्॥ अंगानां चेद्विदुष्टं तद्वसुप्रक्षिपेत्पुनः॥ स्विष्टकृद्धविषो दोष आज्येनैव समापयेत्॥
प्रच्युते स्तुनखैः केशैः कीटैर्वा मेध्यसंभिभिः॥ घसास्टकृत्शुक्रमज्जास्थिमूत्रविट्मेदर्दूषके॥
श्लेष्मा धैरपि वीभत्सैर्दुष्टानि स्युर्हवींषि चेत्॥ भिन्नानि चैव सिक्तानि दुष्टानि स्युः क्षिपेज्जले।
पर्वण्यार्त्ताश्रुपाते न कुर्याद्भूतभृतं चरुं॥ पर्वणि व्रतलोपे तु कुर्याद्व्रातपते चरुं॥ समानतंत्रं कुर्वं
तिपार्वणेन तु कर्मणा॥ अकृताग्रयणोश्नीयान्नवान्नं यस्तु वै ततः॥ वैश्वानरायकर्त्तव्यश्चरु
पूर्णाहुतिस्तु वा॥ द्विषदन्नं यदा भुंक्ते तदाग्नेयश्चरुर्भवेत्॥ समारूढसमिन्नाशे पुनराधेयमि
ष्यते॥ श्रौतोक्तमविरोधन्यमन्यं तु शतस्विदं॥ प्रायश्चित्तविशेषस्य यत्रनोक्तो भवेद्विधिः॥

होतव्याज्याहुतिस्तत्र भूर्भुवः स्वरितीहतु॥ निमित्तानंतरं सर्वं प्रायश्चित्तं भवेदिह॥ प्रागेवोत्पद्यते दोष
आज्यसंस्कारतो यदि॥ प्रायश्चित्तं भवेदाज्यसंस्कारानंतरं यदा॥ व्युत्क्रमो देवतानां तु संकल्पा
दौ भवेद्यदि॥ मंत्राणां व्युत्क्रमस्तद्वद्धोमादौ तु भवेद्यदि॥ मद्यंध्यास्त्ववीर्द्धतश्चेति व्युत्क्रमास्य भवे
द्यदि॥ द्रव्याणां व्युत्क्रमस्यापि तथा निर्वपादिषु॥ यद्द्देवाऋचा वस्ताजुहुयात्तु स्रुवाहुतिं॥ य
न्मुख्यं स्वगृहे द्रव्यं होमकर्त्रे ददातितत्॥ यजमानस्तु जुहुयाद्धुत्वा भो वै स्रुवाहुतिं॥ कस्मैचि
द्ब्राह्मणायास्मिन्प्रक्षेद्द्रव्यं ददाति तत्॥ होतव्यैकाहुतिश्चात्र व्याहृत्यार्षैः समुच्चयात्॥ यत्र
यत्रस्व॰ कौले कर्मणां निकरणनिमित्तं प्रायश्चित्तमुक्तं तस्मिन्प्रायश्चित्ते नीतिकर्मकार्यं नवे

निमित्तभेदः॥ तदुक्तं कारिकायां॥ प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै॥ कार्यमित्येक आचार्या नेत्यन्ये च
विपश्चितः॥ कर्मसमाप्तिसमये यंगलोपे ज्ञाने ऽज्ञाते वा यांगलोपे प्रजापतिः॥ प्रायश्चित्तमाह॥ प्रमादा
त्कुर्वतां कर्म॥ादिति श्रुतिरिति॥ एवमन्यान्यपि प्रायश्चित्तानि ग्रंथांतरतो वगंतव्यानि॥ इति संक्षेपे
ण प्रायश्चित्तं॥ अथ परिभाषा॥ आज्येकद्रव्ये के होमे स्यात्तदाज्यपरिग्रहः॥ स्यात्तत्परिस्तरणं तत्र कृ
ताकृतमिति स्थितिः॥ नोच्चारयति यत्राज्यपदं कर्मसु सूत्रकृत्॥ अनादिष्टाज्यहोमेषु तत्र नित्यत्वा
परिस्तुतिः॥ सर्वस्मिन्पाकयज्ञेषु॥ आज्यभागौ कृताकृतौ॥ सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा कृताकृतः॥ ध
न्वंतरिमखे ब्रह्मा नित्यः॥ शूलगवे तथा॥ उद्देहोऽक्वचिन्नाम्ना क्वचिन्नाममंत्रेण सूत्रकृत्॥ नोभयं य

त्र तं नेष्ट नामधेयतः॥ नैकेकांचन पक्षो यं चौलादावाग्नेयो यदा॥ तदाग्निं रिंद्रस्वाधाहोतव्याइति
रत्तिकृत्॥ अनेकेयज्ञास्युरेकस्मिन्काल एकं वत्तु॥ समानतंत्रकाः कार्या नैनं त्रावृत्तिरिष्यते सादनं पा
त्रासादनमिध्मात आज्याधिश्रयणादि चा॥ स्रुगामादि मार्जनं चेध्मरज्जुप्रहरणं तथा॥ प्रणीतापात्रं भ
वेन्नित्यमाज्यस्योत्सवनं तथा॥ द्रव्यानादेश आज्यं स्यादनुक्ते साधने स्रुवः॥ जपानुमंत्रणोमंत्रउप
स्थानाऽभिमंत्रणे॥ मंत्रो यः कर्मकरणोग्रत्वकर्मणायु पांशुषट्॥ इदं कार्यमनेनेति न क्वचिद्दृश्यते विधिः॥
लिंगादेवमर्थत्वं येषां ते मंत्रसंज्ञकाः॥ मंत्रांते कर्मकर्तव्यं मंत्रकरणत्वतः॥ कर्मावृत्तौ तु मंत्रस्या
प्यावृत्तिर्गृह्यकर्मणि॥ मंत्रोक्तदेवतानां तु तद्धीमेवाऽभिर्वपेत्॥ चतुरश्चतुरो मुष्टीन्प्रोक्षणं च तथा

अ॰ प्र॰
४२

भवेत्॥ सहेवक्षपयेत्॥ तत्र नास्ति ध्युद्धरणं तथा॥ आदिष्टमंत्रहोमेषु सर्वत्रैवं प्रतीयतामिति॥ यत्र
स्यात्प्रत्यंचशं हस्तत्रैवं होमयिष्यते॥ क्रमगं तेतत्र होतव्यं स्वाहाकारं पठेन्नैततः॥ अथ प्रयोगमंत्रा
णां षड्विधं लक्षणं॥ जपानुमंत्रणाप्यायं नाभिमंत्रास्तथैव च॥ उपस्थानं कर्मकरणं षडुपांशु
प्रयोगतः॥ जपमुच्चारणं विधानात्फलार्थमपि तद्भवेत्॥ अर्थतः कार्यलाभश्चेदर्थ एव कृतो भवेत्॥
मंत्रमुच्चारयेन्नेव मंत्रार्थत्वेन संस्मरेत्॥ शिषिरणं तन्मनाभूत्वा स्यादेतदनुमंत्रणं॥ ए
तदेवाभिमंत्रस्य लक्षणं चेत्क्षणाधिकं॥ अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतं॥ उ
पस्थानं तदेव स्यात्प्रणतिस्थानसंयुतं॥ प्रोक्षकर्म यदेतेषु कर्मकाले क्रियेत तत्॥ कर्मणः

श्री
४२

करणं तस्य विहितार्थप्रकाशनं॥ मंत्रेण कृत्वा मंत्रांते क्रियते कर्म येषु तु॥ तथा॥ प्राजापत्यमुपां
शुः स्यान्मध्यमं सावित्रमेव च॥ कृताकृतं ब्रह्मवरणं ब्रह्मा चाज्यसंस्कृतिः॥ संमार्गे स्रुवद
र्व्योश्च आज्यगोभागोपरिस्तृतिः॥ व्रीहिणामेवघातश्च तंडुलेषु कृताकृतः॥ द्रवीभूतघृत
स्यापि विलापनविधिस्तथेति॥ विहितं कर्म पवित्रपाणिः कुर्वीत॥ यदाह हारीतः॥ जप
होमहरा ह्येते असुरादिव्यरूपिणः॥ पवित्रकृतहस्तस्य विद्रवंति दिशो दश॥ वक्तव्यं
वा स्वगृह्योक्तं यदत्कर्म प्रचोदितं॥ तस्यतावृति शास्त्रार्थे कृते सर्वं कृतो भवेत्॥ कर्म
विशेषेऽग्निनामानि॥ पावको लौकिको ह्यग्निः प्रथमः संप्रकीर्तितः॥ अग्निस्तु मारु

अ०प्र०
४३

नोनामगर्भाधानेविधीयते॥ततःपुंसवनेज्ञेयःपावमानःस्तथैवच॥सीमंतेमंगलोनाम
प्रबलोजातकर्मणि॥नाम्निवैपार्थिवोह्यग्निःप्राशनेतुशुचिस्मृतः॥सभ्योनामस
चौलेतुव्रतादेशेसमुद्भवः॥गोदानेसूर्यनामाग्निर्विवाहेयोजकोमतः॥आवस
थ्येद्विजोज्ञेयोवैश्वदेवेतुरुक्मकः॥प्रायश्चित्तेविटश्चैवपाकयज्ञेषुपावकः॥देवा
नांहव्यवाहश्चपितॄणांकव्यवाहनः॥शांतिकेवरदःप्रोक्तःपौष्टिकेबलवर्द्धनः॥पू
र्णाहुत्यांमृडोनामक्रोधोग्निरभिचारके॥वश्यार्थेकामदोनाम्नावनदाहेतुदूषकः॥
कुक्षौतुजठरोज्ञेयोक्रव्यादोमृतदाहने॥वह्निनामालक्षहोमेकोटिहोमेहुताशः

श्री
४३

गमनायच॥अनेनमंत्रेणविसर्ज्य॥इमांसोपस्करांभुवनेश्वरीप्रतिमांइंद्राणीइंद्रप्रतिमांग्रहपीठं
चतुभ्यमहंसंप्रददे॥आचार्यहस्तेप्रतिपाद्य॥कृतस्यसनवग्रहमखवरजोदर्शनशांतिकर्मणःसां
गतासिध्यर्थंभुवनेश्वरीप्रीत्यर्थंइंद्राणीइंद्रप्रीत्यर्थंग्रहप्रीत्यर्थंचप्रत्येकंत्रीन्द्वीन्ब्राह्मणान्
भोजयेत्॥कृतस्यसनवग्रहमखवरजोदर्शनशांतिकर्मणःसांगतासिध्यर्थंनानानामगोत्रे
भ्योब्राह्मणेभ्यःयथाशक्तिदक्षिणांयसीदक्षिणांदातुमहमुत्सृजे॥अग्निंसंपूज्य॥गच्छ
गच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर॥यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन॥इतिविसर्जयेत्॥
ततोमहाशांतिंपठेत्॥आनोभद्रावर्गद्वयंपठेत्॥स्वस्तिनोमिमीतेतिऋक्पंच५शंनइंद्राग्नी

नव३

अ॰ प्र॰
७६

मे॰ २५ सन्धिषिति ॥ अथ योरेका ॥१॥ महिष्ठीणामितिवर्गमेसर्वेषांशांतिपाठेवि॰ ॥ विप्राशिषोगृही
त्वा ॥ सुहृद्युतोभुंजीतेति ॥ एवं कृते सर्वारिष्टशांतिर्भवति ॥ ततः शुभकाले गर्भाधानं कुर्यात् ॥ प्र
भूतदोषोदोयदि दृश्यते तत्पुष्यं ततः शांतिकर्म कार्यं ॥ विसर्जयेदेवतं देक शय्यांपापद्र जोदर्श
नमिष्टकाले ॥ इतिज्योतिर्वसिष्ठेनोक्तः दुष्टरजोदर्शनशांतिः समाप्ता ॥ अथ चंद्रसूर्योपरागका
ले प्रथमरजोदर्शनशांतिविशेष उच्यते ॥ अथ प्रयोगः ॥ आचम्य प्राणायम्य देशकालौ स्मृत्वा मम
पत्न्याश्चंद्रोपरागे प्रथमरजोदर्शने सूचितारिष्टसकनिरासनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सनव
ग्रहमखां शांतिं करिष्ये ॥ सूर्योपरागे प्रथमेत्यादि वदेत् ॥ ततः आचार्यः ॥ शुचिदेशे गोमये

श्री
७६

नोपलिप्यतत्रपंचवर्णरजोभिरष्टदलं पद्मं कृत्वा तदुपरि नवं श्वेतवस्त्रं नुदग्दशं संस्थाप्य यथाशक्ति
रजतनिर्मितां चंद्रप्रतिमां आप्यायस्वेति संस्थाप्य चंद्रमावाहयामि ॥ सूर्यग्रहे तु यथाशक्ति
सुवर्णनिर्मितां आकृष्णेनेति मंत्रेण सूर्यमावाहयामीति स्थापयेत् ॥ ततो यथाशक्ति सीसनि
र्मितां राहुप्रतिमां ॥ स्वर्भानोरध्विराहुवनुष्टुप् ॥ राहावा॰ ॥ स्वर्भानोरधयदिंद्रमायाअवोदि
वोवर्तमाअवाहन् ॥ गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविंदद्त्रिः ॥ राहो इहागच्छ इ
हतिष्ठ राहवे॰ राहुं॰ ॥ तद्दक्षिणेतः स्थापयेत् ॥ ततो यस्मिन्नक्षत्रे ग्रहणं तन्नक्षत्रदेवताप्रतिमां य
थाशक्ति सुवर्णनिर्मितां तत्तन्मंत्रैर्वा नाममंत्रैः ॥ ॐ अश्विनावाहयामि नमः इति ॐ प्रणवा

दिनमोंतैः स्थापयेत्॥ मंत्रास्तत्प्रस्तंवानां मंत्रैवाक्यानीति प्रसिद्धाः॥ नामानितु॥ अश्विनौ १
यमः २ अग्निः ३ प्रजापतिः ४ सोमः ५ रुद्रः ६ अदितिः ७ बृहस्पतिः ८ सर्पाः ९ पितरः १० भगः ११
अर्यमा १२ सविता १३ त्वष्टा १४ वायुः १५ इंद्राग्नी १६ मित्रः १७ इंद्रः १८ निर्ऋतिः १९ आपः २०
विश्वेदेवाः २१ विष्णुः २२ वसवः २३ वरुणः २४ अजैकपात् २५ अहिर्बुध्न्यः २६ पूषेति २७॥ एवं
देवतात्रयमावाहैर्भिर्वमंत्रैः षोडशोपचारैः पूजयेत्॥ ततश्चंद्रादीन्श्वेतवस्त्रादिगंधमा

ल्यादिभिः पूजयेत्॥ सूर्यायरक्तचंदनरक्तवस्त्ररक्ताक्षतकरवीरपुष्पादिभिः॥ राहवेकृष्णा
नि॥ नक्षत्रदेवताभ्यः श्वेतानि॥ ततः पश्चिमतोग्निंग्रहांश्चप्रतिष्ठाप्य आवाहनपूर्वंसंपू

ज्यान्वाधानंकुर्यात्॥ यथा॥ ईद्सन्निधेग्रहीता चक्षुषी आज्येनेत्यंतमुक्त्वानवग्रहान्उद्दिश्याष्टाष्टा
विंशत्यन्यतमाष्टसंख्यामुद्दिश्यचंद्रममुकसंख्याभिः पलाशसमिदाज्यचरुतिलाहुतिभिः॥ राहुंअ
मुकसंख्याकाभिः दूर्वाज्यचरुतिलाहुतिभिः॥ नक्षत्रदेवता अमुकसंख्यापलाशसमिदाज्यचरु
तिलाहुतिभिर्यक्ष्ये॥ सूर्यग्रहेतु चंद्रस्थाने सूर्यममुकसंख्यया अर्कसमिदाज्यचरुतिलाहुतिभि
रितिवदेत्॥ शेषेण स्विष्टकृतमित्याद्युक्त्वा जुहुयात्॥ एवमन्वाधाय प्रणीताप्रणयनांतंकृत्वा त्रिर्भ्यो
मुष्मैत्वेति चतुरश्चतुरोमुष्टीन्निरूप्य चरुंश्रप[illegible]यित्वाज्यभागांतं कुर्यात्॥ ततोयजमानोदक्षि[illegible]
णतोदेवतामुद्दिश्य त्यजेत्॥ ततो अन्वाधानक्रमेण जुहुयुः॥ तत्रतिसृणां दूर्वाणामेकैकाहुतिभिः

अ० प्र०
७५

समिधश्चत्रिमध्वक्ताः कार्याः ॥ ततः स्विष्टकृतादि पूर्णाहुत्यंतं प्राग्वत् ॥ ततः आचार्यः ॥ एकस्मिन्कल
शे जलपूर्णे पंचगव्यानि पंचपल्लवसर्वौषधिकल्कं दूर्वाकुशांश्च निक्षिप्य सान्वृत्विक् दंपती पूर्ववदभिषिंचे
देतैर्मंत्रैः ॥ आपोहिष्ठा० ३ ॥ इमं मे गंगे० १ ॥ तत्वायामि० १ ॥ अन्येपि समुद्रज्येष्ठा इत्यादयः ॥ सुरास्त्वा
इत्यादयः ॥ पौराणमंत्राश्च ॥ ततः स्नानं दक्षिणादानं प्रतिमादानादि पूर्ववत् ॥ यदा तु पूर्वं शांतिसमु
च्चयस्तदा कालेकाले चैवं क्याद्याग्नेयादिवतंत्र प्रयोगः ॥ ततो यजमानो देशकालौ स्मृत्वा मम पत्न्याः
प्रथमरजोदर्शनेऽमुकदुर्मासतिथ्यादि अमुकग्रहणसूचितेत्यादि संकल्प्याल्प्य ऋत्विक्पूजांतं
विदध्यात् ॥ ततः आचार्यो भुवनेश्वर्यादि पूजांतः प्राक्प्रश्नात् ॥ ततः उदीच्यां चंद्रादीन्सपूज्य

श्री
७५

यथोक्तमंत्रैर्निर्वापहोमाभिषेकान्कुर्यादिति विशेषः ॥ अन्यत्सर्वं समानं ॥ इति ग्रहणरजोदर्शनशांतिः ॥
अश्विनावर्त्तिः कुत्सोश्विनावुष्णिक् ॥ अश्व्यावा० ॥ अश्विनावर्त्तिरश्विना गोमद्दस्रा हिरण्यवत् ॥ अ
र्वाग्रथं समनसा नियच्छतं ॥ १ ॥ यमाय सोमं यमो यमोनुष्टुप् ॥ यमाव्या० ॥ यमाय सोमं सुनुत० ॥ २ ॥
अग्निं कण्वो मेधातिथिरग्निर्गायत्री ॥ अग्न्यावा० ॥ अग्निं दूतं वृणीमहे० ॥ ३ ॥ प्रजापते हिरण्य
गर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापते हिरण्यगर्भः प्रत्यावा० ॥ प्रजापते० ४ ॥ आप्यायस्व गौतमः सो
मो गायत्री ॥ सोमावा० ॥ आप्यायस्व० ॥ ५ ॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् ॥ रुद्रावाह० ॥ त्र्यंबकं यजाम
हे० ॥ ६ ॥ अदितिर्धौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः ॥ विश्वेदेवा अदितिः पंचजना

अ०प्र०
७६

अदितिर्जातमदितिर्जनित्वं ॥ बृहस्पतेगृत्समदो बृहस्पतिस्त्रिष्टुप् ॥ बृहस्पत्यावाहने वि० ॥ बृहस्प
ते० ॥८॥ आयंगौः सार्पराज्ञी सर्पा गायत्री ॥ सर्पावाहने० ॥ आयंगौः ॥९॥ उदीरतां शंख पितरस्त्रिष्टु
प् ॥ पितृनावाने० ॥ ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ॥ असुं य ईयुरवृका ऋत
ज्ञास्ते नो भवंतु पितरो हवेषु ॥ ॐ भग एव भगवां अस्तु देवास्तेन वयं भगवंतः स्याम ॥ तं त्वा भग सर्व
इज्जोहवीति स नो भग पुर एता भवेह ॥११॥ ॐ अर्यमाणो अदितिर्यज्ञियासोदब्धानि वरुणस्य
व्रतानि ॥ युयोतनो अनपत्यानि गंतोः प्रजावां नः पशुमां अस्तु गातुः ॥१२॥ उदुत्यं काण्वः प्रस्क
ण्वो ग्निर्नैर्गायत्री ॥ सवितावा ॥ उदुत्यं जातवेदसं० ॥१३॥ ॐ त्वष्टारं वायुरभवीय ओ हतेदेव्या

श्री
७६

णा ॥ इंद्रश्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप् ॥ अंसावभिमर्शने वि० ॥ इंद्रश्रेष्ठानि० ॥ अस्मे प्रयंधि विश्वा
मित्र इंद्रस्त्रिष्टुप् ॥ अंसावभिमर्शने वि० ॥ अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य
भूरेः ॥ अस्मे शतं शरदो जीवसे धा अस्मे वीरांछश्वत इंद्र शिप्रिन् ॥ इति मं[illegible]भ्यां [illegible]भिमर्शः ॥
ततो रक्षायुषोरभिवृध्यर्थं ॥ अंगादंगात्संभवसि हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि स
जीव शरदः शतं इति मंत्रमुच्चार्य मूर्धानं त्रिराजिघ्रेत् ॥ ततः शिशोः करिष्यमाणनाम तद्वैवस्मरे
त् ॥ ततः यथाचारं हिरण्योदकेन मातुर्दक्षिणस्तनं प्रक्षाल्य ॥ ॐ इमं कुमारो जरां धयतु दीर्घ
मायुः प्रजीवसे ॥ अस्यै स्तनौ प्रभुंजाना आयुर्वर्चो यशो बलं इति मंत्रेण मात्रा कुमारं पाययि

अ०प्र०
८६

त्वा॥ ततो जन्मलग्नेदुष्टस्थानग्रहपीडानिवृत्त्यर्थं अनेन पूगीफलेन त्वामहं वृणे॥ यथाशक्ति जपं कारये
त्॥ ततः कृतस्य जातकर्मणः सांगतासिध्यर्थं यथाशक्तिभूयसीं दक्षिणां दातुमहमुत्सृजे॥ ब्राह्मणैः आ
शिषो वाचयेत्॥ ते च॥ तमवैंतमिति पंचभिः आशिषः॥ तमवैंतं नसोनूसिमरूपं न दिवः शिशुं॥ मर्मृज्यंते
दिवे दिवे॥ बोधुघं न्माहरिभ्यां कुमारः सीहदेव्यः॥ अघ्रान हतउदरं॥ उत त्यायजत्राहरीकुमारात्सोह
देव्यात्॥ प्रयता सुघओं ददे॥ एम वां देवाविश्विनाकुमारः सीहदेव्यः॥ दीर्घायुरस्तु सोमकः॥ तं युवं दे
वावश्विना कुमारं सोहदेव्यं॥ दीर्घायुषं कृणोतन॥ २॥ सुहस्त्राक्षेण शतशारदेन शतायुषा हविषाहो
र्षमेनं॥ शतं यथेमं शारदो नयातीन्द्रो विश्वस्य दुरितस्य पारं॥ शतं जीव शरदो वर्धमानः शतं हेमंता

श्री
८६

न्छतमु वसंतान्॥ शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ आहार्षं त्वाविदं त्वा पुन
रागाः पुनर्नव॥ सर्वांग सर्वं ते चक्षुः सर्वमायुश्च ते विदं॥ सर्वस्यां स्ये सर्वस्य जिस्तैस सर्वमुवते नाप्नोति
सर्वं जयति॥ कुमार्याश्चेत् ज्ञातकर्मामंत्रकं कार्यं॥ रात्रौ संध्यायां ग्रहणे जाताशौचांतरमध्येपीदं का
र्यं॥ मृताशौचमध्ये जाता श्चेत्तदेवाशौचांते वा कार्यं॥ पितरि ग्रामांतरे गतेपि पितृव्यादि गोत्रजो ज्येष्ठक्र
मेणेदं कुर्यात्॥ इति जातकर्म॥ अथ रात्रिसूक्तं॥ सुमुरव श्चेत्यादि देशकालौ स्मृत्वा अस्याः सूतिकायाः
बालकस्य सर्वारिष्टशांत्यर्थं रात्रिदेवताप्रीत्यर्थं रात्रिसूक्तपठनमहं करिष्ये॥ ॐ रात्री व्यख्यदायती पु
रुत्रा देव्य १ क्षभिः॥ विश्वा अधि श्रियोधित॥ ओर्वप्रा अमर्त्या [illegible] वतो देव्यु १ द्वतः॥ ज्योतिषा बाधते तमः॥

नि १

॥ १ ॥

अ०प्र०

८७

श्र२

निरुस्वसारमस्कृतोषसंदेव्यायती॥ अपेदुहासतेतमः॥ सानो अद्ययस्यावयंनितेयामंनविक्ष्महि॥ वृ
क्षेनवसतिंवयः॥ निग्रामासो अविक्षंतनिपद्वंतोनिपक्षिणः॥ निश्येनासश्चिदर्थिनः॥ यावयावृक्यं वृ
कं यवयस्तेनमूर्म्ये॥ अथानः सुतराभव॥ उपमापेपिशत्तमः कृष्णं व्यक्तमस्थित॥ उषऋणेवया
तया॥ उपतेगाइवाकरं वृणीष्वदुहितर्दिवः॥ रात्रिस्तोमं नजिग्युषे॥ १॥ आरात्रिपार्थिवंरजः पितु
रप्रायुधामभिः॥ दिवः सदांसि बृहती वितिष्ठस आत्वेषं वर्त्तते तमः॥ ये ते रात्रि नृचक्षसो युक्तासो न
वतिर्नव॥ अशीतिः संत्वष्टाउतो ते सप्तसप्ततीः॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशनीं॥ भद्रां भग
वतीं कृष्णां विश्वस्य जगतो निशां॥ संवेशनीं संयमनीं ग्रहनक्षत्रमालिनीं॥ प्रपन्नोहं शिवां रात्रीं भद्रे

श्री

८७

॥ ३८

पारमशीमहि भद्रे पारमशीमह्यों नमः॥ ३॥ स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियां॥ सहस्रसंमितां दु
र्गां जातवेदसे सुनवाम सोमं॥ शांत्यर्थं तद्द्विजातीनामृषिभिः सोमपाश्रिता॥ ऋग्वेदे त्वं समुत्पन्नारा
तीयतो निर्दहाति वेदः॥ ये त्वां देवि प्रपद्यंति ब्राह्मणा हव्यवाहनीं॥ अविद्या बहुविद्या वा स नः पर्षदति
दुर्गाणि विश्वा॥ ये अग्निवर्णां शुभां सौम्यां कीर्तयिष्यंति ये द्विजाः॥ तां तारयति दुर्गाणि नावेव सिंधुंदु
रितात्यग्निः॥ ३॥ दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे॥ अग्निचौरनिपातेषु दुष्टग्रहनिवारणे॥ दुर्गेषु विषमेषु
त्वं संग्रामेषु वनेषु च॥ मोहयित्वा प्रपद्यंते तेषां मे अभयं कुरु तेषां मे अभयं कुरु॥ केशिनी सर्वभूतानां पं
चमीति च नाम च॥ सा मां समा निशा देवी सर्वतः परिरक्षतु सर्वतः परिरक्षत्वों नमः॥ तामग्निवर्णां त

पसाज्वलंतीविरो चुनीकुर्मफलेषु जुष्टां॥ दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः सुतरसि तरसे
नमः॥ दुर्गा दुर्गेषु स्थानेषु शं नो देवीरभिष्टये॥ य इमं दुर्गास्तवं पुण्यं रात्रौ रात्रौ सदा पठेत्॥ रात्रिः कुशि
कसौभरो रात्रिस्तपो गायत्री॥ रात्रीसूक्तं जपेन्नित्यं तत्काल उपपद्यते॥ उलूकयातुं शुशुलूकयातुं ज
हि श्वयातुमुत कोकयातुं॥ सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इंद्र॥ पिशंगभृष्टिमंभृणं पिशा
चमिंद्र संमृण॥ सर्वं रक्षो निबर्हय॥ यत इंद्र भयामहे ततो नो अभयं कृधि॥ मघवञ्छग्धि तव त्वं न ऊतिभि
र्विद्विषो विमृधो जहि॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेंद्रः पुर एतु नः सोमपा अभयं
करः॥ ५॥ हिमस्य त्वा जरायुणा शाले परिव्ययामसि॥ उत ह्रदो हि नो भुवोऽग्निर्ददातु भेषजं॥ शीतह्र

दो हि नो भुवोऽग्निर्ददातु भेषजं॥ अंतिकामग्निमजनं दूर्वादः शिशुरागमत्॥ अजातपुत्रपक्षाया
हृदयं मम दूयते॥ विपुलं बलं ब्रह्मा काशुंचरजातवेदः कामाय॥ मां चरक्षपुत्रांश्च शरणं मम त्वं॥
पिंगाक्षलोहितग्रीव कृष्णवर्ण नमोऽस्तु ते॥ अस्यां नि वर्हणस्येनां सागरस्योर्मयो यथा॥ इंद्रः क्षत्रं
ददातु वरुणमभिषिंचतु॥ शत्रवो धिनिघनं यांतु जयस्त्वं भवतात्मसा॥ ६॥ कपिलजटीसर्वभक्षं
चाग्निं प्रत्यक्षदेवतं॥ वरुणं च वशांत्यग्ने मम पुत्रांश्च रक्षतु मम पुत्रांश्च रक्षत्वां नमः॥ सार्ग्यं वर्ष
शतं जीवपिव खाद च मोद च॥ दुःखितां तद्द्विजांश्चैव प्रजां च पशुपालय॥ यावदादित्यस्तपति या
वद्भ्राजति चंद्रमाः॥ यावद्वायुः प्रवायंति तावज्जीव जया जया॥ येन केन प्रकारेण कोवैनाम्नुजी

"३"

अ० प्र०
९९

वंति॥ परेषामुपकारार्थं यज्जीवति स जीवति॥ एतां वैश्वानरं सर्वदेवं नमोस्तुते॥ ॥ अघाघाश्वघं
दुत्रास्वपुरे चनः॥ विश्वांच नोजरिताद्र्न्सतपते अहार्दिवानक्तं चरक्षिषः॥ प्रभुंगी श्रूरोमु घवांतु वीम
घः संमिश्लो वीर्यायकं॥ उभाते बाहू वृषणा शतक्रतो नियावज्रंमिमिक्षतु॥ ९॥ स्वप्नः स्वप्नाधिक
रणे सर्वं निषा प्रयाजनं॥ आस्यर्थमन्या स्वापय घ्नू ५ न्हं जाग्यादहं॥ अजगरो नाम सर्पः स
र्पिर विषो महान्॥ तस्मिन् हि सर्पः सुधिनस्ते नेला स्वापयामसि॥ सर्पः सर्पो अजगरः सर्पिर
विषो महान्॥ मस्यश्रुष्का लिसंधवस्तस्य गाधमशीमहि॥ कालिको नाम सर्पो नवनाग सहस्रब
लः॥ यमुनाहृदे हसो जातो यो नारायणवाहनः॥ यदि कालिक दूतस्य यदि कोः कालिकाद्

औ
९९

"४"

यं॥ जन्मभूमिपरिक्रांतो निर्विषो याति कालिकः॥ आयाहींद्र पथिभिरीळितेभिर्यज्ञमिमंनोभाग
धेयं जुषस्व॥ तृप्तां जहुर्मातुकस्येवयोषा भागस्ते पैतृष्वसेयी वपामिव॥ यशस्करं बलवंतं प्रभुत्वं त
मेव राजाधिपतिर्बभूव॥ संकीर्णनागाश्वपतिर्नराणां सुमंगल्यं सततं दीर्घमायुः॥ कर्कोटको
नाम सर्पो यो दृष्टीविष उच्यते॥ तस्य सर्पस्य सर्पत्वं तस्मै सर्प नमोस्तुते॥ ८॥ मा विभेर्न मरिष्य
सि परिखापामि सर्वतः॥ घुनेन हन्मि वृश्चिकं महं दंडेनागतं॥ आदित्यरथवेगेन विष्णुबाहुबलेन
च॥ गरुडपक्षनिपातेन भूमिंगच्छ महायशाः॥ गरुडस्य जातमात्रेण त्रयो लोकाः प्रकंपिताः॥
प्रकंपिता मही सर्वा सशैलवनकानना॥ गगनं नष्टचंद्रार्कं ज्योतिषं न प्रकाशते॥ देवता[illegible]भयभी

॥ १८॥

अं० प्र०
६
१००

नाश्रमारुतोनह्रवायतिमारुतोनह्रवायवेनमः॥भोसर्पभद्रभद्रंते दूरंगच्छमहायशाः॥जनमे
जयस्ययज्ञांतेआस्तीकवचनंस्मर॥आस्तीकवचनंश्रुत्वायःसर्पोननिवर्त्तते॥शतधा भि
द्यतेमूर्ध्निशिंशवृक्षफलंयथा॥१०॥योजरत्कारणाजातोजरत्कंन्यांमहायशाः॥तस्यसर्पाप
भद्रंते दूरंगच्छमहायशाः॥असितंचार्थसिद्धिंचसुनीतिंचापियस्मरेत॥दिवावायदिवारात्रौ
नास्तिसर्पभयंहरेत॥अगस्तिर्माधवश्चैवमुचुकुंदोमहामुनिः॥कपिलोमुनिरास्तीकःपंचैतेस्
खशायिनः॥नर्मदायैनमः प्रातर्नर्मदायैनमोनिशि॥नमोस्तुनर्मदे तुभ्यंत्राहिमांविष
सर्पतः॥११॥गणानांत्वागणपतिं०१॥दुर्गेचिनःसुगंकृधिगणानइंद्रगिर्वणः॥त्वंचमघ

श्री
१००

॥ १८॥

इष्टदेवताकुलदेवताग्रामदेवताःपूजांविधायषोडशमातृकानाबाल्यपूजयेत॥ॐमातरःसर्वभूतानां
सर्वकल्याणहेतवः॥पूजिताभक्तितःसर्वारक्षध्वंममबालकं॥ततःषष्ठीकृत्तिकापूजा॥शिवासंभू
तिर्नामाचप्रीतिःसंततिरेवच॥अनुसूयाक्षमाचैवषडेताःकृत्तिकामताः॥शिवायैनमइत्यादिप्रत्ये
कंपूजयेत॥ततःकार्त्तिकेयंपूजयेत॥ॐकार्त्तिकेयमहाबाहोगौरीहृदयनंदन॥कुमारंरक्षमेदे
वकार्त्तिकेयनमोस्तुते॥खड्गपूजा॥असिर्विशसनःखड्गःशत्रूणांप्राणहारकः॥तीक्ष्णधाराय
शुद्धायतस्मैखड्गायतेनमः॥ततःशंखपूजा॥पुण्यस्त्वंसर्वपुण्यानांमंगलानांचमंगलं॥विष्णुना
विधृतोसित्वमतःशांतिंप्रयच्छमे॥ततोमंथपूजा॥मंथानमंदरोसित्वंमथितःसागरस्त्वया॥अतोम

न१

श्री

अ० प्र०
१०७

मापिपुत्रस्यमंथविघ्नंनमोस्तुते॥ततोविष्णुपूजा॥त्रैलोक्यपूजितःश्रीमान्सदा जनार्दन॥शांतिंकुरु
गदापाणेनारायणनमोस्तुते॥ततोप्रतिमाअग्न्युत्तारणपूर्वकंमहाषष्ठीपूजयेत्॥ॐकारेणप्राणाया
मंकृत्वा॥ॐषांहृदयायनमः॥ॐषींशिरसेस्वाहा॥ॐषूंशिखायैवषट्॥ॐषैंकवचायहुं॥ॐषौंनेत्रत्र
यायवौषट्॥ॐषःअस्त्रायफट्॥इतिन्यासंविधायध्यायेत्॥स्फुरत्सभासनांदेवीमर्द्धभासनेस्थि
तां॥सर्वालंकारशोभाढ्यांपीनोन्नतपयोधरां॥सदान्वितेश्रवृंती चपीतकौशेयवाससं॥चतुर्भुजांद
क्षिणेनस्थूलंदंडंचविभ्रतीं॥वामेचोर्ध्वहस्तेनघतनीलोत्पलंशुभां॥वामदक्षिणहस्ताभ्यांगृहीतवि
विधायुधां॥इतिध्यानं॥ततोमहाषष्ठींपूजयेत्॥ॐआयाहिवरदेदेविमहाषष्ठीतिविश्रुते॥शक्तिभि

न्२
वी१

वि१
ते
श्री
भी १०७

रक्षमेपुत्रंमहाषष्ठीनमोस्तुते॥महाषष्ठीइहागच्छइहतिष्ठेति॥ततःपूजयेत्॥ॐजयदेविजगन्मात
र्जगदानंदकारिणी॥प्रसीदजयकल्याणिनमस्तेदेविषष्ठिके॥षष्ठिदेविमहासत्वेसर्वेषांचसुतप्रदे॥वर
देत्वत्प्रसादेनचिरंजीवतुवालकः॥इतिसंपूज्य॥नैवेद्यंपरिकल्पयेत्॥एतानिगंधपुष्पधूपदीपनैवेद्यानि
पक्वान्नपायसपोलिकापिष्टकंलोपनीतानैवेद्यघृतांवलादीनिपूजितसमस्तदेवतासहितभगवत्यैषष्ठिका
यैमयोत्सृष्टानि॥इदंप्रत्याचमनीयं॥समस्तदेवतासहितमहाषष्ठ्यैनमः॥सवल्कलंपूगीफलंइदंतेषष्ठि
देविके॥नवजातस्यवालस्यददास्यायुष्यवर्द्धये॥अथप्रणामः॥देवतानांमुषीणांचभक्तानांभक्तवत्स
ले॥इमंचरक्षमेपुत्रंषष्ठीदेविनमोस्तुते॥अथवालसमर्पणं॥ॐगौर्याःपुत्रोयथास्कंदःशिशुःसंरक्ष

फ
नि
वि१

अं०प्र०
१०८

नस्त्वया॥ तथा ममाप्ययं बालो रक्षतां षष्ठिके नमः॥ षष्ठिदेवि नमस्तुभ्यं सूतिकागृहशायिनी॥ पूजिता
सि परं भक्त्या सबालं रक्ष मातरं॥ यमनी सर्वभूतानां वर्द्धनी धनसंपदां॥ बोधिनी सर्वविद्यानां जन्मदे त्वां न
तावयं॥ जननी सर्वलोकानां बालानां च विशेषतः॥ नारायणी स्वरूपेण सुतं मे रक्ष सर्वतः॥ शक्तिस्त्वं
सर्वदेवानां बालानां हितकारिणी॥ मातेव रक्ष मे पुत्रं महाषष्ठी नमोस्तु ते॥ रुद्राणी रुद्ररूपेण सर्वविघ्न
विनाशनी॥ प्राणदे बलदे देवि रक्ष बालं शुभं भव॥ अमुं मम कुलोत्पन्नं रक्ष त्वमिह बालकं॥ रक्षोभूतपि
शाचेभ्यो ▮किनीयोगिनीषु च॥ मातेव रक्ष मे बालं स्वापदं पन्नगेषु च॥ त्वमेवैव सर्वदेवी ब्रह्माणी चैव
वस्थिता॥ रुद्रशक्तिः समाख्याता महाषष्ठि नमोस्तु ते॥ धात्री त्वं कार्त्तिके यस्य महाषष्ठीति विश्रु

षष्ठी
श्री
१०८

ते॥ त्वत्प्रसादाद्देवि विघ्नैर्न चिरं जीवतु बालकः॥ ततो भस्मो बालं प्रतिष्ठाप्य मार्जयेत्॥ वल्लेन येन विध्वस्तं
शैलशृंगसमुच्छ्रितं॥ कृष्णेनैकेन हस्तेन तत्त्वं स्यात्स्वस्तितो मम॥ शांतिरस्तु शिवं चास्तु प्रण्यस्य त
शुभं च यत्॥ यतः समागतं चायं तत्रैव प्रतिगच्छतु॥ ततः कार्त्तिकेयप्रार्थना॥ चंद्रार्कयोर्दिगीशा
नां यमस्य च भवस्य च॥ निक्षेपमिव मंथानं तेमे रक्षंतु बालकं॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रावथा
पिवा॥ रक्षंतु सर्वतः सर्वे देवाः शक्रपुरोगमाः॥ आयुर्वेदोक्तमंत्रेण रक्षां बालसमीपे पठेत्॥ ततो
गौरसर्षपसैंधवनिंबपत्रैः धूपः सूतिकागृहे देयः॥ गृहपश्चात्स्थेचपालादिकं पूजयेत्॥ कुश
यवजलान्यादाय॥ ॐ अस्यां रात्रौ मम माभिनवजातकुमारस्य नैरुज्यदीर्घायुष्यसर्वोपद्रवशां

अ० प्र०
१० ९

तिपूर्वक सर्वविघ्नसर्वाभ्युदयप्राप्तिकामोत्र पूजनीयदेवतासहितक्षेत्रपालपूजनमहं करिष्ये॥ततः
आवाह्यप्रतिष्ठाप्य पूजयेत्॥निर्वाणं निर्विकल्पं निरुपममलं निर्विकारं सकोपं चक्रं दंडं दधानं हु
तवहवदनं रुद्रवन्मंत्रभावं॥ॐ कारावह्नरावंभ्रकुटितटमुखं भैरवं शूलपाणिं खड्गांगैः कोटिमंडम
रुकसहितं क्षेत्रपालं नमामि॥एष भक्तबलिः क्षेत्रपालायनमः॥नानारूपधराः सर्वे गंधर्वा
देवयोनयः॥स्वयं रक्षंतु मे पुत्रं तु गृह्णंतु मे बलिं॥एष भक्तबलिं गंधर्वेभ्यो नमः॥आदित्याद्या
ग्रहाः सर्वे ये नित्यं स्वर्गवासिनः॥रक्षां कुर्वंतु मे सर्वे स्वयं गृह्णंतु इमं बलिं॥एष भक्तिः आदित्या
दिनवग्रहदेवताभ्यो नमः॥दिक्पालाश्च तथेंद्राश्च स्वस्थानप्रतिवासिनः॥शांतिं कुर्वंतु मे सर्वे तु

भा ३

श्री

१० ९

गृह्णंतु इमं बलिं॥एष भक्तिबलिः॥इंद्रादिदशदिक्पालेभ्यो नमः॥अथ चामुंडां पूजयेत्॥तथैव
कामनया आवाह्यप्रतिष्ठाप्य एषोऽर्घ्यं चामुंडायै नमः॥इदं चंदनानुलेपनपुष्पधूपदीपनैवेद्यादिभ
क्तबलिं चामुंडायै सपरिवारायै सायुधायै सवाहनायै चामुंडायै नमः॥नमस्कृत्य विसर्जयेत्॥अ
स्यां रात्रौ गणपत्यादिदेवतापूजाप्रतिष्ठासिध्यर्थं इदं द्रव्यं दक्षिणां दातुमहमुत्सृजे॥धूपो निंबादि
पत्रैः कुर्यात्॥गोरोचनादितिलकं बालकस्य कुर्यात्॥इदं तु विस्तरे लिखितं तथापि कुलाचारेण
कार्यं॥इति षष्ठीपूजा॥अथ नामकरणप्रयोगः॥जन्मतः एकादशे द्वादशे वा यथाचारं नियत
दिने वा नामकरणं कार्यं॥नियतकालेऽपि विशिष्टे वैधृतिव्यतीपातग्रहणसंक्रांत्यमावास्यां श्रा

पंक्ति ५ मध्यस्तह कु० करिष्यमाणनाम्नेच अस्मे कुमाराय स्वस्तिभवं० ३

अ० प्र० ११०

द्वादशदिनेपुनःकार्यं॥ नियतकालेक्रियमाणेगुरुशुक्रास्तबाल्यवार्द्धकवक्रातिचारमलमासादिनि
षेधोनास्ति॥ नियतकालातिक्रमेतुज्योतिःशास्त्रोक्तेशुभेकालेकार्यं॥ सर्वत्रपर्वोक्तप्रशस्तः॥ आ
चम्यप्राणानायम्यदेशकालौनिर्दिश्यास्यशिशोःबीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्य
वहारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनामकरणंकरिष्ये॥ इतिसंकल्प्य॥ गणेशपूजनादिनांदी
म श्राद्धांतंकृत्वानालिखनंकार्यं॥ अत्रादौगणपतिनामततःस्वकुलदेवताभक्तइतिनामकृत्वातद
नंतरंमासनामकुर्यात्॥ चैत्रः॥ कृष्णोनंतोच्युतश्चक्रीवैकुंठोथजनार्दनः॥ उपेंद्रोयज्ञपुरुषोवा
सुदेवस्तथाहरिः॥ योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात्॥ श्रीपद्माकमलालक्ष्मीसी

श्री ११०

तासत्याचरुक्मिणी॥ माधवीचेंदिरादेवीतुलसीजांबुवीतथा॥ चैत्रादिमार्गशीर्षादिवाक्रमः॥ ततोनक्षत्र
नामअवकहडाचक्रप्रमाणेनकार्यं॥ ततोव्यवहारिकंनामद्व्यक्षरंचतुरक्षरंनामलेख्यं॥ विप्रादिवर्णक्र
मेणशर्मवर्मगुप्तदासान्यतमपदांतंउपांशुकुर्यात्॥ तच्चमौंजीबंधनान्मातापितरावेवजानीयातां॥ उप
नयनकालेवानेननाम्नाऽभिवादयतेतिकुमारंप्रतिवाच्यं॥ अत्रायंशिष्टाचारः॥ तंडुलान्कांस्यादिपात्रे
प्रसार्यतदुपरिसुवर्णशलाकया आदौगणपतिनामततोकुलदेवताप्रयुक्तनाम अमुकभक्तइतिलेख्यं
ततोमासनामततोनक्षत्रनामलेख्यंततोव्यवहारिकंनामस्वेष्टंशर्मातंलिखित्वा॥ तदस्त० गृहा
वै०॥ ततोनामदेवताभ्योनमइतिउपचारैर्वस्त्रादिभिःपूजांकुर्यात्॥ मंत्रपुष्पांजलिंदत्वा॥ कर्ताशिशोः

आर्याः कुमारस्य नामाहं विदधामि। विधीयतां॥ प्रतिव०

दक्षिणकर्णेनामानिकथयेत्॥तेच॥श्रीगणेशायनमः॥कुलदेवतानाम्नात्वंअमुकभक्तोसि॥मास
नाम्नात्वंकृष्णोसि॥नक्षत्रनाम्नात्वंचूडामणिरसि॥व्यवहारिकेणनाम्नात्वंनारायणशर्मासि॥त
तोब्राह्मणहस्ते अक्षतान्दत्वाकुलदेवतानाम्नाअयंदुर्गाभक्तोभवतः सर्वान्ब्राह्मणान् अभिवा
दयते॥आयुष्मान्भवतुदुर्गाभक्तः॥मासनाम्नाकृष्णोयंभवतः सर्वा॰भवतुकृष्णः॥नाक्षत्रेणना
म्नाचूडामणोयंभवतः सर्वा॰भवतुचूडामणिः॥व्यवहारिकेणनाम्नानारायणशर्मायंभवतः॰स
र्वा॰भवतुनारायणशर्मा॥नदस्तु॰॥नहोवे॰॥सुप्रतिष्ठितमस्तु॥इतिविप्रावदेयुः॥ततः कर्तादे
वताभ्योब्राह्मणेभ्यश्चनत्वा॥कृतस्यनामकरणस्यसांगतासिध्यर्थंयथाशक्तिब्राह्मणान्यथाका

लंभोजयिष्ये॥तथैवभूयसींदक्षिणांदातुमहमुत्सृजेत्॥कुमार्या अपिनामकरणंअमंत्रकंकार्यं॥वि
षमाक्षरंतुतन्नामविप्राशिषोग्राह्याः॥अत्रजातकर्मवत्पित्राद्याः क्रमेणकर्तारः॥इतिनामक
रणप्रयोगः॥अथपर्यंकारोपणं॥तच्चनामकरणदिनेषोडशेद्वात्रिंशेऽन्यस्मिन्वाज्योतिःशास्त्रो
क्तमृदुध्रुवक्षिप्रनक्षत्रादियुक्तेशुभेकालेयथाचारंकुलदेवतादिपूजांविधायालंकृतंशिशुंहरि
द्राद्यलंकृतेपर्यंकेमात्राद्याःसौभाग्ययुक्ताःस्त्रियोयोगशायिनंहरिंस्मरंत्योगीतवाद्यादिस
मकालंप्राक्शिरसंन्यसेयुः॥स्वस्वाचारप्राप्तंचान्यदपिकार्यं॥इतिपर्यंकारोपणं॥अथदुग्ध
पानं॥एकत्रिंशद्दिनेद्वितीयजन्मनक्षत्रेऽन्यस्मिन्वाऽन्नप्राशननक्षत्रयुक्तेशुभदिनेकुलदेव

अ० प्र०
११२

तादिपूजांविधायगोक्षीरंशंखेनधात्रीमातान्यावासुभगालंकृतंकुमारंदक्षिणशिरसंप्राक्शिर
संवापाययेत्॥इतिदुग्धपानं॥अथकर्णवेधः॥जन्मदिनाद्द्वादशेषोडशेवादिनेषष्ठसप्तमाष्टम
दशमासान्यतरमासेन्यक्षवादंतजननात्पूर्वमेवज्योतिःशास्त्रोक्तेमासेशुक्लपक्षेतिथिवारन
क्षत्रशुभकालेपूर्वाह्नेमध्याह्नेवाविष्णुशिवब्रह्मचंद्रसूर्यदिगीशनासत्यसरस्वतीकुलदेवतागो
ब्राह्मणान्यथाविभवंसंपूज्यमातुरुत्संगस्थस्यालंकृताशुभासनस्थस्यशिशोःकर्णयोर्वेध्य
स्थलमलक्त[illegible]करसेनांकारयित्वायथासुवर्णरूप्यताम्रलोहसूच्यामांगलिकद्विगुण--दि
सत्रोपेर्यातसौचिकेनान्येनवाकुशलेनसुभगस्त्रियावाप्राङ्मुखस्यकर्णौवेधयेत्॥अनाव

श्री
११२

तेसूत्ररश्मिपातस्थलेगणादौपित्रादिःकुमारस्यपूर्वंदक्षिणतःकुमार्यास्तुपूर्वंवामकर्णेवोद्धव्यः॥
वेधनक्षात्तृतीयनक्षत्रेकर्णप्रक्षालनंसुखवारिणारोहणार्थंकार्यं॥रूढौचकर्णौयथाभरणक्षमता
भवति॥तथावर्द्धनीयौ॥पुंसःसूर्यरश्मिप्रवेशयोग्यंरंध्रपर्यंतंवर्धयेत्॥लंबकर्णतातुनिषिद्धास्त्रीणां
तुयथेष्टं॥इतिकर्णवेधः॥अथसूर्यावलोकनं॥जननात्तृतीयेमासिजन्मदिनेजन्मनक्षत्रेइष्ट
देवतापूजनपूर्वकंअलंकृतेनशिशुनासोत्सवसूर्यदर्शनंकारयित्वाचतुर्थेमासेशुभकालेऽग्निंचंद्रं
धेनुंचदर्शयेत्॥केचित्तु॥देशकालौसंकीर्त्यममअस्यकुमारस्यायुरभिवृद्धिद्वाराश्री०सूर्यावलो
कनंतथाआयुःश्रीवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्री०निष्क्रमणंतथाआयुरभिवृ

द्विारा श्री॰ भूमावुपवेशनं तथा मातृगमत्वप्राशनशुद्धि अन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्लक्षणफलल
सिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्री॰ सूर्यावलोकननिष्क्रमणउपवेशनान्नप्राशनं चतंत्रेण
करिष्ये॥ इति संकल्प्य॥ गणेशपूजनांदीश्राद्धांतं कृत्वा निष्क्रमणांगत्वेनइंद्रादिविंशतिदेवताः
उपवेशनांगत्वेनवराहं पृथिवीं च सूर्यावलोकनादिसकलकर्मांगत्वेनेष्टदेवतां च पूजयिष्ये इति संक
ल्प्य॥ त्रयोविंशतिषु प्रतिमासु धान्यपुंजेषु वा इंद्राय नमः॥ इंद्रमावाहयामीति एवमिंद्रादिलोकपा
लान्॥ ८ प्राच्यै नमः प्राचीमावाहयामीत्येवं प्राच्यादीशान्यंता दिशः ॥ ब्रह्मणे नमो काश्यै नमो वासुदे
वाय नमो गगनाय नमो वराहाय पृथिव्यै नम इत्येतैर्मंत्रैः प्रणवाद्यैरमुमावाहयामीति चंद्रादि

देवता अमुष्यै नमो मुमावाहयामीति इष्टदेवतां चावाह्य षोडशोपचारैः संपूज्य सूर्यावलोकनं का
रयेत्॥ स्वस्ति नः स्वस्त्यात्रेयो विश्वेदेवा त्रिष्टुप्॥ शिशोरंकारोपणे वि॰॥ स्वस्ति नो मिमीता॰
अनेन पित्रा दि... ऋ॰ १॥ अंकमारोप्य॥ आशुः शिशान इति त्रयोदशर्चस्याप्रतिरथस्त्वाष्ट्रस्य इंद्रो प्रतिरथ इंद्र
त्रिष्टुप्॥ चतुर्थ्या बृहस्पतिर्देवता त्रयोदश्या अनुष्टुप्॥ शिशो रायुष्याभिवृद्ध्यर्थे जपे वि॰॥
ॐ आशुः शिशानो॰ १३॥ असौ या सेना मरुतः॰ ऋ॰ २॥ तच्चक्षुर्वसिष्ठः सूर्यः पुरउष्णिक्॥
कुमारस्यादित्यावेक्षणे वि॰॥ तच्चक्षुर्देवहितं शुक्रमुच्चरत्॥ पश्येम शरदः शतं जीवेम शरदः
शतं॥ इति सूर्यं निरीक्षयेत्॥ तृतीये मासि सूर्यावलोकनं न कारितं चेन्निष्क्रमणेनैव सह का

यै॥ इति सूर्यावलोकनविधिः॥ अथ निष्क्रमणं॥ प्रजीतदेवताग्नीस्थंडिवरान्ब्राह्मणान्भोज
यित्वा ऽस्मै कुमाराय स्वस्ति भवंतो ब्रुवंतु इति वाचयित्वा यथाशक्त्यलंकृतं बालं धान्यामातु
लेन वाहनेन वा उह्यमानं मंगलवाद्यघोषेण॥ चतुर्थे मासि शुक्लपक्षे शुभतिथ्यादौ पिता सभार्यः
सशिशुरभ्यंगस्नातः देशकालौ स्मृत्वा॥ ममास्य शिशोरायुःश्रीवृद्धिबीजगर्भसमुद्भवैनो
निवर्हणद्वारा श्री० निष्क्रमणाख्यं कर्म करिष्ये॥ इति संकल्प्य॥ तदादौ गणपतिपूजनं स्वस्ति
पुण्याहवाचनं मातृपूजनं आभ्युदयिकानि कृत्वा इंद्रादिलोकपालानां प्राच्यां दिशां चंद्रार्क
वासुदेवगगनानां च यथाक्रमं पूजां कृत्वा ब्राह्मणान्भोजयित्वा शिशोरलंकरणादि यथा

शक्त्यालंकृत्याग्निचंद्रधेनूनां दर्शनं कारयित्वा वाद्यघोषयुक्तः कनिक्रदज्जनुषमित्यादिसुमं
गलसूक्तं पठन् गृहाद्बहिर्गत्वा मंत्रमेतदुदीरयेत्॥ कनिक्रदज्जनुषं० गं वर्ग० २॥ सर्वाहिनद्धत्वा पु
रोभागे ब्राह्मणानां दर्पणकलशकन्याघृष्टपुष्पहरिद्राक्षतदीपमालाध्वजलाजमंगलानां

इति पाठ

सूर्याग्निचंद्रधेनूनां च यथासंभवं दर्शनं कारयित्वा बहिर्देशे शुचौ स्थाने शिशुमुपवेश्य॥ देवताः

इति पादसमाप्त

प्रार्थयेत्॥ चंद्रार्कयोर्दिगीशानां दिशां च गगनस्य च॥ निक्षेपार्थमिदं दद्मि ते त्वां रक्षंतु सर्व
दा॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ वरुण
स्य चेति अपपाठः॥ दिशां चेत्यत्र अनुक्तसमुच्चयार्थे चकारो ऽच्चारणकाले वासुदेवं ध्यायेत्॥

देवान्संभार्य्यविस्तुत्रिवालयोरन्यतरद्गृहंवागत्वात्त्रदेवंसुमंगलवाद्यघोषयुक्तः पुष्पोपहारादिभिः प्रत्यम्बकंत्र्यंबकंयमंत्रेणत्रिरुगरक्षांकुर्यात्॥

तेमभिल्येकारः ष्यांदसः॥ततोविष्णुशिवादीष्टदेवालयंनीत्वास्वगृहस्थदेवतासमीपेनीत्वानीत्वादेवंसं पूज्यवालं [illegible] प्रणम्य्यप्रदक्षिणंचकारयित्वामातुलादिवंधुगृहंप्राप्यस्वगृहेआनंमानीयमा तुलादिनावस्त्रादिभिः पितृभ्यांसहवालेपूजितेस्वगृहेमण्योपलिप्तेचतुरस्त्रेधान्यराशीन्विधा यतेषूपविष्टवालस्यशिरसि [illegible] भालेचविभूत्यालेपनेनरक्षांकुर्यात्॥त्र्यंबकंवसिष्ठऋषिःरुद्रोनुष्टु प्॥रक्षाकरणेवि०॥ॐहौंजूंसः॥त्र्यंबकंय०॥ॐ१॥सःजूंहौंमितिमृत्युसंजीवनमंत्रेण॥ततोग णेशंभूतेशंचशिशुहस्तेनसत्कृत्यपूपाद्युपहारैस्तोषयित्वाआत्मीयैःसुवासिनीभिश्चाशिषो वाचयेत्॥देवताप्रणामंप्रदक्षिणत्रयंचशिशुनाकारयित्वामातुलभ्रातृभगिनीगृहंनीत्वातत्रदा

नोप[illegible]हारादिभिःशिशुंभक्ष्यादिभिस्तोषयित्वास्वगृहंगत्वाआत्मीयैःशिशोर्वाचयित्वा॥कृतस्यनिष्क्रमणाख्य स्यकर्मणःसांगतासिध्यर्थंयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजे॥बंधुभिःसहभुंजीतेति॥कुर्यायी अप्येतत्समानं॥इतिसंक्षेपेणनिष्क्रमणप्रयोगः॥अथोपवेशनान्नप्राशनविधिः॥जन्मतःषष्ठेमासे अष्टमेवादंतेषुजातेषुवाज्योतिःशास्त्रोक्ततिथिनक्षत्रादिशुभेकालेपूर्वाह्णेपित्रादिःशिशोरन्नप्राशनंकु र्यात्॥षष्ठमासेचेत्क्रियेतेनतदागुरुशुक्रमौढ्यादिदोषाधिमासादिदोषश्चनास्ति॥ततोदेशकालौस्मृत्वा ममास्यशिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्लक्षणफलसि द्धिवीजगर्भस मुद्भवैनोनिवर्हणद्वाराश्री०उपवेशनान्नप्राशनंचतंत्रेणकरिष्ये॥तदंगंगणपतिपूजनस्वस्तिवाचनाभ्यु

अ० प्र०

११६

दयिकं करिष्ये॥ ततोवराहपृथिवीगुरुदेवद्विजान्पूजयित्वा॥ तत्रमंडलंकृत्वाभ्यधान्यराशिंकृत्वाशंखवन्द्यादिमांगलिकध्वनौक्रियमाणेउद्गातेवशकुनेसामगायसीत्यादिमंत्रेण चबालंपित्रादिरुपवेशयेत्॥ तस्यमंत्राः॥ रक्षैनंवसुधेदेविसदासर्वगतंशुभे॥ आयुःप्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये॥ १॥ अचिरादायुषस्तस्ययेकेचित्परिपंथिनः॥ जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्॥ २॥ धारिण्यशेषभूतानांमातस्त्वमधिकास्यसि॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां॥ ३॥ तदग्रेपुस्तकंशस्त्रवस्त्रादिशिल्पादिविन्यस्यजीविकापरिक्षांकुर्यात्॥ शिशुःस्वेच्छयायत्प्रथमंस्पृशेत्सास्यजीविकेतिविधात्॥ ततोब्राह्मणान्संपूज्यबालकस्यसुवासिनीनीराजनंकुर्युः॥ इत्युप

शिरो॥ २

श्री

११६

वि०

वेशनं॥ अथान्नप्राशनं॥ दधिमधुघृतमिश्रमन्नंनवेकांचनेरौप्येकांस्येवापात्रेनिक्षिप्यपूजितेष्टदेवंप्रणम्यततुरतःशुभ्रवस्त्रोपरिस्थितमातुरुत्संगेप्राङ्मुखोपविष्टशिशोःसुवर्णहस्तोन्नपात्रादीषदादायमंत्रेणप्रथमंप्राशनंकारयेत्॥ अन्नपतइत्यस्यमंत्रस्यनलकूवरोन्नपतिर्जगती॥ शिशोरन्नप्राशनेवि०॥ ॐ अन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणः॥ प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतुष्पदे॥ ततोयथेष्टंभोजयित्वाबालमुखंप्रक्षाल्यआचमेत्॥ जयंतस्वाहा॥ अन्नंसंस्कृत्यप्रथमंब्राह्मणानाराध्यतेषुशोभनमभिहितवत्सुस्नातमलंकृतंसुकृतासनेप्राङ्मुखउपवेश्योक्तविधमन्नंमंत्रेणप्राशयेत्॥ ततःपंचकवलैःतूष्णींप्राशयेदिति॥ ततःकर्पूरैलादितांबूलं

उपा०

नो

प्राशयेत्॥ ततः प्रतिसंस्कारं दशदशेति त्रीस्त्रीनिति वा ब्राह्मणान्भोजयिष्ये इति संकल्प्य॥ अनयोः
उपवेशनान्नप्राशनकर्मणोः सांगतासिध्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये॥ भूयसीं दक्षिणां
दद्यात्तु मत्सुस्त्सृजे॥ कुमार्या अप्येतदमंत्रकं कार्यं॥ किंतु सप्तमे मासे॥ इति संक्षेपेणोपवेशनान्नप्रा
शनप्रयोगः॥ अथ वर्धापनविधिः॥ आदित्यपुराणे॥ सर्वैश्च जन्मदिवसे स्नातैर्मंगलवारिभिः॥
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः॥ स्वनक्षत्रं च पितरस्तथा देवः प्रजापतिः॥ प्रतिसंवत्सरं
यत्नात्कर्तव्यश्च महोत्सवः॥ स्वनक्षत्रं स्वनक्षत्रदेवता॥ स्वनक्षत्रं वित्तपश्चेति क्वचित्पाठः॥
तदा वित्तपः कुवेरः॥ अत्र प्रयोगः॥ प्रतिवर्षजन्मदिने सौरमानेन जन्मनक्षत्रे वा मंगलस्नानं

विधाय देशकालौ संकीर्त्य मम अब्दपूर्ति जन्मदिवसे आयुरभिवृद्धिद्वारा श्री० दूर्वाहोमं करिष्ये॥ तदं
गं स्वस्तिपुण्याहवाचनं गणेशपूजनं च करिष्ये॥ तदंगं स्थंडिलादि करिष्ये॥ पुनर्देशकालौ सं
कीर्त्य समिद्द्वयमादाय॥ अस्मिन्दूर्वाहोमे देवतापरिग्रहार्थं अन्वाधानं करिष्ये॥ अस्मिन्नं
न्वाहितेग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवतां मृत्युंजयमष्टोत्तरशतदूर्वाद्रव्येण
शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्ये इत्यंतमुक्त्वा समिधामग्नावाधाय परिसमूहनाद्याज्यभा
गांतं कृत्वा दधिघृताक्तं केवलाक्तं वा दूर्वात्रयं॥ त्र्यंबकमित्यस्य वसिष्ठो रुद्रोनुष्टुप्॥ दूर्वाहोमे
वि०॥ ॐ हौं जूं सः ॐ भूर्भुवः स्वः त्र्यंबकं० रुक्॥ स्वः भुवः भूः सः जूं हौं ॐ॥ इत्यनेनेमंत्रेण॥

अं॰प्र॰
११८

ष्टोत्तरशतं हुत्वा स्विष्टकृदादिहोमशेषं समापयेत्॥ इति होमविधिः॥ अथ पूजनविधिर्लिख्य
ते॥ संकल्पं कृत्वा नांदीश्राद्धांतं कृत्वा अक्षतपुंजेषु॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च बिभीष
णः॥ कृपः परशुरामश्च सप्तैते चिरजीविनः॥ सप्तैतानि स्मरेन्नित्यं मार्कंडेयमथाष्टमं॥
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः॥ इति मंत्रेण षोडशोपचारैः पूजां कृत्वा मतांतरे वा
वासुदेवं नक्षत्रदेवतां चंद्रमसं नक्षत्रं वरुणं च यथोपचारैरभ्यर्च्य॥ ग्रंथांतरे तु ग्रहयज्ञं कृ
त्वा॥ अन्यग्रंथांतरे तु॥ गणेशं महानिष्टदेवतां मार्कंडेयं च प्रार्थयेत्॥ मार्कंडेय नमस्तेऽस्तु
सप्तकल्पांतजीवन॥ आयुरारोग्यसिध्यर्थं प्रसीद भगवन्मुने॥ चिरंजीवि यथा त्वं तु मुनीनां प्र

श्री
११९

वर द्विज॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं॥ ततः॥ मार्कंडेय महाभाग सप्तकल्पांतजीवनः॥
आयुरारोग्यसिध्यर्थमस्माकं वरदो भव॥ सतिलं गुडसंमिश्रमंजल्यर्द्धमितं पयः॥ मार्कंडेयाद्वरं
लब्ध्वा पिबाम्यायुर्विवृद्धये॥ ४॥ इति लैः सतिलं गुडमंजल्यर्द्धमितं दुग्धं पिबेत्॥ ततो वासिनीभिः
नीराजनो धृतनूतनवस्त्रो ब्राह्मणीभ्यश्चापूपपूरिकामाज्यकुमुदादिप्रीतये आयुर्वृद्धये च वा
यनादि दद्यात्॥ ततो ब्राह्मणान्भोजयित्वाशिषो गृहीत्वा यथाशक्ति तेभ्यो दक्षिणां दद्यात्॥ ए
तत्सर्वं प्रतिवर्षं कुर्यात्॥ इदं च वर्द्धापनं यदि जन्ममासोऽसंक्रांतस्तदा शुद्धमासे कार्यं न
त्वधिके॥ इति संक्षेपेण वर्द्धापनप्रायोगः॥ यदि गर्भाधानादिसंस्कारलोपस्तदा प्रायश्चित्तं कृ

अं॰ प्र॰
११८

लाकालात्ययनिमित्तंप्रायश्चित्तहोमंचकृत्वाचौलहोमःका र्यः॥प्रापा यामतिथ्यादिसंकीर्त्यममकु
मारस्यगर्भाधानंपुंसवनंसीमंतविष्णुबलिजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलकर्मीतानां
नवसंस्काराणांकालातिपत्तिदोषपरिहारार्थंप्रायश्चित्तहोमंकरिष्ये॥इतिसंकल्प्य॥उपलेपनादि
पूर्णपात्रनिधानांतंकृत्वाविधिवदाज्यसंस्कृत्वाघाघारांतंकृत्वातीतकर्मसंख्यया॥ॐभूर्भुवःस्वा
स्वाहेत्याज्याहुतीर्हुत्वास्विष्टकृदादिहोमशेषंसमाप्यचौलांतिरिक्तसंस्काराणांप्रमादात्यदकर
णेप्रत्येकंपादकृच्छ्रंचौलाकरणेर्द्धकृच्छ्रंबुद्धिपूर्वंचौलातिरिक्ताकरणेप्रत्येकमर्द्धकृच्छ्रंचौलाकरणे
कृच्छ्रंबुद्ध्याकारयेत्॥इतिप्रायश्चित्तं॥अथचौलोपनयनप्रयोगः॥तद्गर्भाष्टमेष्टमेवाब्देवा॥

श्री
११८

दः॥माघादिपंचमासेषुमेखलाबंधनंशिशोः॥ज्येष्ठमासेनज्येष्ठस्यजन्ममासेनसर्वेषांशुक्लपक्षेद्वि
तीयादिस्वाध्यायतिथिषुनानध्यायतिथिषुनैमित्तिकानध्यायेषुवाद्येशुभचंद्रादौगुरुशुक्रयोर्बा
ल्यवार्द्धकास्तराहित्यादौज्योतिर्विद्प्रोक्तेशुभेकालेउपनयनंकार्यं॥उपनयनेतुक्रममाह॥वृद्धगर्गः॥
पितापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः॥उपनयनेधिकारीस्यात्पूर्वाभावेपरःपरः॥तथा॥
पित्रैवोपनयेत्पुत्रंतदभावेपितुःपिता॥तदभावेपितुर्भ्रातातदभावेतुसोदरः॥अधिकारसिद्धयेप्रा
यश्चित्तमाह॥वृद्धविष्णुः॥कृच्छ्रत्रयंचोपनीतेत्रीन्कृच्छ्रांश्चवटुश्चरेत्॥आचार्योद्वादशसहस्रंद्वाद
शोत्तरसहस्रंवागायत्रींजपेत्॥तथानांदीश्राद्धंकृतेपश्चादनध्यायस्त्वकालिकः॥मौंजीबंधंत

दा कुर्याद्वेदारंभं न कारयेत्॥ अकालिकः॥ गर्जनिर्घातादिनिमित्तकः॥ आश्वलायनानां उपनय
नदिने वेदारंभाभावाद्वेदारंभकरणं यजुर्वेदिविषयं॥ आश्वलायनस्तु॥ वृद्धिश्राद्धदिनात्पूर्वदिनम
ध्ये मुहूर्तांतरे सति तेनैव नांदीश्राद्धेन तत्रोपनयनं कुर्यात्॥ तदूर्ध्वं तु मुहूर्ते॥ श्राद्धांतरपूर्वकं उ
पनयनं यथाकालं कुर्यात्॥ तथा प्रायश्चित्तं कार्यं॥ तथा॥ ममउपनेतृत्वाधिकारसिध्यर्थं कृ
छ्रत्रयं द्वादशसहस्रगायत्रीजपं च यथाप्रत्याम्नायेन करिष्ये॥ तथा कुमारेणापि कामचार
कामवादकाम भक्षणादिदोषापनोदार्थं कृच्छ्रत्रयं यथाप्रत्याम्नायेन यथाकालं करिष्ये॥
ततः सुमुखश्चेत्यादिगणपतिस्मरणपूर्वकं देशकालौ स्मृत्वा मम अस्य कुमारस्य द्विजत्वसि

ध्या वेदाध्ययनाधिकारार्थं अंतरितं चौलं उपनीत्या सह अश्वो वा द्यक करिष्ये॥ तदंगं स्वस्तिपुण्याहवा
चनं मातृकापूजनं नांदीश्राद्धं मंडपदेवतास्थापनं कुलदेवता स्थापनं च करिष्ये॥ स्वस्तिवा
चनं नांदीश्राद्धं कृत्वा आचारप्राप्तं अविघ्नसंज्ञकं गणपतिं पूजयित्वा॥ नंदिनी नलिनी मैत्रा
उमा च पशुवर्द्धिनी॥ भगवती अविघ्नगणपतिं चावाहयामि॥ नंदिन्याद्यावाहितदेवताभ्यो
नमः॥ आसनं पाद्यं अर्घ्यं॥ आचमनीयं॥ ततो नीराजनं॥ श्रियेजातः॥ कनिक्रदज्जनुषंप्र
ब्रुवाण इयर्ति वाचमरितेव नावं॥ सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत्॥
मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता॥ पित्र्यामनुप्रदिशं कनिक्रद

अं० प्र०
१२१

सुमंगलो भद्रवादी वदेह ॥ अवक्रंदद्दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुंते ॥ मा नस्तेन ईशत
माघशंसो बृहद्वदेम विदथे सुवीराः ॥१॥ प्रदक्षिणिदभिगृणंति कारवो वयो वदंत ऋतुथा शकुंत
यः ॥ उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानुराजति ॥ उद्गातेव शकुने० ऋ २॥ आवदंस्त्वं
६४ शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः ॥ यदुत्पतन्वदसि कर्करिर्यथा बृहद्व० ॥३॥
सुमंगलसूक्तेन तैलहरिद्राउष्णोदकेन स्नापयित्वा ॥ समुद्रज्येष्ठा इति चतसृभिः ॥ आपोहि
ष्ठेति तिसृभिः ॥ सर्वाः शुद्धोदकेन प्रोक्ष्य ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥
सुरभिनो मुखाकरत्प्रण आयूंषि तारिषत् ॥ इति दधि ॥ कांडात्कांडादिति दूर्वाः ॥ गंधपुष्पा

श्री
१२१

२ षोडशोपचारसमाप्त्या । ततः समुद्रज्ये०

पुंवत्स्त्री० अभिधस्त्वा० सत्तु व० भद्रा व० वेदिष० प्रसनानी :० उमा उ०

७

क्षतधूपदीपनैवेद्यदक्षिणांतोपचारैः पूजयेत् ॥ ततः आग्नेयीमारभ्य ईशानीपर्यंतं सुमंगलसू
क्तेन घंटानादेन मातृकासहितशाखास्तंभं आदत्ते कलशं पत्नीहस्ते दत्वा गृहमध्ये यथाचारं स्था
पयेत् ॥ तदस्त० गृहीवे० ॥ ततो यथामिलितोपचारैः पूजयेत् ॥ पुष्पांजलिं दत्वा क्षमाप्य ॥ कुलदे
वताप्रीत्यर्थं सुवासिनीभ्यः तैलहरिद्रादानं यथाचारं सर्वं कार्यं ॥ इति देवकप्रतिष्ठाविधिः ॥ ततः
कृतमांगलिकस्नानो देशकालौ संकीर्त्य अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्व
र्चोभिवृद्धिद्वारा श्री० प्रर्थं संकल्पितचौलाख्यं कर्म करिष्ये ॥ इति संकल्प्य ॥ तदंगं स्थंडिलादि
अग्निध्यानांतं कृत्वा ॥ पुनर्देशकालौ संकीर्त्य अस्मिन् चौलाख्ये कर्मणि देवतापरिग्रहार्थं

अ० प्र०
१२२

मन्वाधानं करिष्ये॥ अस्मिन्नन्वाहितेग्नावित्यादि आघारांतमुक्त्वा अत्र प्रधानं त्रिरग्निं पवमा
नं प्रजापतिं चाज्यद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये इत्यंतमुक्त्वा समिद्द्वयमग्नावा
धाय परिसमूहनादि पूर्णपात्रनिधानांतं षट्पात्रप्रयोगादितंत्रं कृत्वा॥ अग्नेरुत्तरतः व्रीह्या
दिशरावचतुष्टयं निधायाग्नेर्दक्षिणतः एकस्मिन्क्षुरावे शमीपर्णानि द्वितीये शरावे आन
डुहगोमयं मातुः समीपे निधाय ततो ब्रह्मा एकविंशतिकुशपिंजूलान्यादाय मातुर्दक्षिण
तस्तिष्ठेत्॥ पिता वा तथा तिष्ठेत्॥ अन्यस्मिन्पक्षे अन्य एव कर्ता॥ ततः कुमारेणान्वारब्धः
कर्ता पुरस्तन आघारांतं कर्म कृत्वा प्रधानाज्याहुतीर्जुहुयात्॥ अग्न आयूंषीति तिसृणां

श्री
१२२

शतं वैखानसा ऋषयः॥ अग्निः पवमानो देवता॥ गायत्री छंदः॥ चौलकर्मप्रधानाज्यहोमे०॥
ॐ अग्न आयूंषि पवस आसुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनां स्वाहा॥ अग्नये पवमानायेदं०॥ ॐ अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः॥ तमीमहे महागयं स्वाहा॥ अग्न०॥ ॐ अ
ग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं॥ दधद्रयिं मयि पोषं स्वाहा॥ अग्न०॥ प्रजापते हिरण्यगर्भः प्र
जापतिस्त्रिष्टुप्॥ चौलकर्मप्र०॥ प्रजापते०स्वा० प्रजा०॥ एवं चतुराज्याहुतीर्हुत्वा॥ ततः उष्णेन वा
यउदकेनेहीति युगपद्धारां गृहीत्वा ततो नवनीतेन वामकर्णमारभ्य दक्षिणकर्णपर्यंतं शिरस्त्रि
क्लेदनं मंत्रावृत्त्या कुर्यात्॥ तत्र मंत्रः॥ अदितिः केशान्वपतु आप उंदंतु वर्चसे॥ एकविंशतिकुशपिंज

शीतम्लं चोभे जले दक्षिण वामकर्णाभ्यां क्रमेण पात्रयो

द्वी॰ १२ X प्रच्छिघप्रच्छिद्यप्राम ग्मांछमिप र्णै ह्यान्ये प्रयच्छति ता नाप्नुहे गोमयेनप्रघाति X ३५६

अ० प्र०

१२३॥३२

लानां मध्ये त्रीणि पिंजूलान्यादाय दक्षिण कर्णमूलभागे निधाय॥ ओषधे त्रायस्वैनं अनेन कुशां कुरं निधाय॥ स्वधिते मैनं हिंसीः॥ तदुपरि क्षुरं निधाय॥ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्रह्माणो वपतेदमस्यायुष्मान् जरदष्टिर्यथासत्॥ सकेशान् छित्वा पूर्वाग्रान् शमीपर्णयुतान् मातृहस्ते दत्वा मात्रा गोमये परि निधाय॥ पुनस्तथैव द्विवारं कार्यं॥ येन धाता बृहस्पतेरग्नेरिंद्रस्य चायुषे वपत्॥ तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये॥ २॥ येन भूयश्च रात्र्यां ज्योक् च पश्याति सूर्यं॥ तेन त आयुषे॥ ३॥ सर्वैर्मंत्रैश्चतुर्थं॥ एवं वामकर्णे त्रिवारं कार्यं॥ न तु चतुर्थं॥ यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान्॥ छिंधि शिरो मास्यायुः

मंत्रेण ४

श्री

१२३

हीं पोथी जोग धरा चि आहे यांच्या [illegible]

प्रमोषीः॥ अग्र तआरभ्य मूलात् क्षुरधारान् निमृजेत्॥ ततः शीतोष्णाभिरद्भिरवधर्थं कुर्वाणोक्षण कुशली कुरु नापितं प्रतिब्रूयात्॥ नापितेन यथाचारं शिखास्थापितं वपनं कृत्वा शीतोष्णैः स्नानं कुर्यात्॥ स्विष्टकृदादि होमशेषं समापयेत्॥ ब्राह्मणे अनडुह प्रतिनिधिभूतं द्रव्यं दत्वा ब्राह्मणान् भोजयित्वाभ्युदयं सीद त्वा कर्मेश्वरार्पणं कृत्वा॥ नापिताय व्रीह्यादि शरावचतुष्टयं दद्यात्॥ आय स्य स्मृत्येत्युक्त्वा विष्णुं नमस्कृत्य॥ एतत्सर्वं कुमार्या अमंत्रकं कार्यं॥ होमस्तु समंत्रकः॥ त्रिमध्ये शिरसि चूडा स्यात्॥ वसिष्ठानां तु दक्षिणे॥ उभयोः पार्श्वयोरत्रिः कश्यपानां शिखामता॥ शिशो मीता गर्भिण्यां च चूडाकर्म न कारयेत्॥ पंचमाब्दादतोर्ध्वं तु गर्भिण्यामपि कारयेत्॥ सहोपनी

अ० प्र०
१२५

ममास्य कुमारस्य प्राप्तजन्मसिद्धवेदाध्ययनाधिकारार्थमुपनयनं करिष्ये तदंगं स्व० वन

स्याकुर्यान्नैतदादोषोनविद्यते॥ इति चौलकर्मप्रयोगः॥ ततो वटुमात्रा सह भोजनं कृत्वा॥ देशकालौ
संकीर्त्य मम अस्य कुमारस्य उपनयनं कर्तुं तत्प्राच्यां गभ्रन्तं वापनादिकं करिष्ये॥ वपनं कृत्वा स्ना
त्वालंकृत्य कुलदेवतां नमस्कृत्य आचार्यसमीपस्थ अंतः पटं धृत्वा मंगलघोषेण दृष्टं अंतः
पटं विसृज्य मुखसम्यगीक्षेत॥ ततः आचार्येण स्वदक्षिणभागे वटुमुपवेशयेत्॥ येयज्ञे
नेनिवाल्मणेः पंचवर्गैस्तूक्तं पठेत॥ ७७ येयज्ञेन दक्षिणया सम क्ताइंद्रस्य सख्यममृतत्वमा
नश॥ तेभ्यो भद्रमंगिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः॥ य उदाजन्पितरो गो
मयं वस्वृतेनाभिंदन्परिवत्सरे वलं॥ दीर्घायुत्वमंगिरसो वो अस्तु प्रतिगृभ्णीत मानवं सु

मी० का० ने
नी० श्री० मेद
प० तिo कु०
स्पा० नं पू० न
वक्त्री तिo॥

१२५

मे०॥ य ऋतेन सूर्यमारोहयं दिव्यप्रथयं पृथिवीं मातरं वि॥ सुप्रजास्त्वमंगिरसो वो अस्तु प्र०॥ अयं नाभा
वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन॥ सुब्रह्मण्यमंगिरसो वो अस्तु प्र०॥ विरूपास इदृषय
स्त इद्गंभीरवेपसः॥ ते अंगिरसः सूनवस्ते अग्नेः परिजज्ञिरे॥ १॥ ये अग्नेः परिजज्ञिरे विरूपा
सो दिवस्परि॥ नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते॥ इंद्रेण युजा निः सृजंत वाघतो व्रजं
गोमंतमश्विनं॥ सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेषु क्रत॥ प्र नूनं जायतामयं मनुस्तो
क्मेव रोहतु॥ यः सहस्रं शताश्वं सद्यो दानाय मंहते॥ न तमश्नोति कश्चन दिव इव सान्वार
भं॥ सावर्ण्यस्य दक्षिणा वि सिंधुरिव पप्रथे॥ उत दासा परिविषे स्मद्दिष्टी गोपरीणसा॥ य

अ०प्र०
१२५

दुरस्त्व॑र्वश्र्मामहे॥ सहस्रदा ग्रामणीर्मारिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा॥ सावर्णेर्देवाः प्रतिरं
त्वायुर्यस्मिन्नश्रांता असनाम वाजं॥११॥ परावतो ये दिधिषंत आप्यं मनुप्रीतासो जनिमा विवस्व
तः॥ ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधिब्रुवंतु नः॥ विश्वा हि वो नमस्यानि वंद्या नामा
नि देवा उत यज्ञियानि वः॥ ये स्थ जाता अदितेरद्भ्यः स्परि ये पृथिव्यास्ते म इह श्रुता हवं॥ येभ्यो मा
ता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः॥ उक्थशुष्मान्वृषभरान्स्वप्नसस्तां आदित्यां
अनुमदा स्वस्तये॥ नृचक्षसो अनिमिषंतो अर्हणा बृहद्देवासो अमृतत्वमानशुः॥ ज्योतीरथा
अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये॥ संम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता

वो
१२५

२

दधिरे दिवि क्षयं॥ तां आ विवास नमसा सुवृक्तिभिर्महो आदित्यां अदितिं स्वस्तये॥ ३॥ को वः स्तोमं
राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन॥ को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्व
स्तये॥ येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः॥ त आदित्या अभयं श
र्म यच्छत सुगा नः कर्त सुपथा स्वस्तये॥ य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मंत
वः॥ ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये॥ भरेष्विंद्रं सुहवं हवामहेंहोमुचं सु
कृतं दैव्यं जनं॥ अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये॥ सुत्रामाणं पृथिवीं द्या
मनेहसं सुशर्माणमदितिं सुप्रणीतिं॥ दैवीं नावं स्वरित्रामनागसमस्रवंतीमारुहेमा स्वस्तये॥

ता

अ०प्र०
१२६

॥४॥ विश्वेयजत्रा अधिवोचतोतये त्रायध्वंनोदुरेवाया अभिह्रुतः ॥ सत्ययावोदेवहूत्याहुवेमशृण्व
तोदेवा अवसेस्वस्तये ॥ अपामीवामपविश्वामनाहुतिमपारातिंदुर्विदत्रामघायतः ॥ आरेदेवाद्वे
षो अस्मद्युयोतनोरुणः शर्मयच्छतास्वस्तये ॥ अरिष्टः समर्तोविश्वएधतेप्रप्रजाभिर्जायतेधर्म
णः स्परि ॥ यमादित्यासोनयथासुनीतिभिरतिविश्वानिदुरितास्वस्तये ॥ यंदेवासोवथवाजसा
तोयंशूरसातामरुतोहितेधने ॥ प्रातर्यावाणंरथमिंद्रसानसिमरिष्यंतमारुहेमास्वस्तये ॥ स्व
स्तिनः पथ्यासुधन्वसुस्वस्त्यप्सुवृजनेस्वर्वति ॥ स्वस्तिनः पुत्रकृथेषुयोनिषुस्वस्तिरायेमरु
तोदधातन ॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्यभियावाममेति ॥ सानोअमासोअरणेनिपा

श्री
१२६

तुस्वावेशाभवतुदेवगोपा ॥ आदित्याकृष्णवसवोजुषंतेएवाहुतेः स्तनुरवीरधद्धोविश्वेआदित्या
अदितेमनीषी ॥ ईशानासोनरोअमर्त्येनास्तावि जनोदिव्योगयेन ॥ ५ ॥ नदस्क० ॥ गर्होवै० ॥ स्व
प्रतिष्ठितमस्तु ॥ आचम्यप्राणानायम्य ॥ सुमुखश्चेत्यादिगणपतिस्मरणपूर्वकंदेशकालौ
संकीर्त्यउपनयनांगभूतंस्थंडिलादिकरिष्ये ॥ उल्लेखनादि अग्निध्यानांतंकृत्वा ॥ क्रियमा
णोउपनयनहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ अस्मिन्न न्वाहितेग्नावित्यादि
आघारांतमुक्त्वाऽत्रप्रधानंत्रिरग्निंपवमानंप्रजापतिंचआज्यद्रव्येणशेषेणस्विष्टकृत
मित्यादिसद्योयक्ष्येइत्यंतमुक्त्वा ॥ व्याहृतिभिरग्नावाधायपरिसमूहनादिआज्यसंस्का

रांतमुक्त्वा॥अत्र कारिका॥आऽस्य संस्कारपर्यंतं उपस्थेपादि पूर्ववत्॥परिधानं मवेदस्य वास
से वारुणेन तु॥आचार्योग्नेः पश्चादवस्थाय कुमारं प्राङ्मुखमवस्थाप्याहतेन वाससा संवीतं
कौपीनं धारयेत्॥युवं वस्त्राणीत्यो च थ्योर्दीर्घतमा मित्रावरुणौ त्रिष्टुप्॥वासो धारणे वि०॥
ॐ युवं वस्त्राणि०॥प्रावरणार्थं काषायवस्त्रं कृष्णाजिनं वा धारयेत्॥तच्च॥अंगुलं तु वा हि
लोमयस्यात्र तु रंगुलं॥अजिनं धारयेद्धि प्रचतुर्विंशत्यास्त्र इषोडशो॥मित्रस्य चक्षुरित्य
स्य वामदेवोऽजिनं त्रिष्टुप्॥अजिन धारणे वि०॥ॐ मित्रस्य चक्षुर्धरुणं बलीयस्ते जोयशा
स्विस्थविरं समिद्धं॥अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेऽहं॥ततो यज्ञोपवी

तत्र शिबाद्धं मुधार्य ×प२

यज्ञोपवीतं धा
रये त् ३

तमिति मंत्रस्य परब्रह्मपरमात्मा त्रिष्टुप्॥श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं यज्ञोपवीत धारणे
वि०॥यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवी
तं बलमस्तु तेजः॥इति मंत्रं वा चयित्वा धारयेत्॥कुमार आत्मनोग्नेश्च मध्येन यज्ञपात्रोत्तर
भागे गमयित्वा तत्र विधिवदाचम्य पुनस्तथैवानीयस्वदक्षिण उपवेश्य॥बर्हिरास्तरणादि स्रु
वसंमार्जनांतं कृत्वा॥ब्रह्मचार्यन्वारब्ध आद्ध्मा धानाद्याघारांतं कृत्वा प्रधानाज्याहुती जु
हुयात्॥अग्न आयूंषि पवस इति तिसृणां शतं वैखानसा ऋषयः॥अग्निः पवमानो दे
वता॥गायत्री छंदः॥उपनयनप्रधानाज्यहोमे वि०॥ॐ अग्न आयूंषि पवस०॥अग्नये

कुमारस्य स्याचेत्व सीध्यर्थे सानेत देवता वृष्पर्येन अंजलि क्षारणं करिष्ये ।

अ० प्र०
१२८

पवमानायेदं०॥ अग्निर्ऋषि० अग्नये पवमानायेदं०॥ अग्ने पवस्व० अग्नये पवमानायेदं०॥
प्रजापते०॥ प्रजापतय इदं०॥ चौलवच्चतुर्भिराज्याहुती हुत्वा यथाक्रमेण त्यागं कुर्यात्॥ अ
थाचार्यः उदगग्नेः प्राङ्मुखस्तिष्ठेत्॥ कुमारोपि अग्न्याचार्ययोर्मध्येन गत्वा आचार्याभिमुख
स्तिष्ठेत्॥ ततः आचार्यः शुद्धोदकेन शिष्यांजलिमापूर्य स्वस्यांजलिमन्येन पूरयित्वा॥ तत्स
वितुरित्यस्य श्यावाश्वः सविता नुष्टुप्॥ अवक्षारणे वि०॥ ॐ तत्सवितुर्वृणीमहे वयं देवस्य
भोजनं॥ श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥ अनेन स्वांजल्युदकेन शिष्यांजल्यां अवक्षार्य
तज्जलं कुमारो अंजलिनैवावक्षारयेत्॥ ततः वेदोहि स्तं गृह्णीयात्॥ तत्र मंत्रः॥ देवस्य त्वास

श्री
१२९

शिष्यत्व सिद्ध्यर्थं

[illegible] रक्षणार्थं व्रतपतये [illegible] आदित्याय [illegible] मीति मनसा स्मरन्

वितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यमुकशर्मन्॥ इति कुमारस्याभिवादनिकं ना
म शर्मान्तं संबुध्यान्निर्दिश्य स्वदक्षिणहस्तेन कुमारस्य सांगुष्ठं दक्षिणपाणिं गृहीत्वा॥ पुनरपि
पूर्ववत् द्विवारं कार्यं॥ तत्र सविता ते हस्तमग्रभीत्॥ असाविति द्वितीयो हस्तग्रहणे मंत्रः॥ अ
ग्निराचार्यस्तवेति तृतीयो हस्तग्रहणे मंत्रः॥ अथाचार्यः ब्रह्मचारिणा सह निष्क्रम्य देव सवित
रेष ते ब्रह्मचारिणं गोपाय स मा मृतेत्युक्त्वाचार्यो ब्रह्मचारिणा आदित्यमीक्षयेत्॥ ततः उभावपि
पूर्ववत्॥ उत्तरतोग्नेः अन्योन्याभिमुखौ तिष्ठतां॥ अथाचार्यः॥ कस्य ब्रह्मचार्यसि प्राणस्य
ब्रह्मचार्यसि॥ कस्त्वा कमुपनयते॥ काय त्वा परिददामीति मंत्रं जप्त्वा॥ युवा सुवासा इत्यस्य

बटुं दर्भैः परिसमूहनं पर्युक्षणं च कृत्वा ।

कौशिको विश्वामित्रो यूपस्त्रिष्टुप् ॥ दर्भाईचस्य प्रदक्षिणावर्त्तने उत्तरार्द्धर्चस्य पाणिभ्यां बटुहृदयालं
बने वि० ॥ ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ इत्यर्द्धर्चमुच्चारयन् बटुं
प्रदक्षिणमावर्त्य प्राङ्मुखमवस्थापयेत् ॥ ततः कुमारांसयोरुपरि स्वपाणी गमयित्वा ॥ तं धीरासः कवय उन्नयंति स्वाध्यो३ मनसा देवयंतः ॥ ततः आचार्य आत्मानमग्निं चांतरेण बटुं नीत्वा
प्रत्यगग्नेः स्वयमुपविश्य स्वदक्षिणतः प्राङ्मुखं बटुमुपवेशयेत् ॥ ततो बटुः समिधमादाय ॥ अग्न
ये समिधमित्यस्य हिरण्यगर्भोग्निर्बृहती ॥ समिधादाने वि० ॥ ॐ अग्नये समिधमाहार्षं बृ
हते जातवेदसे ॥ तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहा ॥ अग्नय इदं ॥ ततः पाणिं प्रक्षा

ल्याग्निमुपस्पृशेत् ॥ ॐ तेजसा मा समनज्मीति संरतोष्ठद्वयं मुखं मनाक् निमज्य पाणिं प्रक्षाल्य तथैव द्विवारं कुर्यात् ॥ ततस्तिष्ठन् ॥ मयि मेधामिति षण्णां हिरण्यगर्भ ऋषिः ॥ द्वयोस्त्रयाणामग्नींद्रसूर्यो देवता ॥ उत्तरत्रयाणामग्निर्देवता ॥ गायत्री छंदः ॥ अग्न्युपस्थाने वि० ॥ ॐ मयि मेधां मयि प्रजां
मय्यग्निस्तेजो दधातु ॥ मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु ॥ मयि मेधां मयि प्रजां
मयि सूर्यो भ्राजो दधातु ॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं ॥ यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भू
यासं ॥ यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासं ॥ इति षण्मंत्रैरग्निमुपस्थाय ॥ मा नस्तोके इति कुत्सो
रुद्रो जगती ॥ विभूतिग्रहणे वि० ॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरि

× मि। आचार्येण आयुष्मान्भव सौम्य देवदत्त। [illegible] बटुः सावित्र्युपदेशं वांछते -
अधीहि भोः सावित्रीं भोः अनुब्रूहि

अ०प्र०
१३०

षः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतः सदमित्वाहवामहे॥त्र्यायुषंजमदग्नेर्ललाटे॥कश्यप
स्यत्र्यायुषंकंठे॥अगस्त्यस्यत्र्यायुषंनाभौ॥यद्देवानांत्र्यायुषंदक्षिणस्कंधे॥तन्मेअस्तु
त्र्यायुषंवामस्कंधे॥शतायुषमितिशिरसि॥बलायुषमितिसर्वांगे॥पुनःपरिसमूहनपर्युक्ष
णेकृत्वा॥कृतांजलिस्तिष्ठेत्॥ॐचमेस्वरश्चमेयज्ञोपचतेनमश्च॥यत्तेन्यूनंतस्मैतउपय
त्तेअतिरिक्तंतस्मैतेनमः॥अग्नयेनमः॥स्वस्तिश्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं॥
आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहनश्रीदेहिमेहव्यवाहनोन्नमोनमः॥इत्यग्निमुपस्था
य॥ततोआचार्यःगायत्र्युपदेशंकुर्यात्॥गायत्रीलिखनपूजनंकृत्वा॥अमुकगोत्रोमुकश

श्री
१३०

अग्नेरुत्तरतोगत्वा प्रत्यङ्मुखो भूमावाचार्याभिमुखो भूत्वा दक्षिणं जानु भूतले निधाय पाणिभ्यां
पद्या सव्य दक्षिणं [illegible] संस्पृश्य व्यस्त पाणिराचार्यस्य दक्षिण पादं स्व दक्षिण हस्तेन सव्यं च
सव्यहस्तेन आ अङ्गुष्ठप्रभृति पाद पर्यंत स्पृष्ट्वा अमुक गोत्रो मुक शर्माहं भो गुरोः अभिवाद

× तदंजलिं तत्परिधानीयवाससाच्छाद्य स्वपाणिभ्यां तदंजलिं परिगृह्य ॥

स

र्माहंभोगुरोअभिवादयामिइत्युच्चारयेत्॥शिरोवनतिपूर्वकमभिवाद्यआचार्येणआयुष्मान्भवसौम्यदे
वदत्तशर्मा३अ॥अत्रमनुराह॥आयुष्मान्भवसौम्येतिवाच्योविप्रोभिवादने॥अकारश्चास्यनाम्नो
न्तेवाच्यःपूर्वाक्षरःप्लुतः॥ज्ञात्वाचोपसंगृह्णीयात्॥सावित्र्युपदेशंवांछन्अधीहिभोसावित्रीभो
अनुब्रूहिइतिवटुःअनुब्रूयात्॥ततआचार्यस्तस्यवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वा
ह॥तत्रकारिका॥ॐभूर्भुवःस्वःपूर्वांतुसावित्रींवाचयेदथ॥पादंपादंचसावित्र्याःस्वयमुक्त्वावाचये
त्॥ततस्त्वर्द्धर्चमर्धर्चंसर्वांतामथवाचयेत्॥एवंक्रमशःकृत्स्नांयथाशक्तिवाचयेत्॥प्रणवस्यपर
ब्रह्मऋषिः॥परमात्मादेवता॥देवीगायत्रीछंदः॥व्याहृतिनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती॥गाय

स्व पाणि उत्तानीकृत्य दक्षिण पाणिं न्यङ्मुखीकृत्य संधाय पाणी पृष्ठ [illegible] मंगुली आंगुष्ठौ
च वृद्धीकृत्य कृतं ब्रह्मांजलिं दक्षिणाकेनिधाय पाच्याभिमुख मासीत ॥ अथाचार्यः ×

प्रणवव्याहृतिपूर्विकां गायत्रीं पच्छोऽर्धर्चशः सर्वां- अशक्तौ यथाशक्ति वा- निवारस्वयमुक्त्वा वाचयेत् ॥

अ० प्र०

१३१

ष्या विश्वामित्रः सविता गायत्री ॥ उपनयने वि० ॥ गायत्रीं वाचयित्वा पादार्धऋक्क्रमेण वाचयेत् ॥ ततः मम व्र
त इति मंत्रस्य प्रजापति ऋषिः ॥ बृहस्पतिर्देवता ॥ त्रिष्टुप् छंदः ॥ वटोर्हृदये ऊर्ध्वांगुलिपाणिनिधाने
वि० ॥ ॐ मम व्रते ते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु ॥ मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा
नियुनक्तु मह्यं ॥ स्वपाणिं ऊर्ध्वांगुलिं ब्रह्मचारिणो हृदयदेशे निधाय ॥ मेखलां बध्नीयात् ॥ इयं दुरुक्ता
दिति द्वयोर्वामदेवो मेखला त्रिष्टुप् ॥ मेखलाबंधने वि० ॥ ॐ इयं दुरुक्तात्परिबाधमाना शर्म वरूथं
पुनती न आगात् ॥ प्राणापानाभ्यां बलमाभरंती प्रिया देवानां सुभगा मेखलेयं ॥ ऋतस्य गोप्त्री तप

श्री

सः परस्पी घ्नती रक्षः सहमाना अरातीः ॥ सा नः समंतमनु परीहि भद्रया भर्तारस्ते मेखले मा

१३१

(तस्य रक्षार्थं शुध्यन्ति)

मेखलां निराचष्टे माणवकदेशे ग्रंथिमंत्रं भूमौ । तदा बटुः - स्वस्तस्यांग सहित वेदभयेन आवृत्तोऽहं पिति मन्येत । तत आचार्यः ।

रिषाम ॥ इति मेखलां बध्वा ॥ पालाशदंडं दद्यात् ॥ स्वस्ति न इत्यस्य स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप् ॥

इति मंत्रेण दंडं दद्यात्

दंडदाने वि० ॥ ॐ स्वस्ति नो मिमीतां ०००० ॥ तत्तो वटोर्हस्तद्ग्रहणे मंत्रः ॥ अदांतं दमयित्वा मां मार्गे
संस्थापयन्स्वयं ॥ दंडः करे स्थितो यस्मात्तस्माद्रक्षयतो भयं ॥ इति वाचयेत् ॥ ततः कुमारस्य आचा
रमादिशेत् ॥ ब्रह्मचर्यसि ॥ आचमनं कुरु मूत्रपुरीषादौ शुद्ध्यर्थमित्यर्थः ॥ कर्म कुरु ॥ संध्योपासनादि

अधोज्ञान

त्यर्थः ॥ दिवा मा स्वाप्सीः ॥ दिवा निद्रां न कुर्वित्यर्थः ॥ आचार्याधीनो वेदमधीष्व ॥ सायं प्रातर्भिक्षेथाः
॥ सायं प्रातः समिधमाधेहि ॥ द्वादश वर्षाणि वेदग्रहणांतं वा ब्रह्मचर्यं चरेदिति ॥ प्रैष्यार्थान्बोधये
त् ॥ ततः स्विष्टकृदादि होमशेषं समाप्य ॥ अग्निं मेधाजननांतरं सेवेत् ॥ मनुः ॥ आमेधाजननाद्

अप्रत्याख्यायिनमग्रे भिक्षेथाः । अप्रत्याख्यायिनीं वा ।

अ० प्र०
१३२

क्षेत्तमोपनयानन्तं ॥ तत्रैव सायं प्रातश्च समिधं जुहुयात्तसौ ॥ तथैव सायं प्रातरग्निकार्यं कुर्वीत ॥ त
तो अनुप्रवचनीयहोमश्चास्मिभोजनपर्याप्ततण्डुलं रूपां भिक्षां याचयेत् ॥ क्षिभिक्षापात्रमादाय ॥
आदौ मातरं भवती भिक्षां देहि ॥ अथवा पितरं भवान् भिक्षां ददातु ॥ आदिमध्यावसानेषु तु भव
च्छोपलक्षितः ॥ ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रममिति मनुः ॥ एवंरूपं भिक्षां याचयेत् ॥
न५ आचार्याय निवेदयेत् ॥ कृतस्य उपनयस्य सांगतासिध्यर्थं दशतं शतं गावा ब्राह्मणान् भोजयिष्ये ॥
ततो नाना नामगोत्रेभ्यो ब्राह्मणेभ्यः भूयसीं दक्षिणां दातुमहमुत्सृजे ॥ कर्मेश्वरार्पणं कृत्वा अहः शेषं स्त्र२ श्री
नीत्वा सायं वंदितसंध्यः औपासनायनीकाग्नेरंतिकमासीनः ॥ प्राणानायम्य देशकालौ संकीर्त्य १३२

सायमग्निकार्यं करिष्ये इति संकल्प्य परिसमुह्य पर्युक्ष्य पूर्ववत्समिधमाधाय त्रिमुखं पूर्ववन्निमज्य उक्तप्रश्न
रूपस्थायमानस्तोके इति भस्ममादाय त्र्यायुषमिति तत्तत्स्थाने पुष्पवत् कृत्वा पुनः परिसमुह्य पर्युक्षणे कृत्वा
कृतांजलिस्तिष्ठन् ओं च मइत्युपतिष्ठेत् ॥ आचार्यो स्तमिते ग्नेः पश्चात् सासीनः ॥ प्राणानायम्य तिथ्या
दिसंकीर्त्य उपनयनांगभूतं अनुप्रवचनीयहोमं करिष्ये ॥ अग्निं ध्यात्वा ॥ अघ्र्क्रियमाणे अनुप्रवच
नीयहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहिते ग्नावित्यादि आघारावाज्ये
नेत्यंतमुक्त्वा अत्र प्रधानं ॥ सदसस्पतिं सवितारं ऋषीन् प्रधानदेवताश्च रुद्रव्येण शेषेण स्विष्टकृतमि
त्यादि सद्योयक्ष्ये ॥ इध्मसमिधावग्नावाधाय ॥ अत्र चक्षुषी नस्तः ॥ चौलोपनीते त्वखिलवेणुब्रह्मौदनेदा ते१

दारपरिग्रहे चास्मान्नेव गोदानविधौ च सर्वे नैवाज्यभागौ प्रवदंति संतः॥ इति शालाला॥ ततो परिसमू
हनादि प्रणीताप्रणयनांतं कृत्वा तद्दक्षिणाद्दर्भं चतुरश्च तुरो मुष्टीस्तद्गंडी देवताभ्य यस्य विप्रवर्य भोजन
पर्याप्तं निरूप्य तथैव प्रोक्ष्य त्रिः फलीकृत्य त्रिः प्रक्षाल्य श्रपयित्वा श्रतस्थालीपाकं कृत्वा चार्यायनिवे
दयेद्गुरुः॥ ततो ब्रह्मचारिणान्वारब्धो गुरुराज्यसंस्काराद्याघारांतं कृत्वा होमं कुर्यात्॥ अवदान
धर्मेणावदायाद्दर्व्यां मुपस्तीर्य अंगुष्ठपर्वमात्रं माध्याद्गृहीत्वा दर्व्यां मोप्य पूर्वार्द्धाच्च गृहीत्वा दर्व्यां मोप्य
पश्चार्द्धादिति पंचावत्तिना चरुमभिघार्य अवत्तमभिघारयेत्॥ सदसस्पतिमिति मंत्रस्य काण्वो
मेधातिथिः सदसस्पतिर्गायत्री॥ अनुप्रवचनीयप्रधानचरुहोमे वि॰॥ ॐ सदसस्पतिमद्भुतं प्रि

यमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं स्वाहा॥ सदसस्पतय इ॰॥ तत्सवितुरित्यस्य गाथिनो वि
श्वामित्रः सविता गायत्री॥ अनु॰॥ ॐ तत्सवितुः॰ के॥ स्वाहा॥ सवित्र इदं॰॥ ॐ ऋषिभ्यः स्वाहा॥
ऋषिभ्य इदं॰॥ स्विष्टकृदादि होमशेषं समाप्य तदवशिष्टान्नेन त्र्यवरान्ब्राह्मणान्भोजयित्वा तैर्वेद
समाप्तिं वाचयेत्॥ ततो ब्रह्मचारी अक्षारलवणान्नं भुक्त्वाधः शयीत॥ इत्यनुप्रवचनीयहोमः॥ यदा
गर्जनाद्यनध्यायशंकादि तदा दिवैव चरुं श्रपयित्वा होमस्तु सायं संध्योत्तरमेव॥ तथानानध्या
य दोषः॥ तदुक्तं संग्रहे॥ न संध्यागर्जिते काले न रश्मुसा न दूषिते॥ ब्रह्मौदनं पचेदग्नौ पक्वं चेन्न नि
वर्त्तते॥ तथा॥ ब्रह्मौदनं पचेदाहूपक्वमन्नेन दुष्यति॥ तथा चोपनयनानुप्रवचनीयचरुश्रपणयो

नांदीश्राद्धोत्तरं मार्जितेन अनध्यायः ध्यर्मेसिध्यो नांदीश्राद्धे कृते
कृते पश्चादनध्यायस्त्वकालिकः।१८ गोदापनयनं कार्यं चेदारं भंनकार

रनंतरानध्यायेपुनरुपनयनं॥ एषप्रयोगः॥स्वस्वकालकृतपूर्वसंस्कृतस्यासंस्कृतस्यतुविशेषउच्य
ते॥आचार्यः॥उपनयनात्पूर्वदिनेवटुनासह मंगलस्नातःप्राणानायम्यतिथ्यादिसंकीर्त्यगर्भाधा
नइत्यादिपूर्ववत् संकल्पंकृत्वापूर्ववत्प्रायश्चित्ता ज्याहुतीर्हुत्वाअतीतानिजातकर्मादीनिकृत्वा
पूर्वोक्तप्रकारेणोपनयनांतंतंत्रंसर्वमाचरेत्॥ अथमेधाजननप्रयोगः॥स्वगृहेत्रिमेखलांवेदिंकृत्वा
तस्यामार्द्रीसमूलांपलाशशाखांकुशस्तंभंवाप्रतिष्ठाप्यपूजांकुर्यात्॥तत्रक्रमः॥तिथ्यादिसं
कीर्त्यममकुमारस्यउपनयनव्रतसमाप्तिवेदवेत्तृग्रहणसामर्थ्यलक्षणमेधासिद्धिद्वारा श्री०मेधा
जननाख्यंकर्मकरिष्ये॥यथाचारंस्वस्तिवाचनंकृत्वा॥पूर्वोक्तफलसिध्यर्थंमेधापरनामकसा

आदौनिर्विघ्नतासिध्यर्थंमहागणपतिपूजनेपूर्वकंकर्मणः पुण्याहवा
चनंचकरिष्ये॥

यावकस्तु मोरकभिप्रमेनं विचे०

वित्रीपूजांकरिष्ये॥पलाशशाखायांमेधायैनमः॥इतिनाममंत्रेण आवाह्यउपचारान्कृत्वाब्रह्मचा
रिणाप्रक्षेमध्यशुद्धजलमादायपात्रोदकेनसेचनंकृत्वावटुनात्रिःप्रदक्षिणंकारयेत्॥ॐसुश्र
वःसुश्रवाअसियथात्वंसुश्रवःसुश्रवाअस्येवंमांसुश्रवःसौश्रवसंकुरु॥यथात्वंदेवानांय
ज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासं॥इतिप्रतिप्रदक्षिणमंत्रावृत्तिः॥
प्रणामंचकारयेत्॥ततोब्रह्मचारीपूर्ववत्यज्ञोपवीतादीनिमंत्रेणधारयेत्॥पुराणानिपला
शसन्निधौविसृज्यगुरवेदत्वा॥मेधामह्यमितिस्तंविप्रेपाठयित्वा॥ॐमेधामह्यमंगिर
सोमेधांसप्तऋषयोददुः॥मेधामिंद्रश्चाग्निश्चमेधांधातादधातुमे॥मेधांमेवरुणोराजामे

अ०प्र०

१३५

धांदेवी सरस्वती॥ मेधांते अश्विनौ देवावाधत्तां पुष्करस्रजा॥ यां मेधा अप्सरसो गंधर्वेषु च यन्मनः॥ देवी यामानु
षीमेधा सामामाविशतादुमां॥ यन्मे नोक्तं तद्रमतां शकेयं यदनुब्रुवे॥ निशामितं निशामयेमयि श्रुतं सहप्रिये
णभूयासं ब्रह्मणा संगमेमहि॥ शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहे॥ अरक्षमहमसौ सूर्यो ब्रह्म आनीपी
स्थः श्रुतं मे माप्रहासीत्॥ मेधांदेवीमनसा रेजमानां गंधर्वजुष्टां प्रति नो जुषस्व॥ मत्यं मेधां वदमत्यं श्रियं व
दमेधावी भूयासमजराजरिष्णु॥ सदसस्पतिमद्भुतं प्रि० ऋ० १॥ यां मेधां देवगणाः पितरश्चोपासते॥ तया
मामद्य मेधयाग्ने मेधाविनं कुरु॥ मेधाव्य १ हं सुमनाः सुप्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः॥ महायशा
धारयिष्णु प्रयुक्ताभूयासमर्थे स्वधया प्रयोगे॥ इत्याचौलान्मेधाजननांतं संक्षेपेण प्रयोगः॥ अथ देवको

श्री

१३५

कृ त्वास्य० मस्य स्म० धांतु दे०

४ लग्न स्मते दृवंतं स्वम रे॥ उपुर्यंतु म त: सुद

स्थापनमंडपोद्वासनविधिः॥ तत्र कालः॥ समे च दिवसे कुर्याद्देवकोत्थापनं बुधः॥ षष्ठं च विषमे नेष्टमुत्कापं चमस
सप्तमे॥ समे षुषष्ठविषमेषु पंचमसप्तमातिरिक्तं दिनं नात्रेष्टमित्यर्थः॥ उक्तकाले मंडपांतः सपत्नीकः स्वासने उ
पविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्यामुकउपनयनांगत्वेन स्थापितदेवतानामुत्थापनं मंडपोद्वासनं पुण्या
हवाचनं च करिष्ये॥ आवाहितदेवतानां पंचोपचारैः पूजां कृत्वा॥ उत्तिष्ठब्र० अनेन मंत्रेणोत्थाप्य॥ मंगलघोषेण
बहिरंगेण आनीय भगवत्यादीनां तैलाभ्यंगो हरिद्रोच्छोदकेन स्नानानि कारयित्वा वेष्टनसूत्रमुन्मुच्य ततो द्विजैः
अभिषेकः कार्यः॥ पुरोधास्तच्छाखादिवंशपात्रे निधाय तदुपरि जलं क्षिप्त्वा सकुटुंबयजमानशिरसि किंचिद्धारं
येत्॥ प्रेतिचेतिचेत्येते द्वे सर्वे स्वस्त्ययनं यत्खेनि चेति चेतिनद्यो स्यप्रियस्यात्र मेते नानुमं त्रयेत प्रेति चेति चेतिस्त

नेबुद्धे प्रा
प्र मेधा स्व

आदौ निर्वि० धं महागणपति स्तजनक० गणपति स्तजां कृत्वा॥ आवाहितदेवताभ्यो नमः चंद
चोपचारपूजां कृत्वा॥ उत्तिष्ठब्र० उत्थाप्य। अंगणमानीय भगवत्यादीनां अभ्यंगस्नानादि
कृत्वा। धांतु देवगणा० मंडपस्य ईशानके विस्तरस्ततः स्वस्ति वाचन कृत्वा। ४

रुनयोःदेवा कोथा०   २ अस्माकं लेश्रसु
                                    त्रेषदृनु २

अ० प्र०
१३६

स्येवगछतिस्वस्तिपुनरागछति॥ इति ब्राह्मणंपठेत्॥ एवंत्रिवारंकुर्यात्॥ ततः ~~कर्मिकृतं अविरसमोते यज्ञमुः~~
मासेषुशोभनामस्तिनि भवंतः ते तौ॥ इतिद्विजान्प्रार्थयेत्॥ ते चतथाब्रूयुः॥ शोभनमस्तु॥ ततो द्विजांश्चदक्षि
णादिनातोषयेत्॥ ॐ तस्यदेवकोत्थापनमंडपो ह्यासनसांगतासिध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये॥ तथै
वभूयसींदत्वा॥ यस्यस्मृत्या०॥ प्रमादात्कुर्व०॥ देशाकुलाचारेणसर्वंकार्यं॥ इतिदेवकोत्थापनविधिः॥ ब्रह्मोद
नात्पूर्वंगर्जितेशांतिरेवनतुपुनरुपनयनं तदुक्तं नृसिंहप्रासादेगंगाधरपद्धतौ निर्णयसिंधौच॥ अत्रे०प्रनेवि
धेः पूर्वंप्रदोषेगर्जितंभवेत्॥ तदाविभ्रकवंक्षेयंवटोरध्ययनस्यतत्॥ तस्यशांतिंप्रकारंतुवक्ष्येशास्त्रानुसारतः॥
प्रधानंपायसंसाज्यंद्रव्यंशांतियज्ञौभवेत्॥ गायत्रीहोममंत्रस्याजुहुयादष्टशतंततः॥ श्रीमच्छेषं समा

श्री
१३६

प्याथततः कुर्याद्विसर्जनं॥ सूक्तं बृहस्पतेविद्वान्पठेस्त्रज्ञाविवृद्धये॥ अथवा॥ यस्तस्तंभेतिसूक्तं चपठेत्स्रज्ञां वि
वृद्धये॥ धेनुंसवत्सकांदद्याद्‌आचार्यायपयस्विनीं॥ ब्राह्मणान्भोजयेत्सश्चात्ततोब्रह्मौदनंचरेत्॥ इदं तु लग्नोत्तरं
गर्जनसंभावना चेत् चरुर्न कृतः तदायंविधिः॥ चरु विषयस्तुवक्ष्यते॥ एतत्प्रातर्गर्जितेसायंगर्जितेद्विनैव
चरुं श्रपयित्वा॥ सायंसंध्योत्तरंहोमं कुर्यात्॥ संकल्पादिपात्रासादनादिसंध्याकालेकर्त्तव्यं॥ सिद्धोमंत्राःसं
योक्तव्या इतिवत्॥ उपनयनोत्तरंमध्याह्नेमध्याह्नसंध्याकर्त्तव्येतिप्रयोगपारिजातकारः॥ मध्याह्नसंध्यान
कर्त्तव्येतिकृष्णभट्टाः॥ अनुष्ठानमेतादृशं अष्टमाष्टके द्वितीयाध्याये बृहस्पते प्रथमंवाचो अग्रमितिद्वादश
र्चं सूक्तं॥ बृहस्पते प्रथमंवाचोअग्रंयत्प्रैरतनामधेयंदधानाः॥ यदेषांश्रेष्ठंयदरिप्रमासीत्प्रेणातदेषांनिहितंगु

श्रीगणेशाय नमः

ह्वाविः॥ सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत॥ अत्रासखायःसख्यानिजानतेभद्रैषांलक्ष्मी
र्निहिताधिवाचि॥ यज्ञेनवाचःपदवीयमायंतामन्वविंदन्नृषिषुप्रविष्टां॥ तामाभृत्याव्यदधुःपुरुत्रातांसप्तरेभाअ
भिसंनवंते॥ उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनां॥ उतोत्वस्मैतन्वं१विसस्रेजायेवपत्यउशती
सुवासाः॥ उतत्वंसख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु॥ अधेन्वाचरतिमाययैषवाचंशुश्रुवाँअफलाम
पुष्पां॥ २३॥ यस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभागोअस्ति॥ यदींशृणोत्यलकंशृणोतिनहिप्रवेद
सुकृतस्यपंथां॥ अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः॥ आदघ्नासउपकक्षासउत्वेह्रदाइव
स्नात्वाउत्वेददृश्रे॥ हृदातष्टेषुमनसोजवेषुयद्ब्राह्मणाःसंयजंतेसखायः॥ अत्राहत्वंविजहुर्वेद्याभिरोह

ब्रह्माणोविचरंत्युत्वे॥ इमेयेनार्वाङ्नपरश्चरंतिनब्राह्मणासोनसुतेकरासः॥ तएतेवाचमभिपद्यपापयासि
रीस्तंत्रंतन्वतेअप्रजज्ञयः॥ सर्वेनंदंतियशसागतेनसभासाहेनसख्यासखायः॥ किल्बिषस्पृत्पितुषणि
र्ह्येषामरंहितोभवतिवाजिनाय॥ ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्वरीषु॥ ब्रह्मात्वोवदतिजा
तविद्यांयज्ञस्यमात्रांविमिमीतउत्वः॥ २४॥ तृतीयाष्टकेसप्तमाध्यायेअंत्यवर्गद्वयं॥ अथवा॥ यस्तस्तंभस
हसाविज्मोअंतान्बृहस्पतिस्त्रिषधस्थोरवेण॥ तंप्रत्नासऋषयोदीध्यानाःपुरोविप्रादधिरेमंद्रजिह्वं॥ धुनेत
यःसुप्रकेतंमदंतोबृहस्पतेअभियेनस्ततस्रे॥ पृषंतंसृप्रमदब्धमूर्वंबृहस्पतेरक्षतादस्ययोनिं॥ बृहस्पतेया
परमापरावदतआतऋतस्पृशोनिषेदुः॥ तुभ्यंखाताअवताअद्रिदुग्धामध्वःश्चोतंत्यभितोविरप्शं॥ बृहस्पतिः

अ०प्र०
१३८

प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्॥ सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि॥ स सुष्टुभा स ऋक्कता गणेन वलं रुरोज फलिगं रवेण॥ बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत्॥५॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः॥ बृहस्पते सुप्रजा वीरवंतो वयं स्याम पतयो रयीणां॥ स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण॥ बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वंदते पूर्वभाजं॥ स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीं॥ तस्मै विशः स्वयमेवा नमंते यस्मिन्ब्रह्मा राजनि पूर्व एति॥ अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या॥ अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवंति देवाः॥ इंद्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मंदसाना वृषण्वसू॥ आ वां विशंत्विंदवः स्वाभुवो

श्री
१३८

ऽस्मे रयिं सर्ववीरं नि यच्छतं॥ बृहस्पत इंद्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे॥ अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः॥ इति एकादश चरुस्तं॥ इति उपनयनदिने गर्जनप्रायश्चित्तविधिः॥ प्राप्ता नायम्यति ध्यादि संकीर्त्य प्रमादात् नष्टस्योपनयनाग्नेः पुनः कमतिकरिष्ये॥ तदंगं स्थंडिलादि अग्निध्यानांतं कृत्वा॥ क्रियमाणे अस्मिन्होमे देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहितेग्नावित्यादि आघारांतमुक्त्वाऽत्र प्रधानं त्रिरग्निं पवमानं प्रजापतिं चाज्यद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योप क्ष्येसंतमुक्त्वा॥ इध्मसमिधमग्नावाधाय॥ परिसमूहनादि आघारांतमुक्त्वा॥ प्रधानाज्याहुतीर्जुहुयात्॥ अग्न आयूंषि पवस इति तिसृणां०॥ उपनयननष्टस्याग्निप्रायश्चित्तप्रधानाज्यहोमे वि०॥ अग्न आयूं

॥ १ ॥

अ० प्र०
१३८

षि०॥अग्निर्ऋषि०॥अग्नेपवस्व०॥प्रजापते०॥स्विष्टकृदाहोमशेषंसमाप्य॥यस्यस्मृत्या०॥इति
उपनयनन ष्टस्याग्निप्रायश्चित्तं॥अथोपाकर्मोत्सर्जनप्रयोगः॥पुष्येत्तूत्सर्जनंकुर्यादुपाकर्मदिने
थवेभिरवादिरगृह्ये॥अत्रकारिका॥अध्यायानामुपाकर्मश्रावण्यांश्रवणेनतु॥तन्मासेहस्तयु
क्तायांपंचम्यांवातदिष्यते॥अरुष्टोषधयस्तस्मिन्मासेतुनभवंतिचेत्॥तदाभाद्रपदेमासिश्रव
णेनकरोतितत्॥अथप्रयोगः॥आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममाध्याय्यानांचाधी
तानांछंदादीनांयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंउत्सर्जनाख्यंकर्मक
रिष्ये॥तदंगंस्थंडिलोल्लेपनोल्लेखनाग्निप्रतिष्ठापनंचकरिष्ये॥अग्निध्यानांतंकृत्वा॥क्रियमा

श्री
१३८

णेउत्सर्जनहोमेदेवतापरिग्रहार्थमित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा०अत्रप्रधानं॥सावित्रीं१ब्रह्माणं२
श्रद्धां३मेधां४प्रज्ञां५धारणां६सदसस्पतिं७अनुमतिं८छंदांस्यृषीन्९आज्यद्रव्येण॥पुनरत्र
प्रधानं॥अग्निं१अदृणस्पर्यान्२अग्निं३प्राकृतं४अग्निं५मित्रावरुणौ६अग्निं७अपः८
अग्निं९मरुतः१०अग्निं११देवव्रूस्नवर्माणि१२अग्निं१३इंद्रासोमौ१४इंद्रं१५अग्नामरुतं१६
पवमानसोमं१७सोमं१८अग्निं१९संज्ञानं२०॥एताःप्रधानदेवताःगृहसिद्धान्नद्रव्येणशेषेण
स्विष्टकृतमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वासमिद्वयमग्नावाधाय॥परिसमूहनादिदर्पपात्रनि
धानांतंकृत्वागृहसिद्धान्नमादाय आज्यसंस्कारादिआज्यभागांतंकृत्वा॥इहाज्यभागेनि

त्योस्तथैवोत्सर्जनेपिंतौ॥आहुतीर्जुहुयात्॥ॐ सावित्र्यैस्वाहा १ सावित्र्याइदं०॥ॐ ब्रह्मणे०२ब्रह्मणइ
दं०२॥श्रद्धायैस्वा०३श्रद्धायाइदं०३॥ॐ मेधायैस्वा०४मेधायाइदं०४॥ॐ प्रज्ञायैस्वा०५प्रज्ञायाइ
दं०५॥ॐ धारणायैस्वा०६धारणायाइदं०६॥ॐ सदस्पतयेस्वा०७सदस्पतयइदं०७॥ॐ अनुमतये
स्वा०८अनुमतयइदं०८॥ॐ छंदोभ्यऋषिभ्यस्वा०९छंदोभ्यऋषिभ्यइदं०९॥पंचावत्तिनः इयं ऋक्नुप
ठेत्॥प्रसूतोभक्षमकरं चरावपिस्तोमंचेमंप्रथनःसूरिरुन्मृजे॥सुतेसातेनयद्यागमंवांप्रतिविश्वामि
त्रजमदग्नीदमे॥अवदानधर्मेण चरुमवदाय॥अग्निमीळेमधुछंदाग्निर्गायत्री॥उत्सर्जनप्रधानचरुहसि न २ श्री
ष्टान्नचरुहोमेविनियोगः॥ॐ ३ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं॥होतारंरत्नधातमंस्वाहा॥ १४०

अग्नयइदं०॥कुषुंभकस्तदग्रस्योहरणस्यौअनुष्टुप्॥उत्स०एवंअग्रेपिसर्वत्रविनियोगः॥ॐ ३ कुषुंभक
स्तदब्रवीद्गिरेःप्रवर्त्तमानकः॥वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषंस्वाहा॥अहरणस्येभ्यइदं०॥
त्वमग्नेगृत्समदोग्निर्जगती॥उत्स०॥ॐ ३ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि॥त्वं
वनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिस्वा०॥अग्नयइदं०॥ॐ ३ आवदन्गृत्समदःशाकुंतोत्वं
जगती॥उत्सर्जनप्रधान०॥आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धिनः॥यदुत्पत
न्वदसिकर्करिर्यथाबृहद्वदेमविदथेषुवीराःस्वाहा॥शाकुंतायेदं०॥ॐ ३ सोमस्यमागाथिनोविश्वा
मित्रोग्निस्त्रिष्टुप्॥उत्स०॥३ सोमस्यमातवसंवक्ष्यग्नेवह्निंचकर्थविदथेयजध्यै॥देवांअच्छादीद्युंजे

॥३॥

ओतमो ३

अ०प्र०

१४१

न४

अद्रिंशमायेअग्नेतन्वंजुषस्वस्वा०॥अग्नयइदं०॥गणानाजमदग्निर्मित्रावरुणोगायत्री॥उत्स०॥ॐ
२गणानाजमदग्निनायोनावृतस्यसीदतं॥पातंसोममृतावृधास्वा०॥मित्रावरुणाभ्यामिदं०६॥
त्वंह्यग्नेर्वामदेवोग्निरष्टी॥उत्स०॥ॐ३त्वंह्यग्नेसदमित्समन्यवोदेवासोदेवमरतिंन्येरिरइतिक्रत्वा
न्येरिरे॥अमर्त्यंयजतमर्त्येष्वादेवमादेवंजनत्प्रचेतसंविश्वमादेवंजनतप्रचेतसंस्वा०॥अग्नयइदं०७॥
धामंतेवामदेवआपोजगती॥उत्स०॥ॐ३धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं१तरायुषि॥अ
पामनीकेसमिथेयआभृतस्तमश्यामधुमंतंतऊर्मिंस्वा०॥अग्नयइदं०॥८॥अबोधिबुधगविष्ठिरा
वग्निस्त्रिष्टुप्॥उत्स०॥ॐ३अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं॥यह्वाइवप्र

श्री

१४१

वयामुज्जिहानाःप्रभानवःसिस्रतेनाकमच्छस्वा०॥अग्नयइदं०९॥गंतानएवयामरुन्मरुतोजगती॥उ
त्सर्जं०॥ॐ३गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत्॥ज्येष्ठासोनपर्वतासोव्योमनियू
यंतस्यप्रचेतसःस्यातदुर्धर्त्तवोनिदःस्वा०॥मरुद्भ्यइदं०॥१०॥त्वंह्यग्नेभरद्वाजोग्निस्त्रिष्टुप्॥उत्स०॥
त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता॥त्वंसीवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसह
ध्यैस्वा०॥अग्नयइदं०॥११॥योनस्वःपायुभिरद्वाजोदेवब्रह्म[illegible]ण्यनुष्टुप्॥उत्स०॥योनस्वोअरणो
यश्चनिष्ट्योजिघांसति॥देवास्तंसर्वेधूर्वंतुब्रह्मवर्ममांतरंस्वा०॥देवब्रह्म[illegible]भ्यइदं०॥१२॥अग्निर्नरो
वसिष्ठोग्निर्विराट्॥उत्सर्जं०॥ॐ३अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं॥दूरेदृशं

ति२

अ०प्र०
१४२

गृहपतिमथर्युं स्वा० ॥ अग्नय इदं ० ॥१३॥ प्रति चस्व वसिष्ठ इंद्रासोमा वनुष्टुप् ॥ उत्स० ॥ ॐ ३ प्रति चस्व विचक्षे
इंद्रश्च सोम जागृतं ॥ रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः स्वा० ॥ इंद्रासोमाभ्यामिदं ० ॥१४॥ मा चित्प्रगाथ
इंद्रो बृहती ॥ उत्स० ॥ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ॥ इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत
स्वा० ॥१५॥ इंद्रायेदं ० ॥ आग्नेयाहि सोभरिरग्नामरुतो नुष्टुप् ॥ उत्स० ॥ ॐ ३ आग्ने याहि मरुत्सखा रुद्रेभिः सो
मपीतये ॥ सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे स्वा० ॥ अग्नामरुद्भ्य इदं० ॥१६॥ स्वादिष्ठया मधुच्छंदाः पवमा
नसोमो गायत्री ॥ उत्स० ॥ ॐ ३ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सुतः स्वा० ॥ पव
मान सोमायेदं० ॥१७॥ यत्ते राजन्कश्यपः सोमः पंक्तिः ॥ उत्स० ॥ ॐ ३ यत्ते राजंछृतं हविस्तेन सोमाभिरक्ष

मारी[illegible] १

श्री
१४२

नः ॥ अरातीवा मा नस्तारीन्मो च नः किं चनाममदिंद्रायैपरि स्रव स्वा० ॥ सोमायेदं ० ॥१८॥ अग्ने बृहन्नाप्त्यस्त्रि
तोग्निस्त्रिष्टुप् ॥ उत्स० ॥ अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वांतमसो ज्योतिषागात् ॥ अग्निर्भानुना
रुशता स्वंग आ जातो विश्वा सद्मान्यप्राः स्वा० ॥ अग्नय इदं ० ॥१९॥ समानी वः संवननः संज्ञानमनुष्टुप् ॥
उत्सर्ज० ॥ ॐ ३ समानी व आकूतिः समाना हृदयानि वः ॥ समानमस्तु वो मनो यथा वः सुसहासति स्वा० ॥ सं
ज्ञानायेदं ० ॥२०॥ इति शाकलानां ॥ तच्छंयोः शंयुर्विश्वेदेवाः शक्करी ॥ उत्स० ॥ तच्छंयोरावृणीमहे ० ॥ शं चतुष्प
दे स्वा० ॥ विश्वेभ्यो देवेभ्य इदं ० ॥ इति बाष्कलानां ॥ शाकलानां समानी व इत्यृचा हुतिर्भवेत् ॥ इति कारिकोक्तेः
॥ ततः स्विष्टकृतं हुत्वा ॥ रज्जुं भ्रहृत्य ॥ सर्वैः प्राणायामं कृत्वा ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः ॥ कूर्मो देवता ॥

दो १

।५॥

अ०प्र०
१४३

सुतलं छंदः॥ आसने वि०॥ ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चास
नं॥ अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ अपक्रामंतु भूता
नि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे॥ अनेन भूतान्युत्साद्य॥ शरावे जलं कुशां
श्चादाय॥ विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि॥ तज्जलमभिमंत्र्योपस्पृश्य हस्ते॥ दर्भगर्भं ब्रह्मांज
लिं निधाय॥ प्रणवादिस्वयमुच्चारयन्नन्यान्वक्ष्यमुपविश्य [illegible] न्वाचयेत्॥ प्रणवस्य परब्रह्म ऋषिः॥ पर
मात्मा देवता॥ दैवी गायत्री छंदः॥ व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृगव ऋषयः॥ अग्निवायुसू
र्यप्रजापतयो देवता॥ दैवी गायत्री दै[illegible] वी उष्णिक् दैवी अनुष्टुप् दैवी बृह[illegible]त्यश्छंदांसि॥

श्री
१४३

दूर्वा रोहंतु पुष्पिणीः॥ ह्रदाश्च पुंडरीकाणि समुद्र स्य गृहा इमे॥ इति दूर्वामादाय॥ गायत्र्या सदूर्वम
दकमभ्युक्ष्य॥ भूमौ निधाय॥ त्रातारमिंद्रमिति पूर्वतः॥ इंद्रमिति पूर्वतः॥ यमाय मधुमत्तमं राज्ञे हव्यं जुहो
तन॥ इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः॥ दक्षिणतः॥ तत्त्वा यामीति पश्चिमतः॥ वयं
सोम व्रते तव मनस्तनूषु बिभ्रतः॥ प्रजावंतः सचेमहि॥ उत्तरतः॥ तत्सूर्यं रोदसी उभे दोषा वस्तो
रुप ब्रुवे॥ भोजेष्वस्माँ अभ्युच्चरा सदा॥ इति उपरिष्टात्॥ अधः पश्य स्वमोपरि संतरां पादकौ ह
र॥ मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ॥ इत्यधः॥ सहस्रशीर्षा०॥ शिरसि॥ अक्षीभ्यां
ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि॥ यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते॥ मुखे॥

॥ ९ ॥

॥ अ॰ प्र॰ ॥
१४६ ॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां वि वृहामि ते॥
ग्रीवाभ्यां॥ आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि॥ यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते॥
हृदये॥ नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा॥ कवेरपत्यमा दुहे॥ नाभौ॥ त्वमिंद्र सजोषसमर्कं बि
भर्षि बाह्वोः॥ वज्रं शिशान ओजसा॥ बाह्वोः॥ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते॥ कक्षीवंतं
य औशिजः॥ कक्षयोः॥ यः कुक्षिः सोमपातमः समुद्र इव पिन्वते॥ उर्वीरापो न काकुदः॥ कुक्ष्योः॥
बृही नां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य॥ इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे नि
नद्धो जयति प्रसूतः॥ पृष्ठे॥ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां॥ यक्ष्मं श्रोणिभ्यां भा

श्री
पु॰ १४६ ॥ २

३

सदाद्भंससो वि वृहामि ते॥ ऊर्वोः॥ मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः॥ यक्ष्मं सर्वस्मादात्मनस्तमिदं वि
वृहामि ते॥ जान्वोः॥ ऋतावानस्येति पादयोः॥ अंगादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि॥ यक्ष्मं सर्वं॥
पुरुषस्य केन सर्वांगे॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥ इति
२४ सतिं दूर्वा मृदं शिरसि निधाय मृत्तिकास्थानं प्रक्षाल्य॥ तीर्थं प्रार्थयेत्॥ हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि
याचितः॥ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं॥ तन्न इंद्रो
वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः॥ इमं मे गंगे॥ इदं ते न्याभिरस समानमद्रिर्याः काश्च सिंधुं प्रव ६२
हंति न[illegible]धः॥ सर्पो जीर्णमिव त्वचं जहाति पापं स शिरस्कोऽभ्युपेत्य॥ गंगा गंगेति यो ब्रूयाद्योजना

नांशैनेरपि॥मुच्यतेसर्वपापेभ्योविष्णुलोकंगच्छति॥सुमित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयो
स्मान्द्वेष्टियंचवयंद्विष्मः॥समुद्रज्येष्ठाः०ऋ४॥एतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना॥शुद्धैरुक्थैर्वावृध्वां
संशुद्धआशीर्वान्ममत्तु॥इंद्रःशुद्धोनआगहिशुद्धःशुद्धाभिरूतिभिः॥शुद्धोरयिंनिधारयशुद्धोममद्धि
सोम्यः॥इंद्रःशुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषे॥शुद्धोवृत्राणिजिघ्नसेशुद्धोवाजंसिषाससि॥तरत्स
मंदीधावतिधारासुतस्यांधसः॥तरत्समंदीधावति॥ध्वस्रयोःउस्रावेदवसूनांमर्त्तस्यदेव्यवसः॥
तर०॥ध्वस्रयोःपुरुषंत्योरासहस्राणिदद्महे॥तरत्समंदी०॥आययोस्त्रिंशतंतनासहस्राणिच
दद्महे॥तर०॥त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः॥अग्नेदक्षैःपुनीहिनः॥पुनंतुमांदे०ऋ०६॥

पावमानीःस्वस्त्ययनीःसुदुघाहिघृतश्चुतः॥ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतंहितं॥पावमानीर्दिशंतुनः
इमंलोकमथोअमुं॥कामान्समर्द्धयंतुनोदेवैर्देवीःसमाहिताः॥येनदेवाःपवित्रेणात्मानंपुनतेसदा॥तेनसहस्र
धारेणपावमान्यःपुनंतुमां॥प्राजापत्यंपवित्रंशतोद्यामंहिरण्मयं॥तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे॥इंद्रः
सुनीतीसहमापुनातुसोमःस्वस्त्यावरुणःसमीच्या॥यमोराजाप्रमृणाभिःपुनातुमांजातवेदामूर्जयंत्यापु
नातु॥आपोहिष्ठेतितिसृभिर्मार्जयित्वा॥इमंमेगंगेत्युदकमालोड्य॥ऋतंच [illegible] सत्यंचाभीद्धा
त्तपसोध्यजायत॥ततोरात्र्यजायतततःसमुद्रोअर्णवः॥समुद्रादर्णवादधिसंवत्सरोअजायत॥अहो
रात्राणिविदधद्विश्वस्यमिषतोवशी॥सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्॥दिवंचपृथिवींचांतरि

॥१७०॥

अ० प्र०

१४८ स्ना२

क्षमथो स्वः॥ इत्यघमर्षणं कृत्वा॥ प्रवाहाभिमुखं वस्त्रं निर्मार्जयित्वा॥ आचाम्य॥ स्नानांगतर्पणं कुर्यात्॥ ब्रह्मा
दयो ये देवास्तान्देवांस्तर्पयामि॥ भूर्देवांस्तर्प०॥ भुवर्देवांस्त०॥ स्वर्देवांस्त०॥ भूर्भुवस्स्वर्देवांस्त०॥ कृष्णद्वैपाय
नादयो ये ऋषयः॥ तानृषींस्त०॥ भूरृषींस्त०॥ भुवरृषींस्त०॥ स्वरृषींस्त०॥ भूर्भुवस्स्वरृषींस्त०॥ अ
पसव्यं॥ सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताः कव्यवाहनादयो ये पितरः॥ तान्पितॄंस्त०॥ भूः पि
तॄंस्त०॥ भुवः पितॄंस्त०॥ स्वः पितॄंस्त०॥ भूर्भुवः स्वः पितॄंस्त०॥ अग्निदग्धाश्च ये जीवा ये प्यदग्धाः
कुले मम॥ भूमौ दत्तेन तोयेन तृप्ता यांतु परमां गतिं॥ जलांजलिं तटे निक्षिप्य॥ यन्मया दूषितं तोयं श
रीरमलसंभवात्॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहं॥ यक्ष्मतर्पणं कृत्वा ऋषीन्पूजयेत्॥

श्री

१४८

स्मे सुपिप्पला ओषधीर्देवगोपाः॥ स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च॥ तन्म ऋ
तं पातु शतशारदाय यूयं०॥१॥ पर्जन्याय प्रगायत दिवस्पुत्राय मीळ्हुषे॥ स नो यवसमिच्छतु॥ यो गर्भ
मोषधीनां गवां कृणोत्यर्वतां॥ पर्जन्यः पुरुषीणां॥ तस्मा इदास्ये हविर्जुहोता मधुमत्तमं॥ इळां नः
संयतं करत्॥२॥ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः॥ वाचं पर्जन्यजिन्वितां प्र मंडूका अवादिषुः॥
दिव्या आपो अभियदेनमायन्दृतिं न शुष्कं सरसी शयानं॥ गवामह न मायुर्वत्सिनीनां मंडूकानां वग्नु
रत्रा समेति॥ यदीमेनां उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायां॥ अख्खलीकृत्या पितरं न पुत्रो
अन्यो अन्यमुपवदंतमेति॥ अन्यो न्यमन्यमनुगृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां॥ मंडूको य

दभिरृष्टः कनिक्रन्त्पृश्निः संपृङ्क्ते हरितेन वाचं ॥ यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ॥
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥ ५ ॥ गोमायुरेको अजमायुरेकः पृश्निरेको हरित ए
क एषां ॥ समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः ॥ ब्राह्मणासो अतिरात्रे न सोमे स
रो न पूर्णमभितो वदंतः ॥ संवत्सरस्य तदहः परिष्ठ यन्मंडूकाः प्रावृषीणं बभूव ॥ ब्राह्मणासः सोमि
नो वाचमक्रत ब्रह्म कृण्वंतः परिवत्सरीणं ॥ अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवंति गुह्या न के
चित् ॥ देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनंत्येते ॥ संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नु
वते विसर्गं ॥ गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ॥ गवां मंडूका ददतः शतानि स

हस्रसावे प्रतिरंत आयुः ॥ उपप्लवत मंडूकि वर्षमावदथाद्दुरि ॥ मध्ये ह्रदस्य प्लवस्य निगृह्य चतुरः पदः ॥
॥ ४ ॥ अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ॥ कनिक्रदद्वृषभो जीरदानू रेतो दधा
त्योषधीषु गर्भं ॥ वि वृक्षान्हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं महावधात् ॥ उतानागा ईषते वृष्ण्यावतो
यत्पर्जन्यः स्तनयन्हंति दुष्कृतः ॥ रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ॥ दूरात्सिंह
स्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं३ नभः ॥ प्र वाता वांति पतयंति विद्युत उदोषधीर्जिहते पिन्व
ते स्वः ॥ इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥ यस्य व्रते पृथिवी नन्नमीति
यस्य व्रते शफवज्जर्भुरीति ॥ यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥ ५ ॥ दिवो नो वृष्टिम्

कृतोरद्रीध्रं प्रपिन्वन्त विष्ठो अश्वस्य धाराः॥ अर्वाङे तेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः॥
अभिक्रंद स्तनय गर्भमा धा उदन्वता परि दीया रथेन॥ दृतिं सुकर्ष विषितं न्यंचं समा भवंतूद्वतो निपादाः॥
महांतं कोशमुदचा नि षिंच स्यंदंतां कुल्या विषिताः पुरस्तात्॥ घृतेन द्यावापृथिवी व्युंधि सुप्रपाणं
भवत्वघ्न्याभ्यः॥ यत्पर्जन्य कनिक्रदत्स्तनयन्हंसि दुष्कृतः॥ प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि॥
अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ॥ अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो
मनीषां॥ ३॥ बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि॥ प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि॥ स्तो
मासस्त्वा विचारिणि प्रति ष्टोभंत्यक्तुभिः॥ प्र या वाजं न हे[illegible]षंतं पेरुमस्यस्यर्जुनि॥ दृळ्हा चिद्या व

नस्पतीन् क्ष्मया दर्धर्ष्योजसा॥ यत्ते अभ्रस्य विद्युतो दिवो वर्षंति वृष्टयः॥ वर्षीं तु ते विभावरि दिवो अभ्रस्य वि
द्युतः॥ रोहंतु सर्ववीजान्यवब्रह्म द्विषो जहि॥ ३॥ प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति॥ महीं मि
त्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिं॥ अध्वर्यवो हविष्मंतो हि भूताच्छाप इतोशतीरुशंतः॥
अव याश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः॥ अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा
यजध्वं॥ स वो ददूर्मिमद्या सुपूतं तस्मै सोमं मधुमंतं सुनोत॥ यो अनिध्मो दीदयदप्स्वं १ तर्यं विप्रास ई
ळते अध्वरेषु॥ अपां नपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय॥ याभिः सोमो मोदते हर्षते च कल्या
णीभिर्युवतिभिर्न मर्यः॥ ता अध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात्॥ ३॥ एवेद्यूने यु

स्त्व ४

अं०प्र०
१५४

वृतयो नमंतयदीमुशन्नुशतीरेत्यछ॥ त्वं आ नते मनसा संचिकित्रे ध्वर्यवो धिषणा यदेवीः॥ यो
वीरतान्यो अस्तृणोदुलोकं यो वो मत्या अभिशस्तेरमुंचत॥ तस्मा इंद्राय मधुमंतमूर्मिं देवमादनं प्रहिणोतन
नापः॥ प्रास्मै हिनोत मधुमंतमूर्मिं गर्भो यो वः सिंधवो मध्वउत्सः॥ घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः
शृणुताहवं मे॥ तं सिंधवो मत्सरमिंद्रपानमूर्मिं प्रहेतयउभे इयर्ति॥ मदच्युतमौशानं नभोजां परित्रितंतुं वि
चरंतमुत्सं॥ आवर्वृततीरध नु द्विधारा गोषुयुधो न नियवं चरंतीः॥ ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व
सवृधः सयोनीः॥ ५॥ हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां॥ ऋतस्य योगे विष्यध्वमू
धः श्रुष्टीवरीर्भूतनास्मभ्यमापः॥ आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च॥ रायश्च

श्री
१५४

स्थः स्वपत्यस्य पत्नी सरस्वती तद्गृणते वयो धात्॥ प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि॥
अध्वर्युभिर्मनसा संविदाना इंद्राय सोमं सुषुतं भरंतीः॥ एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः
सादयता सखायः॥ नि बर्हिषि धत्तन सोम्यासो अपां नप्त्रा संविदानास एनाः॥ आग्मन्नाप उशतीर्बर्हि
रेदं न्यध्वरे असदन्देवयंतीः॥ अध्वर्यवः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या॥ ३॥ बृहस्पते प्र
ति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा॥ आदित्यैर्वा यद्वसुभिर्मरुत्वान्स पर्जन्यं शंतनवे वृषाय॥
आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत्॥ प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं
वाचमासन्॥ अस्मे धेहि द्युमतीं वाचमासन्बृहस्पते अनमीवामिषिरां॥ यया वृष्टिं शंतनवे वनाव दिवो

॥१८७॥

अ०प्र०
१५५

दुसोममधुमाँ आविवेश॥ आ नो द्रप्सा मधुमंतो विशंत्विंद्र धेह्यधिरथं सहस्रं॥ नि षीद होत्रमृतुथा यजस्व देवान्देवापे हविषा सपर्य॥ आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्॥ स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि॥ अस्मिन्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन्॥ ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु॥ २॥ यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्॥ देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्॥ यं त्वा देवापिः शिशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे॥ विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमंतं॥ त्वां पूर्व ऋषयो गीर्भिरायंत्वामध्वरेषु पुरुहूत विश्वे॥ सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि॥ एता

श्री
१५५

धारयमाणाः॥ प्रणवस्य परब्रह्म ऋषिः परमादेवता दैवी गायत्री छंदः॥ व्याहृतिमंत्रस्य प्रजापतिऋषिः॥ प्रजापतिर्देवता॥ बृहती छंदः॥ गायत्र्या विश्वामित्र ऋषिः॥ सविता देवता॥ गायत्री छंदः॥ वेदारंभणे वि०॥ ततः प्रधानपूर्वं स्वाध्यायं प्रारभ्य किंचिदधीत्य प्रणवेन समाप्य विरामोस्त्वित्युक्त्वा भूमिं स्पृष्ट्वा गुरुं वंदं ... श्च नयेयुः॥ ततः परेद्युः द्युः प्रतिगणेशादीन्नत्वा गुरुं नत्वा प्रणवेन प्रारंभं समाप्तिं कुर्युः॥ आत्याचारसंशयेनाध्यायाः॥ इत्यध्ययनधर्मः॥॥ अथ महानाम्न्यादिव्रतानि॥ तत्रादौ तावत्॥ जन्मप्रभृति त्रयोदशवर्षेषु क्रोदगयनादिकाले महानाम्नीव्रतं कार्यं॥ पूर्वेद्युराचार्यो ब्रह्मचारिणा सह सुस्नातः कृतनित्यक्रियः प्राणानायम्य देशकालौ संकीर्त्य मं ब्रह्मचारिणं महानाम्नी व्रध्यापयिष्ये तदादौ महानाम्नीव्रतसिद्धि

द्वारा श्री० तयेहोमं करिष्ये ॥ तदंगतया स्वस्तिपुण्याहवाचनाभ्युदयिकानि करिष्ये ॥ ततो ब्रह्मचारिणा
वपनस्नानं कारयित्वा तं सुमुहूर्ते स्वस्य दक्षिणउपवेश्य उपलेपाद्यग्निप्रतिष्ठांतं कृत्वा ॥ समिद्द्वयमादा
य अस्य ब्रह्मचारिणो महानाम्नीव्रतांगभूतं होमं कर्तुं देवतापरिग्रहार्थं मन्वाधानं करिष्ये ॥ अस्मि
न्नन्वाहितेग्नाविध्मादि आघारावाज्येनेत्यंतमुक्त्वा त्रिरग्निं पवमानं प्रजापतिं चाज्येन शेषेण स्विष्टकृमित्या
दि सद्यो यक्ष्ये ॥ समिधं मग्नावाधाय ॥ परिसमूहनाद्याज्यसंस्कारांतं कृत्वा ॥ ततो कौपीनं धारयित्वा युवं
वस्त्राणीति मंत्रावृत्त्याहतं शुक्लं वासः परिधान्येन काषायवस्त्रेण प्रावृणुयात् ॥ ततो समंत्रं यज्ञोपवीतं
धारयित्वा ॥ तमात्माग्न्योर्मध्येन यज्ञपात्रोत्तरभागं गमयित्वा तत्र विधिवदाचम्य तथैवोपानीयोपवे

श्य बर्हिष्यासादनांतं कृत्वा ब्रह्मचारिणा दक्षिणहस्तेन स्पृष्टः सन्नाघारांतं कृत्वा ॥ अग्न आयूंषि० इत्यादि त्र
पूर्ववत्त्यागः पूर्ववत्त्यागः ॥ प्रजापतये इदं० ॥ तत आचार्य उत्तरतोग्नेः प्राङ्मुखो ब्रह्मचारी वाचार्याग्न्योर्मध्ये
न गत्वाचार्यस्य पुरोभिमुखस्तिष्ठेत् ॥ तत आचार्योंजलिक्षारणं कुर्यात् ॥ तत्र क्रमः ॥ जलपात्रोदकेन शि
ष्यांजलिमापूर्य स्वस्यांजलिमन्येन पूरयित्वा ऋ ष्यादि स्मृत्वा ॥ अवक्षारणे वि० ॥ तत्सवितुर्वृणीमहे०
॥ तत आचार्यो वटोर्हस्तं गृह्णीयात् ॥ देवस्य त्वा० हस्तं गृहीत्वामुकशर्मन्वटोरभिवादनिकं नामशर्मां
तं संबुध्यामंत्रितेनिर्दिश्य परा ॥ सांगुष्ठं वटोर्दक्षिणपाणिं गृहीत्वा पुनरपि अंजलिपूरणादि कृत्वा सविता
ते हस्तमग्रभीत् ॥ पूर्ववन्नाम निर्दिश्य पूर्ववत्पूरयित्वा अग्निराचार्यस्तवेति पूर्ववन्नाम निर्दिश्य हस्तं

आ०प्र०
१५६

गृह्णीयात्॥ वटुना सह निष्क्रम्य देव सवितरेष ते ब्रह्मचारी तं गोपाय स मा मृतेत्युच्चार्य तमादित्यमीक्षयेत्॥
ततः पूर्ववदन्योन्याभिमुखौ तिष्ठेतां॥ अथाचार्यः॥ कस्य ब्रह्मचार्यसि॥ परिददामीति मंत्रं जपन्पूर्ववद्वटु
पविश्य मंत्रेण मेखलामाबध्य॥ अदांतमस्यनेन दंडमादाय पुराणानि यज्ञोपवीतादीनि जले निक्षिप्य स्वि
ष्टकृदादिहोमशेषं समापयेत्॥ अथ गुरुणा महानाम्नीव्रतं चरेति प्रेष्य ब्रह्मचारी प्रेषितश्चरिष्यामीत्युक्त्वा
भिक्षाचरणादि पूर्ववच्चरेत्॥ ततो ग्रामाद्बहिर्देवालयादिं गच्छेत्॥ तत्र गुरुस्तिथ्यादि संकीर्त्यास्य ब्रह्मचा
रिणो महानाम्नीश्रवणांगभूतं व्रतपरिपूर्ति द्वारा श्री०र्थं तदंगहोमं कर्तुमुपलेपाद्यग्निप्रतिष्ठापनांतं
कर्म करिष्ये॥ समिद्द्वयमादायास्मिन्होमे देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ चक्षुषी आज्येनेत्यंतमुक्त्वा

श्री
१५६

अत्र प्रधानं॥ अग्निं॥ संराधनीं॥ अग्निं॥ असूर्यंतीं॥ अनुव्रतीं॥ प्रदातारं॥ अग्निं॥ वायुं॥ सूर्यं॥ रूसरस्यालिलो
दनं॥ रूसरान्नद्रव्येण॥ शेषेण स्विष्टकृतमित्यादि स घोयक्ष्ये इत्यंतानाबाधाय परिसमूहनादि पूर्णपा
त्रनिधानांतं कृत्वा॥ ततो वटुः स्थालीपाकविधानेन होमाय आत्मभोजनाय च पर्याप्तांस्तंडुलान्नवान्यो
देवताभ्यो त्वष्टीं निरूप्य तथैव प्रोक्ष्य तत्र तिलान्प्रक्षिप्य श्रपयित्वाचार्याय प्रत्तस्थालीपाक इति ज्ञापयेत्॥
ततो वटुनान्वारब्धो आचार्यो आज्यसंस्कारादि आज्यभागांतं कृत्वावदानधर्मेण चरुमवदायाग्नावग्निरि
त्यादि नव बाहुतीर्जुहुयात्॥ ॐ अग्निरग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः॥ तस्मै जुहोमि ह
विषा घृतेन मा देवानां मोमुहद्भागधेयं स्वाहा॥ अग्नये॥ ॐ याश्चौरं तिरश्ची निपद्यते हविर्धरणी इति॥

तां त्वा कृतस्य धारया यज्ञे संराधनी महं स्वा०॥ संराधन्या इदं॥ ॐ यस्मै त्वा काम कामाय वयं सम्राड् यजा
महे॥ तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वा०॥ अग्नय०॥ ॐ ऐंद्रो नो अग्निरीरिवः कृणो त्वयं मृधः पुर
एतु प्रभिंदन्॥ अयं शत्रून् जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातौ स्वाहा॥ अग्न०॥ ॐ अनुमतयेऽ
नुमत्यै च स्वाहा॥ अनुमत्यै अनुमत्या इ०॥ ॐ प्रदात्रे स्वा०॥ प्रदात्र इ०॥ ॐ भूः स्वा०॥ अग्न०॥ ॐ भुवः
स्वा० वाय०॥ स्वः स्वा० सूर्या०॥ एवं नवाहुतीर्हुत्वा स्विष्टकृदर्थं स्रुचि चरुमवदाय तां बर्हिषि निधाय॥
ब्रह्मचारिणं शास्ति॥ एवं स्थालीपाकं सर्वमशानेति॥ स च सर्वं चरुमश्नीयात्॥ आचार्यो भुक्तवं
तमाचांतमुपविष्टं स्व प्रेषयेत्॥ ततः सः त्वं व्रतानां व्रतपतिरसि॥ व्रतं चरिष्यामि तच्छकेयं तेन शकेयं

तेन राध्यासमित्यादित्यमुपतिष्ठमानो ऽद्भिः पूर्णांजलिं तिष्ठेत्॥ तदाचार्यस्तेन मंत्रेण कृतांजलिं वटु
मादित्यमुपस्थापयेत्॥ वटुनाऽक्षि संमेलनं वाग्यमनं च कारयित्वा त्रयस्त्रिंशद्देवताप्रीत्यर्थं वेदव्र
यहतेन मनुः स्मरन्नहतेन वाससा वटोर्मुखसहितं शिरो वामकर्णदेशमारभ्य त्रिः प्रदक्षिणं वेष्टयि
त्वा यथा तद्वासो न पतति तथा बध्वा एकरात्रं त्रिरात्रं चैवं व्रतस्थं पवेसि प्रेष्य स्विष्टकृदादि होम
शेषं समापयेत्॥ वटुस्त्वपरस्य कर्त्तव्य संध्यावंदन भोजनादि कुर्वीणस्तं कालं नयेत्॥ ततोऽशुचौ दे
शे अन्यो ब्रह्मचारी स्थंडिलादुत्तरतोऽग्निमुदकमंडलुमश्यानं च निधाय॥ वायव्यैरश्मांगरकोऽवस्त्र
तरीं शुक्लां वा बध्वा आचार्याय निवेदयेत्॥ ततः आचार्यः तत्स्थंडिलं उल्लेखनादि पर्युक्षणांतम

ग्निप्रतिष्ठापनांतं कृत्वा तस्याग्नेरुत्तरेणेशानस्थाने वा तूष्णीमानयन्निवर्तदभिमुखउपविशे
त्॥ ततः शिष्यो वेष्टितवस्त्रं किंचिदपसार्य प्रक्षाल्यकटस्नानं कृत्वा चम्याग्निमाचार्याय चप्रदक्षि
णीकृत्य गुरुमभिवाद्य तस्मै वापनदर्भस्तले वेवनेकृतिदिश्यभिमुखः सन्स्वपृष्ठमाचार्यपृष्ठेन स
ह संधाय महानाम्नीर्भोऽअनुब्रहीति मनसा गुरुं वदेत्॥ ततो गुरुः कालप्रमाणेन तदुक्तीं ज्ञात्वा
श्रद्दधानाय वटवे स्वयमक्षिणी संनिमील्य विदामघवन्विदा इत्याद्यानवर्चः एवाह्येवेवाह्यग्ना
इ इत्यादि नवपुरीषपदानि च त्रिवारं ब्रूयात्॥ ॐ विदामघवन्विदागातुमनुशंसिषोदिशः॥ शि
क्षाशचीनांपते पूर्वीणां पुरूवसो॥ आभिष्ट्वमभिष्टिभिः प्रचेतन प्रचेतय॥ इंद्र द्युम्नाय न इषए

वा हि शक्रः॥ रायेवाजाय वज्रिवः शविष्ठ वज्रिन्नंजसे॥ मंहिष्ठ वज्रिन्नंजस आयाहि पिब मत्स्व॥ विदार
यः सुवीर्यं भुवो वाजानां पतिर्वशां अनु॥ मंहिष्ठ वज्रिन्नंजसे यः शविष्ठ शूराणां॥ यो मंहिष्ठो मघोनां चि
कित्वो अभिनो नय॥ इंद्रो विदे तमु स्तुषे वशी हि शक्रः॥ तमूतये हवामहे जेतारमपराजितं॥ स नः पर्षदति
द्विषः क्रतुश्छंद ऋतं बृहत्॥ इंद्रं धनस्य सातये हवामहे जेतारमपराजितं॥ स नः पर्षदति द्विषः स नः पर्ष
दति स्त्रिधः॥ पूर्वस्य यत्ते अद्रिवः सुम्न आधेहि नो वसो॥ पूर्तिः शविष्ठ शस्यत ईशे हि शक्रः॥ नूनं तं नव्यं
सन्यसे प्रभो जनस्य वृत्रहन्॥ सन्यसे शुब्रवामहे श्रूरो यो गोषु गच्छति सखा सुशेवो अद्वयाः॥ एवाह्येवे
वाह्यग्ने॥ एवाह्येवेवाहींद्र॥ एवाह्येवेवाविहिष्णो॥ एवाह्येवेवाहि पूषन्॥ एवाह्येवेवाहि देवाः॥ ए

वाहिशाक्रो वशीहि शाक्रो वशाँ असु॥ आयो मन्यायमन्यवउपो मन्यायमन्यवे॥ उपेहि विश्वंधा॥ विदामघ
वन्विदो ऽस्मा॥ शिष्यो पित्रिवारं पठेत्॥ ततस्तस्य शिरो वेष्टनमुन्मुच्यादित्यमीक्षस्वेति वदेत्॥ ततो वृटुः
मित्रस्यत्वा चक्षुषा प्रतीक्षे॥ मित्रत्वा चक्षुषा समीक्षइत्यादित्यमवेक्षते॥ ततोस्यादि संभारयुतादेशो मि
त्रस्यत्वा चक्षुषानुवीक्षइतीक्षेत॥ पुनरादित्यमीक्षस्वेत्युक्ते मित्रस्यत्वा चक्षुषा प्रतिश्यामियो स्मान्द्वेष्टि
यंच वयं द्विष्मस्तं चक्षुषोर्हेतिर्ऋच्छतु॥ आदिमीक्षेत॥ ततोग्नइत्कृत्वा घष्टमंत्रैर्भुवमुपस्थित्॥ ॐ अग्न
इत्कानमऽत्कानमऋषिभ्यो मंत्रकृभ्यो मंत्रपतिभ्यो नमो वो अस्तु देवेभ्यः शिवा नः शंतमा भव॥ सुम्र

ळीका सरस्वती माते व्योम संदृशि॥ भद्रं कर्णेभिः ऋ १॥ शंन इंद्राग्नी॰ ३॥ स्तुषे जनं सुव्रतं नव्यसीभि

र्गीर्भिर्मित्रावरुणा सुम्नयंता॥ त आगमंतु तइह श्रुवंतु सुक्षेत्रासो वरुणो मित्रो अग्निः॥ कया नश्चित्र॰ १॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सरंधसः॥ दृळ्हा चिदारुजे वसु॥ अभीषुणः सखीनामविता जरितॄणां॥
शतं भवास्यूतिभिः॥ स्योना पृथिवि॰॥ ८॥ एतैर्मंत्रैर्भूमिस्पृष्ट्वा वत्सतरीं गुरवे दत्वा तन्निष्क्रयद्रव्यं वाद
त्वाऽनुप्रवचनीयार्थं तंदुलरूपां भिक्षां याचयित्वा गुरवे निवेद्य दैवेवब्रह्मौदनं कुर्यात्॥ देशकालौ संकीर्त्य म
म महानाम्न्यध्ययनांगभूतं मनुप्रवचनीयहोमं करिष्ये॥ उल्लेखनाद्यग्निप्रतिष्ठापनांतं कृत्वा॥ अस्मिन्न
नुप्रवचनीयहोमे देवतापरिग्रहार्थमित्याद्याघारावाज्येनेत्यंतमुक्त्वा सदसस्पतिं महानाम्नीः ऋषीं
श्चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये॥ समिद्द्वयमग्नावाधायपरिसमूहनादि पूर्णपात्र

अ०प्र०
१६३
स३

निधानांतं कृत्वा तच्छेषं देवतात्रयस्य विभज्य भोजनाय च निरूप्य तथैव शेषस्य अवघातादि चरुं श्रपयित्वा भूत
स्थालीपाकं गुरवे निवेद्य॥ ततः शिष्येणान्वारब्ध आघारांतं कृत्वा॰ अवदानधर्मेण चरुमवदाय पूर्ववद्दष्यादि
स्कृत्वा॥ सदसस्पति॰॥ सदसस्पतय इदं॰॥ महानाम्नीभ्यः स्वा॰॥ महानाम्नीभ्य इदं॰॥ ऋषिभ्यः स्वा॰॥
ऋषिभ्य इदं॰॥ स्विष्टकृदादिहोमशेषं समाप्य॥ ब्राह्मणान्भोजयित्वा वेदसमाप्तिरस्त्विति भवंतो ब्रुवंतु॥
वेदसमाप्तिरस्त्विति ब्रूयुः॥ इति संक्षेपेण महानाम्नीप्रयोगः॥ अथ महाव्रतप्रयोगः॥ आचार्यः पूर्ववद्दे
शकालौ संकीर्त्य मं ब्रह्मचारिणं महाव्रतमध्यापयिष्यंस्तदादौ महाव्रतसिद्धिद्वारा श्री॰ येहोमं करिष्ये॥
तदंगतया स्वस्तिवाचनाभ्युदयिकश्राद्धानि करिष्ये॥ पूर्वोक्तवत्तानि कृत्वा वपनस्नाने कारयित्वा

श्री
१६३

सुमुहूर्ते स्वस्य दक्षिणत उपविश्य विधिवदग्निप्रतिष्ठापनांतं समिद्द्वयमादायास्य ब्रह्मचारिणो महाव्रतो
गम्नंतं होमं कर्तुं देवतापग्रहार्थमित्यास घोयक्ष्य इत्यं तमुक्त्वाग्न्यावाधाय पूर्ववत्प्रधानाज्याहुतिः परिदा
नांतं पूर्ववत्॥ मेखलादंडदानादि स्विष्टकृदादि होमशेषं समापयेत्॥ ततो ग्रामाद्बहिर्देवालयं गत्वा म
हाव्रतं चरेति वटुः प्रेष्य तेन चरिष्यामीत्युक्त्वा शुद्धदेशे प्रागग्रेषु प्राङ्मुख उपविश्य शिष्येण विधिवदभि
वादनपूर्वकं महाव्रतमनुब्रूहीति वचने नैवोक्तस्तं प्राङ्मुख उपविश्याथ महाव्रतमित्याद्यारण्यकं त्रि
र्ब्रूयात्॥ ततः शिष्यस्तथैव त्रिवारमुक्त्वा॥ ततो वटुमित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा
समीक्षेत्॥ ततो गुरुः शिष्यावग्न इत्याद्यादिभिर्मंत्रैर्भूमिस्पर्शेत्॥ ततः शिष्यो दिव्रस्तोनं श्रपयित्वा

श्रतस्थालीपाकहुत्वाचार्यायनिवेदयेत्॥ततो आचार्यो महानाम्नीभ्यः स्वाहेतिस्थानेमहाव्रताय स्वाहे
तिद्वितीयामाहुतिंहुत्वासर्वमनुप्रवचनीयवत्कुर्यात्॥इतिमहाव्रतप्रयोगः॥अथोपनिषद्व्रतप्रयोगः
॥आचार्यः देशकालादिस्वस्तिवाचननांदीश्राद्धमग्निप्रतिष्ठापनमन्वाधानपरिसमूहनादिचतु
र्भिः प्रधानाज्याहुतीर्हुत्वा अवक्षारणपरिदानमेखलाबंधनंदंडदानस्विष्टकृदादिहोमशेषंसमा
प्य॥उपनिषद्व्रतमाचरेतिप्रेष्यतेनव्रतंचरिष्यामीत्युक्त्वाप्राग्वद्देवालयादिशुचिदेशंगत्वागुरुमभि
वाद्यप्राग्वदुपनिषदंभोअनुब्रूहीत्युक्तोतंप्राङ्मुखमथातः संहितामुपनिषदित्याद्यारण्यकंत्रिर्ब्रू
यात्॥शिष्यस्तथैवत्रिरुक्त्वापूर्ववन्मित्रस्यत्वाचक्षुषाप्रतीक्षेमित्रस्यत्वाचक्षुषासमीक्षेत्यादिस

मवेक्षेताग्नइलानमइलेत्यादिमंत्रान्स्पर्शव्रतमोदनश्रपणश्रतस्थालीपाकनिवेदनादिकुर्यात्॥त
तः आचार्यो महाव्रतस्थानेउपनिषद्व्रताय स्वाहेतिहुत्वासर्वमनुप्रवचनीयब्राह्मणभोजनादिकुर्यात्
इत्युपनिषद्व्रतं॥इतिमहानाम्न्यादिव्रतत्रयंसमाप्तं॥अथगोदानव्रतप्रयोगः॥जन्मतः षोडशेवर्षेउद
गयनेशुक्लपक्षेचौलोक्ततिथ्यादौगोदानंकुर्यात्॥आचार्योब्रह्मचारिणंस्वदक्षिणतउपविश्य॥प्रा
णानायम्यतिथ्यादिसंकीर्त्यास्यब्रह्मचारिणोगोदानंकर्तुंतदंगस्वस्तिपुण्याहवाचनंमातृकापूजनं
नांदीश्राद्धंचकरिष्ये॥ततउपलेपाद्यग्निस्थापनांतंकृत्वा॥पुनर्देशकालौस्मृत्वामयाक्रियमाणे
गोदानहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्यादिआघारावाज्ये

नेत्युक्तमुक्त्वा त्रिरग्निंपवमानंप्रजापतिं चैताः प्रधानदेवता आज्येन स्विष्टकृतमित्याद्युक्त्वा समिद्धय
मग्न्यावाधाय पूर्णपात्रनिधानांतकृत्वोदगग्नेरास्तीर्यदर्भेषु व्रीहियवमाषतिलैः पृथक्पूरितमा
षशरावचतुष्टयंक्रमेणैकैकशः प्राक्संस्थमासादयेदपरस्यगग्नेरासीनस्य कर्तुर्दक्षिणे वटुः पुरस्ता
दग्नेः पश्चादानडुहशरावं शमीपर्णशरावं च स्थापयेत्॥ ततो ब्रह्मैकविंशतिकुशांकुरान्दधानो वटो
र्दक्षिणेतिष्ठेत्॥ ततो बटुनान्वारब्धः कर्त्ता पूर्वतंत्रमाघारांतं कृत्वा अग्न आयूंषीत्यादिचतुर्भिर्मं
त्रैः पूर्ववदाज्याहुतीर्हुत्वाउदक्पात्राग्नेत्वाशीतोष्णजले पात्राभ्यां पृथगादायवटोः पश्चिम
तः स्थित्वा तदुदकमन्यस्मिन्पात्रे पाणिभ्यामुष्णेन वायउदकेनेहीतियुगपन्निनीयतदेकदेशं

नवनीतेनवादध्यावामेलेपयित्वा वटोर्वामश्मश्रुप्रदेशमारभ्यप्रदक्षिणमद्भिः श्मश्रूणिवपत्वाउंदंतुव
र्चसे॥ इतिमंत्रावृत्त्यात्रिः श्मश्रूणिक्लेदयित्वा ब्रह्महस्तेनतथैकविंशतिकुशांकुरेषु त्रीनंकुरानादाय
बटोरभिमुखंपश्चिमाग्रान्कृत्वा॥ ओषधेत्रायस्वैनमितिदक्षिणश्मश्रुभागेनिधायतेष्वंकुरेषुताम्र
मयंक्षुरंस्वधितेमैनंहिंसीरितिनिधाय॥ ॐ येनावपत्सविता०॥ इति सश्मश्रुकाग्रान्कुशांकुरान्छि
त्वाप्रागग्रानुष्णशरावशमीपर्णैरेकीकृत्यवटोः करेदद्यात्॥ स च तान्नानडुहेगोमयेप्रागग्रान्निदध्यात्॥ एवं
द्वितीयादिछेदनेकुशांकुरत्रयनिधानादिसमंत्रकं कार्यं॥ विशेषस्तु॥ येनधाता०॥ इतिमंत्रो द्वितीयेछेद
ने॥ येनभूयश्चरात्र्यां०॥ इतितृतीये॥ चतुर्थेत्वेतेत्रयोपि॥ एवंदक्षिणश्मश्रुभागेचत्वारिछेदनानिकृत्वा

अ० प्र०
१६६

तरभागेप्यनयारीत्यामंत्रत्रयेणकुर्यान्न चतुर्थं॥ततः क्षुरधारांयस्क्षुरेणमर्चयता सुपेशसा वप्ता वपकेशश्म
श्रूणि॥ शंखं शिखिशिरोमुखं मास्यायुःप्रमोषीरित्यग्नेतअयत आरभ्य नापितमाहूय शीतोष्णा
भिरद्भिरवर्धकुर्वीयोक्षणं कृत्वा शालिकेशश्मश्रुलोमनखान्युदकांतस्थानि कुर्यादिति पृष्ठे पार्श्वाचापोध्येतेन
पूर्वसेकावशिष्टैः शीतोष्णाकुरुमिरग्नपाणिनाद्रक्षुरुतकेशश्मश्रुलोमनखान्युदकंतस्थानि वापयित्वा स्नातं
वृद्धं पूर्ववदुपवेश्य परिवृत्त्यादिहोमशेषं समाप्य॥तद्दूत्यादिपात्रचतुष्टयं नापिताय दद्यात्॥ततो वटुः अ
तःशेषैर्मौनेन नीत्वांदितसायं संध्योगुरोरंतिकंगत्वा वरं ददामीति वाचं विसृज्य तस्मादनड्वाहं गां च द
क्षिणां तेन याचयित्वा दद्यात्॥ततः परेद्युः संवत्सरं गोदानव्रतमास्थरेत्याचार्येणोक्तो ब्रह्मचारी संव

श्री
१६६

सकृत् दोषपरिहारार्थं कृच्छ्रत्रयमात्मन ० यद्दातथा प्रायश्चित्त होमं तथा मुण्डनी मन्या द्विव्रत चतु
श्यस्नोपक्रनितदोषपरिहारार्थं कृच्छ्चतुश्याम कप्रयश्चित्त यथा प्रत्याम्नायेन तथात्र

त्सरं केशश्मश्रूणि धृत्वा पूर्वोक्त ब्रह्मचारीनियमेन गुरुसमीपे व्रतं चरेत्॥इति गोदानव्रतं॥अथ ब्रह्मचारीव्र
तलोपप्रायश्चित्तं॥तत्र बौधायनः॥तत्रायं क्रमः॥पूर्वेद्युस्तिथ्यादि संकीर्त्य ममैषो चाचमन संध्यावंदन
दर्भभिक्षाग्निकार्यराहित्य शूद्रादिस्पर्शन कौपीनकटिसूत्र यज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वाप
छत्रधारणपादुकारोहण मालाधारणोद्वर्तनानुलेपनांजन जलक्रीडा द्यूत नृत्य गीत वाद्याभिरति पासं
भाषणपर्युषितभोजनादि सर्वब्रह्मचर्यनियमलोपे प्रायश्चित्त द्वारा श्रीहरिहरप्रीतये कृच्छ्रत्रयं महाव्या
हृतिहोमं करिष्ये॥महानाम्न्यादिप्रत्येकं ३।६।१२। प्रायश्चित्तं अष्टाष्टसंख्याप्रत्येकं गायत्रीहोमं च तंत्रे
ण करिष्ये॥लौकिकाग्निं प्रतिष्ठाप्यान्वाधानं कुर्यात्॥अस्मिन्नन्वाहिताग्नाविष्यादिचक्षुषी आज्येने

नि० नामा.

तिव्रत अष्टाष्टसंख्याकं
गायत्रीहोमं चतंत्रेण का०

अ० प्र०
९६

।सवितारंद्वात्रिंशत्संख्याकाभिः आज्याहुतिभिः॥

संतत्सुत्काः त्रप्रधानं॥अग्निं।वायुं।सूर्यं।प्रजापतिंचमंत्रोक्तदशदेवतान्॥अग्निंपृथिवींमहांतं१
वायुंअंतरिक्षंमहांतं२आदित्यंदिवंमहांतं३चंद्रमसंनक्षत्राणिदिशोमहांतं४अग्निं५विश्ववेदसं६वि
भावसुं७शतक्रतुं८अग्निं९अग्निं१०पुनः अग्निंवायुंसूर्यंप्रजापतिंचाज्येनपुनरत्रप्रधानं॥[illegible]
महानाम्न्यादि४प्रत्येकंअष्टाष्टसंख्याकाभिः आज्याहुतिभिःशेषणस्विष्टकृतमित्यादिसद्योपसेस
मिद्धयंहुत्वापरिसमूहनादिषट्पात्रप्रयोगेणाज्यभागांतंकृत्वाप्रधानाज्याहुतीर्जुहुयात्॥आदौचतु
र्भिर्व्याहृतिभिर्हुत्वायथोक्तमंत्रैस्त्यागंकुर्यात्॥ततोमहाव्याहृतिहोमः॥ॐभूरग्नयेचपृथिव्यैचमह

श्री
१६०

तेचस्वाहा॥अग्नयेपृथिव्यैमहतेइदं०१॥ॐभुवोवायवेचांतरिक्षायमहतेचमहतेचस्वाहा॥वाय
वेअंतरिक्षायमहतेइदं०२॥सुवरादित्यायचदिवेचमहतेचस्वाहा॥आदित्यायदिवेमहतेइदं०३॥
ॐभूर्भुवःसुवश्चंद्रमसेभ्योदिग्भ्यश्चनक्षत्रेभ्योश्चदिग्भ्यश्चमहतेचस्वाहा॥प्रजापतयेचंद्रमसे
नक्षत्रेभ्योदिग्भ्योमहतेइदं०४॥ॐपाहिनोअग्नएनसेस्वाहा॥अग्नयइदं०५॥ॐपाहिनोवि
श्ववेदसेस्वाहा॥विश्ववेदसइदं०६॥ॐयज्ञंपाहिविभावसोस्वाहा०॥विभावसवइदं०७॥ॐसर्वं
पाहिशतक्रतोस्वाहा॥शतक्रतवइदं०८॥ॐपुनरूर्जानिवर्तस्वपुनरग्नइषायुषा॥पुनर्नःपा
हिविश्वतःस्वाहा॥अग्नयइदं०९॥ॐसहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया॥विश्वप्स्न्यावि
श्वतस्परिस्वाहा॥अग्नयइदं०॥१०॥पुनर्व्याहृतिभिर्हुत्वायथोक्तमंत्रैस्त्यागः॥महानाम्न्यादित्र
त्रसावितुर्व० तस्वाहा।सवित्रइदं·

तचतुष्टयलोपनिमित्तार्थं गायत्रीहोमं प्रत्येकं अष्टाष्टसंख्याकाभिर्हुत्वा स्विष्टकृदादिहोमशे
षं समापयेत्॥ एतदल्पधर्मलोपे प्रायश्चित्तं॥ बहुधर्मलोपे प्रायश्चित्ते विशेषो ऽविधाने शौन
केनोक्तः॥ तं बोधिया जपेन्मंत्रं लक्षं चैत्रे शिवालये॥ ब्रह्मचारी स्वधर्मं चन्यूनं चेत्स्वपमेव तत्॥
महानाम्न्यादिव्रतेषु लुप्तेषु तारतम्यं त्रीन्षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतं प्रारभेतिस्मृत्यर्थ
सारे॥ इति संक्षेपेण ब्रह्मचारिव्रतलोपप्रायश्चित्तं॥ अथ समावर्तनप्रयोगः॥ विद्यांते गुरुमर्थदा
नेन संपूज्य समावर्तनं कुर्यात्॥ कुर्वीत स्वयमेवेदं समावर्तनसंज्ञकं॥ प्राप्योदगयनाद्युक्तमुक्तः
स स्वस्ययनमिति स्वयमिति कारिकोक्तेः॥ तत्र मण्यादीन्येकादशोपकल्पयेत्॥ आसनेनाचार्या

न्तसः॥ इति दक्षस्मृतेः॥ गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया॥ वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां यवीयसीं॥ अरोगिणीं
भ्रातृमतीमसमानार्षगोत्रजां॥ इति याज्ञवल्क्योक्तेः स्त्रीविधोपि वेदव्रतोभयस्नातको ऽविलंबेन
लक्षणादिविशिष्टां स्त्रियं नपुंसकत्वस्याहतये स्त्रीत्वेन परीक्ष्योद्वहेत्॥ तत्रापि कुलमग्रे परीक्षेत
निग्रहस्वचनादादौ सदाचारादिगुणवत्तया हीनक्रियत्वादिदोषाहीनतया च परीक्ष्य कुलं तज्जो
द्वाह्य॥ तदनु लक्षणाद्यपि परीक्ष्य॥ लक्षणानि च शुभाशुभसूचकानि तनुलोमकेशदशनत्वा
दीनि प्रत्यक्षगम्यानि बाह्यान्यंतराणि चाष्टौ पिंडान्कृत्वेत्यादिनाश्वलायनोक्तानि द्विविधान्यपि म्र्हा

अ०प्र०
१७५

ग्रंथेभ्योज्ञेयानिविस्तरभियात्विहनोच्यंते॥पादानेनोपभोगेनवापुरुषांतरपूर्विकानभव
तिसानन्यपूर्विका॥अनेनवाग्दत्तामनोदत्ताग्निंपरिगतासप्तमंपदंनीताभुक्तागृहीतग
र्भाप्रसूताचेतिसप्तपुनर्भुवोव्यावर्त्तंते॥कांतावोढुर्मनोनयनयोराल्हादकारी॥तयानए
कःपिंडःपिंडदानंक्रियास्तुपुरुषशरीरंवायस्यानविद्यतेसाऽसपिंडा॥ननुकथंचिदेक
पिंडक्रियानुप्रवेशेननिर्व्याप्यसापिंड्यंकेचिदाहुः॥एकशरीरावयवान्वयेनावयव
सापिंड्यंविज्ञानेश्वरादयोनिर्दोषंमेनिरे॥अत्रबहुतरंकर्त्तव्यंविचारस्तत्तापत्याप्र
योगस्तत्ताभंगभीत्यानोच्यते॥नन्वेवंविधात्शरीरान्वयेनसापिंड्यातिप्रसंगेन

वयवा१

श्री
१७५

काप्यसापिंड्येत्यतआह॥याज्ञवल्क्यः॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति॥मातृपक्षेपंच
मात्पितृपक्षेसप्तमादूर्ध्वंसापिंड्यंनिवर्ततइतिविशेषः॥कूटस्थमारभ्यात्रगणना॥तदुक्तं॥
वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः॥पंचमीचेत्तयोर्मातासापिंड्यंविनिवर्त्ततेइति॥कू
टस्थोमूलपुरुषःयतःसापिंडभेदतः॥एवंमातृपितृद्वारकेसापिंड्यवतीनांकन्यकानामियंसं
ख्यासंकलना॥उदाहृः पितरौपितुश्चपितरौतज्जन्मकृद्दंपतीद्वंद्वंतस्यचतुष्कमष्टकमतोप्य
स्तक्रमात्षोडश॥वंशारंभकदंपतिप्रमितिरित्यासप्तकक्ष्यंरदाएकैकान्वयकन्यकाःपितृकु
लासप्तकक्ष्यंब्रुवे॥१॥यद्यप्येकस्यबह्व्योपिसुतास्युस्तदपीहतु॥संबंधसाम्यादेकैकगणिते

अ० प्र०
१७६

त्सवधार्यतां॥२॥एकस्मान्मिथुनात्सुतोथदुहिता द्वंद्वद्वयं तद्व्यात्तस्माद्द्वंद्वचतुष्कमष्टततोतः षोडशात्तोद्वयाः॥यावत्तत्सप्तमकक्ष्यमग्निऋतवः कन्याद्विहेकान्वयोदांतैर्गुणितारसैकैर्वसुदशोवंशेसपिंडाःपितुः॥३॥मातुर्जन्मजदंपती चमिथुनद्वंद्वंतयोःसागरात्तस्याःपंचमकक्ष्यमध्वमितिरित्येकान्वयःपुंसुते॥द्वंद्वात्द्वंद्वयुगंततोध्वयइतोष्टापंचकक्ष्यंशरक्षोण्यःसप्तगुणाःशराश्रविधवोमातुःसपिंडाःकुले॥४॥कुलद्वयस्य कन्यकापुत्तीमिथःसपिंडकाःशिमांशुदृग्धरादृशा ११।२१॥विवाहकर्मवर्जिता॥५॥यवीयसीं सापेक्षया वयसा वपुषा चन्यूनां॥अरोगिणीं अचिकित्स्यराजयक्ष्मादिरोगरहितां भ्रातृमतीमि

श्री
१७६

तिपुत्रिकारणशंकानिवृत्त्यर्थं॥यत्रतुपुत्रिकाकरभावनिश्चयस्तामन्भ्रातृकामप्युद्वहेत॥असमानार्षगोत्रजां॥ऋषेरिदं आर्षं॥गोत्रप्रवर्तकस्यमुनेर्व्यावर्तकप्रवरइत्यर्थः॥गोत्रंवंशपरंपराप्रसिद्धं॥तसमाने आर्षगोत्रे यस्याः साजायाभवति॥यस्कवाधूलिमौनमौकानां भिन्नगोत्राणामपिभार्गववैतहव्यसावेतसेतिप्रवरैक्यमस्तितत्रविवाहोमाभूदित्यसमानार्षगोत्रजामित्युक्तं॥आंगिरसांबरीषयौवनाश्वेतिमांधात्रांबरीषयौवनाश्वेति। आंगिरसमांधात्प्रवरभेदेपियौवनाश्वेगोत्रेक्यंतादृशेविवाहवारणाय्यासमानगोत्रजामित्युक्तं॥तथाच॥गोत्रप्रवरोपरथक्पृथुदासेनिमित्तभूतौ॥प्रवरैक्येविशेषमा

अ० प्र०
१७७

ह॥ बौधायनः॥ पंचानां त्रिषु सामान्याद्विवाहस्त्रिषु द्वयोः॥ भृग्वंगिरोगणेष्वेवं शेषेषु
कोपि वारयेदिति॥ गोत्रप्रवरनिर्णयः सपिंडसप्रवरगोत्रविवाहप्रायश्चित्तादि च महाग्रं
थतो ज्ञेयं॥ विस्तरभियान्नोच्यते॥ सपत्नमातामहकुलेप्यातिदेशिकात्सापिंड्याद्विवा
हः॥ तथा च सुमंतुः॥ पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातृष्वसारस्तद्दुहितरश्च भगि
न्यस्तदपत्यानि भागिनेयान्यथा संकरकारिण्यः स्युरिति॥ अत्र यावद्वचनं वाचनि
कमिति न्यायेन परिगणितेष्वेवातिदेशिकसापिंड्येन तु पंचमसप्तमपर्यंतं॥ क्वचित्तु॥
वचनादेव विवाहनिषेधः॥ यथा गृह्यपरिशिष्टे॥ अथ विवाह इत्युपक्रम्य मध्ये अवि

श्री
१७७

रुद्धसंबंधामुपयच्छेत्तेसुक्काते दंपत्योर्मिथः पितृमातृसाम्ये विरुद्धसंबंधो यथा भार्यास्वसु
र्दुहिता पितृव्यपत्नीस्वसा चेति स्वयमेव सर्वविरुद्धसंबंधे विचारे॥ तथा नारदः॥ प्रत्युद्वाहो नै
व कार्यो नैकस्मै दुहितृद्वयं॥ नैवैकजन्ययोः पुंसोरेकजन्ये च कन्यके॥ कन्ने कं कदाचिदुद्वा
होनेकदा मुंडनद्वयं॥ अन्यत्रापि॥ एकजे तु कके न्ये द्वे पुत्रयोर्नैकजन्मनोः॥ न पुत्रीद्वयमेक
स्मै प्रदद्यान्न कदाचनेति॥ अथ वरगुणाः॥ तत्र बुद्धिमते कन्यां प्रयच्छेदिति गृह्यं॥ यमः॥ कु
लं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथता च॥ एतान्गुणान्स[illegible]प्तपरीक्ष्य देया क
न्या बुधैः शेषमचिंतनीयं॥ अन्यच्च॥ मदनरत्ने॥ कुलेकतु त्रयादर्वाक् मुंडनादानुमंडनं॥

अ०प्र०
१७८

दपिमुंडनं॥प्रवेशंनिर्गमोनेष्टोनकुर्यान्मुंडनत्रयं॥कुलेऽब्दतुत्रयादर्वाक् मुंडनान्नतुमं
डनं॥पुत्रोद्वाहान्नैवपुत्रीविवाहोपिऋतुत्रये॥अब्दांतरान्मुंडनंचनकदामुंडनद्वयं॥
अभेदेनदोषइतिसारावल्यां॥फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने॥भेदादब्दस्य
कुर्वीतनर्तुत्रयविलंबनमिति॥तथा॥ज्येष्ठमासेनज्येष्ठस्यगर्भस्यजन्मभादेवस
वेमंगलकार्यंनिषिद्धं॥रत्नकोशे॥जन्मर्क्षेजन्मदिवसेजन्ममासेशुभंत्यजेत्॥
ज्येष्ठमासस्याद्यगर्भस्यशुभंवर्ज्यंस्त्रियाअपीतिज्योतिर्निबंधे॥अथसमानक्रि
याविचारः॥एकमातृजयोरेकवत्सरेकपुरुषस्त्रियोः॥एकक्रियानकर्त्तव्येक्रि

श्री
१७८

याभेदेविधीयते॥स्मृतिसारावल्यां॥स्वसृयुगेभ्रातृयुगेस्वसृभ्रातृयुगेतथा॥एक
स्मिन्मंडपेचैवनकुर्यान्मुंडनद्वयं॥पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं॥पुत्र्यंत
रस्यकुर्वीतनोद्वाहमितिसूरयः॥एतद्वचनद्वयंभिन्नमातृविषयं॥तथाचोक्तं॥
एकोदरत्रसूतानामेकस्मिन्वासरेपुनः॥विवाहंनैवकुर्वीतमंडपोपरिमुंडनं॥
एकोदरयोरेकदिनोद्वाहंनोद्भवेत्॥नाशः॥नघंतरएकदिनेत्याहुः॥संकटे
त्वशुभं॥नप्रनिषिद्धंलग्नंचसंप्राप्तेसंकटेहनि॥एकोदरसंभवयोरेकाभिन्नमं
डपे॥प्रकृतिमात्रमेतत्॥लब्ध्वाविवाहाशुभेदोनरस्यनारीविवाहोनऋतुत्रया

स्यात्॥ नारीविवाहात्तदहोपि शस्तं नरस्य पाणिग्रह एव मार्गः॥ अथ च मत्स्यविशेषः॥ एक
स्मिन्वत्सरे चैकवासरे मंडपे तथा॥ कर्त्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोः॥ मेधाति
थिः॥ पृथक्मातृजयोः कार्यो विवाहश्चैकवासरे॥ एकस्मिन्मंडपे कार्यः पृथग्वेदिक
योस्तथा॥ अथ प्रतिकूलविधिः॥ भट्टः॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥
तद्विवाहो नैव कार्यः स्वपक्षः पक्षदोषतः॥ रत्नकोशः॥ वरवध्वोः पिता माता पितृव्य
श्च सहोदरः॥ एतेषां प्रतिकूलं तन्महाविघ्नप्रदं भवेत्॥ पिता च पितामहश्चैव माता चैव
पितामही॥ पितृव्यस्त्रीसुतौ भ्राता भगिनी चाविवाहिता॥ एभिरेव विपन्नैश्च प्रतिकूलं बु

धैः स्मृतं॥ अन्यैरपि विपन्नैस्तु केचिद्ऋतुर्न तद्भवेत्॥ इति प्रतिकूलनिर्णयः॥ अथ कन्यादाता
रः॥ तत्र याज्ञवल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृति
प्रकृतिस्थः परः परः॥ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ॥ गम्यं त्वभावे दातॄणां कन्या कु
र्यात्स्वयंवरं॥ सकुल्यः प्रत्यासत्तिक्रमेणादौ पितृकुलस्थस्तदभावे मातामहकुलस्थः सर्वाभा
वे जननी प्रकृतिस्थः उन्मादिदोषरहितः गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तं॥ नारदोपि॥
पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः॥ मातामहो मातुलश्च सकुल्यो बांधवास्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते॥ तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥

॥अं०प्र०॥
॥१८०॥

यदातुनैवकश्चित्स्यात्कन्याराजानमाव्रजेत्॥अथविवाहभेदाः॥मनुः॥ब्राह्मोदैवस्तथाचा
र्यःप्रजापत्यस्तथासुरः॥गांधर्वोराक्षसश्चैवपैशाचश्चाष्टमोमतः॥एतेषांलक्षणंकृत्यक
न्यामितिगदाधरखंडेवर्णनीयं॥एतेषांव्यवस्थास्मृतौ॥चत्वारोब्राह्मणस्याद्याःप्राजापत्यगांध
र्वराक्षसौ॥राक्षसश्चासुरोवैश्येशूद्रेचांत्यस्तुगर्हितः॥अपत्यःपैशाचः॥गांधर्वादिषु
पिभार्यापतिभावायपश्चाद्धोमादिसप्तपदांतंकार्यं॥गांधर्वासुरपैशाचविवाहोराक्ष
सश्चयः॥पूर्वंपरिग्रहस्तेषुपश्चाद्धोमोविधीयते॥इतिपरिशिष्टात्॥होर्धमाभेभावेवरां
तरायप्रदेयास्तितुनेतिनेतिवोधायनाहे आह॥बलादपहृताकन्यामंत्रैर्यदिनसंस्कृता

श्री
१८०

श्री

स्थसाने

अन्यस्मैविधिवद्देयायथाकन्यातथैवसेतिबलादितिबलो
र्यं॥परिविन्नपरिवेत्तृदिधिषूदिधिपुत्रयथानस्यात्॥तथाविचार्य॥अथद्वितीयविवाहः॥मनुरुक्त
श्रेत्यादिगणपतिस्मरणपूर्वकंदेशकालौसंकीर्त्यधर्मप्रजासिध्यर्थंस्वीविवाहंकरिष्ये।अमुकश
र्मणःपुत्रस्यश्वःकरिष्यमाणविवाहांगभूतस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंमंड
प्रतिष्ठं पदेवताकुलदेवतास्थापनंचकरिष्ये॥ततःकन्यापितापिअस्याःअमुकनाम्न्याःकन्यायाः
श्वइत्यादिविशेषेणसंकल्पंसर्वंकुर्यात्॥उपनयनवन्मंडपादिपूर्ववत्सर्वंकार्यं॥[illegible]दौवरगृ
हेवरपूजनंकार्यं॥तच्चेत्थं॥वरआगमनसमयोयस्तिनौमिमीतामुष्मिनाभगःसत्वास्तिदे

पूजनंच

कन्यापितावरस्यदक्षिण. नागौउपवेश्य २

अ०प्र०भ०
अ०प्र०भ०
१-१

यदितिरनर्वणेः॥स्वस्तिपूषा[illegible]रोदधातुनः स्वस्तिद्यावापृथिवीसुचेतुना॥वरः भद्रपीठे
प्राङ्मुखउपविशेत॥कन्यापिता देशकालौ संकीर्त्य करिष्यमाणकन्याविवाहांगत्वेन भूतं
सीमांतेवरपूजनं करिष्ये॥तदादौनिर्विघ्नतासिध्यर्थं गणपतिपूजनं वरुणपूजनं चक
रिष्ये॥यथाचारं वरपूजनं तत्सितमातादीनां पूजनं कार्यं॥अस्मिन्राष्ट्रे श्रियमावेश
याम्यतो देवी प्रतिपश्याम्यापः॥दक्षिण[illegible]पादमवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि॥सव्यं
पादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्धयामि॥पूर्वमन्यमपरमन्यंपादाववनेनिजे॥देवा
पृस्यगुप्त्याअभयस्यावरुध्ये॥आपःपौबनेजनीर्द्विषंतंनिर्दहंतुमे[illegible]आ[illegible]गं

धद्वाराम्दुराधर्षां नित्यपुष्टां करीषिणी॥श्रियेजातद्युतिनीराजनं कृत्वा॥युवं वस्त्राणीति वस्त्रं दत्वा[illegible]फलादि नीरी
तिनारिकेलफलंदत्वा॥सप्रत्नथासहसाजायमानः सद्यः काव्यानि बळधत्त वि[illegible]आपश्च
मित्रंधिषणा चसादंदेवा अग्निंधारयन्द्रविणोदां॥सपूर्वयानिविदाकव्यतायोरि[illegible]
अजनयन्मनूनां॥विवस्वताचक्षसाद्यामपश्चदेवा०॥तमीळतप्रथमंयज्ञसा[illegible]
राहुतमंजसानं॥ऊर्जः पुत्रं भरतं सप्रदानुं देवा०॥समातरिश्वापुरुवारपुष्टिर्विदद्गातुंतन[illegible]
यायस्वर्वित्॥विशांगोपाजनितारोदस्योर्देवा०॥नक्तोषासावर्णमामेम्यानेधापयेतेशिशु
मेकंसमीची॥द्यावाक्षामारुक्मोअंतर्विभातिदेवा०॥रायोबुध्नः संगमनोवसूनांयज्ञस्यके

॥ अ०प्र० ॥ १८२ ॥

॥ विवाह ॥

सुमेन्म साधनो वेः॥ अग्न तत्वं रक्षमापा सएनं देवा०॥ नूच पुरा च सदनं रयीणां जातस्य च जाय मानस्य चक्षां॥ सत स्वगोपां भवत अग्ने देवा०॥ द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सन रस्य प्रयंसत्॥ द्रविणोदा वीरवतीमिषन्नो द्रविणोदा रासते दीर्घमायुः॥ एवानो अग्ने समिधा वृधानो रेवत्पावक श्रवसे विभाहि॥ तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ ॥ इति सीमांते पूजा॥ ततो वरो मंगल तूर्येः सह वधूगृहं गत्वा॥ [illegible] द्वार देशे प्रा अङ्मुख स्थितो नीराजन पूर्णकुंभयुतैः पुरंध्री जनैर्नीराजितो [illegible] विश्य तदंगणे मंडपे श्वतुष्पाद भद्रपीठे प्राङ्मुख उपवेशयेत्॥ तत्रादौ फलादिनार्घ्य थाचार कन्यां पूजयेत्॥

॥ शिव ॥

कन्या आगमनमंत्रः १ कन्यापिता प्राङ्मुखः कन्यावाम [illegible] वरपिता दक्षिणतः उपवि०

तत्रायं क्रमः॥ देवीवा चमजनयंत देवास्तां विश्वरूपाः पशवो वदंति॥ सा नो मंद्रेषमूर्जं [illegible] नुवाग स्मानुपसुष्टुतैतु॥ सुमुहूर्ते इत्यादि देश कालौ संकीर्त्य॥ करिष्यमाण कन्याविवा [illegible] नमहं करिष्ये॥ वरपितापि वरविवाहांगभूतं कन्या निरीक्षण काले कन्यापूजनं च करिष्ये [illegible] दौ निर्विघ्नता सिध्यर्थं गणपति पूजनं वरुण पूजनं च करिष्ये॥ कलश प्रार्थनांतं कृत्वा [illegible] कन्यां पूजयेत्॥ गंधद्वारामिति गंधं तस्याः हस्ते लापयित्वा लोकैः साक्षान्महालक्ष्मी [illegible] वदित्वा॥ तांबूलं श्रियेजात इमि ति नीराजनं॥ युवं वस्त्राणीति वस्त्रं॥ याः फलिनी रिफलानि [illegible] पुष्पाणि॥ हिरण्यरूपमिति हिरंण्यं॥ आयुष्यं वर्चस्यमिति मुद्रिकाभूषणादि अलंकृत्य॥ ततो वा

गौरी र्मिमा०॥ कन्यापिता वरपितरं स्वस्थाने उपवेशयस्व तत्स्थाने उपवेशयेत्॥ १

अ० प्र०
१८३

ग्दानं कुर्यात्॥ ॐ भोपंचपंचूहद पूगीफलानि हरिद्राखंडं सहितानि हस्ते गृहीत्वा कन्यापिता व
रगोत्रमुच्चार्य अमुकप्रवरान्विता अमुकगोत्रोत्पन्नायामुकशर्मणः प्रपौत्राया अमुकशर्मणः पौत्राया अ
मुकशर्मणः पुत्रायामुकप्रवरान्विता अमुकगोत्रोत्पन्नां अमुकशर्मणः प्रपौत्री अमुकशर्मणः पौ
त्री अमुकशर्मणः मम पुत्री अमुकनाम्नी कन्यां वरार्थिनीं श्रीरूपिणीं॥ ज्योतिर्विदादिष्टमुहूर्ते
तैदास्येवस्त्रप्रांते बध्वा॥ तदस्त०॥ गृहा वै०॥ गंधद्विंगंधादिना अर्चयेत्॥ अव्यंगे पतिते ऽक्लीबे
बे दशदोषविवर्जिते॥ इमां कन्यां प्रदास्यामि देवाग्निद्विजसंनिधौ॥ ततो वरपिता पंच
नागवल्लीपूगीफलानि गृहीत्वा अमुक[illegible]कगोत्रो अमुकवरविष्णुरूपेभवंतो [illegible] ताम वंदतु॥ दातृ

पैत्रा

मतोदाता।

वस्त्रप्रांते प्रक्षेपादि कुर्यात्॥ तदस्त०॥ गृहा वै०॥ वाचादत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया।
कन्यावलोकनविधौ निश्चितस्त्वं सुखीभव॥ स च॥ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया।
वरावलोकनविधौ निश्चितस्त्वं सुखीभव॥ इति परस्परं वदेत्॥ ग्रामवृद्धो स्त्री कर्त्री स्त्रिया [illegible]
त्रार्थमित्यूहः कार्यः॥ ततो विप्रांश्च गणेशतां तुलादि पूजयित्वा आशीर्मंत्रान् पठेयुः॥ ॐ वर्चो सुभगा
मत्र्यसीति वंदामहे ता॥ यथा नः सुभगा ससि यथा नः सुफला ससि॥ याः फलिनी या इति मंत्रेण पंचवारं
फलमस्तके अभिक्षिप्य॥ हिंरूपवती वसुपत्नी वसूनां वत्सं मिच्छंती मनसाभ्यागात्॥ दुहाम श्विभ्यां
पयो अघ्न्येयं सा वर्द्धतां महते सौभगाय॥ समिद्धस्य श्रयमाण पुरस्ताद् ब्रह्म वन्वानो अजरं सुवीरं॥

आरे अस्मदमतिं बाधमानउच्छ्रयस्व महते सौभगाय ॥ वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम ॥ यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥ इदं दूर्वा नामुपसद्य माय न स्त्वधारः पवते मदाय ॥ नभिस्तवानो अनुधामु पूर्वमगन्निंद्रं महते सौभगाय ॥ अस्पीयबर्हिः ... प्रस्थित स्येन्द्र सोमस्य वरुणा सुतस्य ॥ स्वस्तिदामनं सामाद यस्वा वांचीनो रेवतसौभगाय ॥ चिरं दुर्लभं मधुमत्सुवर्णं धनंजयं धरुणं धारयिष्णु ॥ ऋणं सपत्नाद धरांश्च कृण्वन्न् ... मामहते सौभगाय ॥ इति सौभाग्यपदानि ताः षट् ॥ तदर्कं ० रुहावे ० ॥ ब्राह्मणान्नदक्षिणाभिर्नाता पयेत ॥ इति वाग्दानविधिः ॥ ततो वैवाहिके शुभे मुहूर्ते वधूवरयोः ... हरिद्रादि रोपणं कार्यं ॥

कार्यं ॥ वाग्दानानंतरं देशांतरगते वरे ॥ नारदः ॥ प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत् ॥ त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरं ॥ वरमरणे तु वसिष्ठः ॥ अद्भिर्वाचा च दत्तायां म्रियेताथो वरो यदि ॥ न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा ॥ यस्मै वाग्दत्ता तस्य दोषयोगश्च्युतिः वरांतरलाभे च तस्मै न दद्यादित्याह याज्ञवल्क्यः ॥ दत्तामपि हरेत्पूर्वां ज्यायांसे श्चेद्वर आव्रजेत् ॥ अत्र पूर्वस्य दोषयोग इति विज्ञानेश्वरः ॥ प्रतिश्रुत्याप्यधर्मेण संयुक्तायनदद्यादिति च स्मृतिः ॥ अन्यथा हरणे तु स एव दंडमाह ॥ सकृत्प्रदीयते कन्या हरंस्तां चौरदंडभागिति ॥ अथ विवाहमंडपप्रकारमाह ॥ वसिष्ठः ॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं ॥ मं

अ॰ प्र०

१८५

उपंतोरणैर्युक्तं तत्र वेदिं प्रकल्पयेत् ॥ अष्टहस्तं तु रचयेन्मंडपं वाद्विषट्करं द्वादशकरं ॥ वेदि
कानिर्माणप्रकारमाह ॥ नारदः ॥ हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः ॥ स्तंभैश्चतुर्भिः
सुश्लक्ष्णां वामभागे तु पद्मिनी ॥ समानं तथा चतुर्दिक्षु सोपानैरतिशोभितां ॥ प्रागुदक्प्र
वणारंभां स्तंभहंसशुकादिभिः ॥ विचित्रामंकितां कुंभैर्विहितैस्तोरणांकुरैः ॥ [illegible]
रपुष्पनिकरैर्वर्णकैः समलंकृतां ॥ विप्राशीर्वचनैः पुण्यस्त्रीभिर्दीपैर्मनोरमां ॥ वा[illegible]
गीतनृत्याद्यैर्हृदयानंदिनीं शुभां ॥ एवंविधामारुरुक्षौ मिथुनं साग्निवेदिका[illegible]
त्रबध्वाः ॥ सोपानकरणं पश्चिमभागे उपरि चतुर्दिक्षु अधोयथाचारं ॥ सोपा[illegible]

धु

चतुर्हस्ता ॥ चतुरस्रा ॥ इति विवाहवेदी ॥ अथ मधुपर्कः ॥ तत्र कन्यादाता वरस्य पुरतः कृतस्नानः स
पत्नीकउपवेश्यागताय वराय तत्प्रकारोक्तविधिना मधुपर्कं कुर्यात् ॥ तत्रायं क्रमः । विष्टरः पा
द्यमर्घ्यमाचमनीयं मधुपर्को गौः षट् त्रिस्त्रिरेकैकं निवेदयेत् दाता सपत्नीकः प्राङ्मुखः । स्वस्ति
नो मिमीता० मंत्र १ ॥ इति मंत्रेण चतुष्पादभद्रपीठे वरं उपवेशयेत् ॥ सुमुखश्चेत्यादि देशकालौ
स्मृत्वा कन्यार्थिने गृहागताया स्मै स्नातकाय वराय कन्यादानांगभूतं मधुपर्कं करिष्ये ॥ अथ
वा कन्यार्थिनं गृहागतं स्नातकं वरं मधुपर्केणार्हयिष्ये ॥ प्रागुक्तविष्टरमादाय ॥ विष्टरो विष्टरो
विष्टरः ॥ प्रतिगृह्यतां प्रतिगृह्णामीति वरः ॥ वरस्तु ॥ अहं वर्ष्मेत्यस्य वामदेवः सूर्योनुष्टुप् ॥ वि

धाविष्टरो

॥अं० प्र०॥

॥१२६॥

ष्टरोपवेशने वि० ॥ अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ॥ इदं तमधितिष्ठामि यो मा कश्चाभिदा मि
सति ॥ इति मंत्रेण उदगग्रे विष्टरे उपविशयेत् ॥ पाद्यं पाद्यं पाद्यं प्रतिगृह्यतां ॥ प्रतिगृह्णामि ॥
ततो दक्षिणसव्यौ पादौ क्रमेण प्रक्षालयेत् ॥ ॐ अस्मिन्राष्ट्रे० ॥ ततो वरो लौकिकजले
नाचम्य ॥ अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतां प्रतिगृह्णामि ॥ वरांजलौ निक्षिपेत् ॥ आचमनी
यमाचमनीयमाचमनीयं ॥ प्रतिगृह्यतां ॥ प्रतिगृह्णामि ॥ ततोऽस्यैकदेशं गृहीत्वा अमृतो

तिं२

पस्तरणमसीँ पीत्वा ॥ लौकिके जलेनाचम्य ॥ आ[illegible]नीयमानं मधुपर्कं मित्रस्य त्वा च
क्षुषा प्रतीक्षे इत्यवेक्ष्य ॥ मधुपर्को मधुपर्को मधुपर्कः ॥ प्रतिगृह्यतां देवस्य त्वा सवितुः ।

प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति मंत्रेणांजलिना प्रतिगृह्यांजलिस्थमेव म
॥ मधुवाता इति तृचस्य राहूगणो गोतमो विश्वेदेवा गायत्री ॥ मधुपर्कावेक्षणे वि० ॥ ॐ मधु
वाता ऋतायते मधुक्षरंति सिंधवः ॥ माध्वीर्नः संत्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पा
र्थिवं रजः ॥ मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः ॥ माध्वीर्गावो
भवंतु नः ॥ तत्पात्रं सव्यहस्ते धृत्वा ॥ अंगुष्ठानामिकाभ्यां मधुपर्कं त्रिः प्रदक्षिणमालो
ड्यांगुलिमेतं मधुपर्कलेपं वसवस्त्वा गायत्रेण छंदसा भक्षयंतु ॥ प्राच्यां दिशि निमा
र्ष्टि ॥ एवं रुद्रास्त्वा त्रैष्टुभेन छंदसा भक्षयंतु ॥ दक्षिणतः ॥ आदित्यास्त्वा जागतेन छंदसा

अ० प्र०
१८७

भक्षयंतु॥पश्चात्॥विश्वेत्वादेवा आनुष्टुभेन छंदसाभक्षयंतु॥अंततः॥भूतेभ्यस्त्वेति त्रिराव
तेनमंत्रेणमध्याल्किंचिद्गृहीत्वा त्रिरु[illegible]क्षिप्यानंतरां चंद्रमोविधायमधुपर्कैकदेशं गृहीत्वा
विराजोदोहोसीति प्राश्याचम्य॥पुनर्गृहीत्वा विराजोदोहमसीय इति प्राश्याचम्य॥पुनर्गृही
त्वामयिदोहः पद्यायैविराजः इति प्राश्याचम्य॥मधुपर्कशेषंतुदङ्मुखोब्राह्मणायप्रयछेद्वा
प्सुनिक्षिप्य सर्वंनिवेदिताचमनीयैकदेशंगृहीत्वा अमृतापिधानमसीतिपीत्वाचम्याचमनी
जलशेषंगृहीत्वा सत्यंयशःश्रीर्मयिश्रीःश्रयतां इति प्राश्य लौकिकोदकेनद्विराचामेत्॥अंततो
दातागौर्गौर्गौः प्रतिगृह्यतां प्रतिगृह्णामीति वरः॥मातारुद्राणामित्यस्य भार्गवो जमदग्नि

र्गौस्त्रिष्टुप्॥गोरुत्सर्जने विनियोगः॥ॐ मातारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्य
नाभिः॥प्रनुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट॥इतिजपित्वा॥ॐ उत्सृजते

मंत्र

तिविसर्जयेत्॥ततोदातागंधमाल्यवस्त्रयुगोपवीतयुगाभरणादिवरंयथाविभवंपूजयेत्॥वि
ष्टरलक्षणंपरिशिष्टे॥पंचाशताभवेद्ब्रह्मातदर्धेनतुविष्टरः॥ऊर्ध्वकेशोभवेद्ब्रह्मालंबकेश
स्तुविष्टरइति॥मधुपर्केदध्यालाभेपयोजलंवाप्रतिनिधिः॥वरस्याभावेघारवात्तघारवाग
त्यचोदितः॥मधुपर्कःप्रदातव्यो अन्यशाखेपिदातरि॥इतिमधुपर्कः॥ततःकन्यापरिगृही ता
हतवस्त्रागौरीहरौइंद्राणीपूजयित्वातिष्ठेत्॥सिततंदुलैःद्रोणराशीकृत्वास्वस्तिकंकिमंतः

अ० प्र०
१८८

पटं राश्योर्मध्ये उत्तरदशं धारयेत्॥ अथ पूर्वराशौ पत्न्युपवेशनं वरं पश्चिमराशौ प्राङ्मुखं कन्यां
तंडुलजीरकगुडानां अञ्जलिपूर्णौ अवस्थाप्य वधूवरौ चमनेन संस्पृश्ये पतौ ध्यायंतौ समाहितौ तिष्ठे
तां॥ अथ ज्योतिषकेन मंगलपद्यपाठपूर्वकं सुमुहूर्तौ स्वस्ति देवलग्नमिति पठितेषु प्रतिष्ठितेषु का
लेसद्योंतः पटमुदक्प्रसार्य कन्यावराभ्यां परस्परमस्तके अंजलिस्थतंडुलगुडजीरकवि
किरणं परस्परनिरीक्षणं चैतत्करणीयं॥ ॐ प्रतिष्ठा॥ नत्तेप्रतिष्ठा॥ तदावरः॥ अघोरत्
श्रीवरुणापति श्रीबृहस्पते॥ इंद्रपुत्र श्रीलक्ष्म्यं तामस्येसवितुः सव॥ जपन्नीक्षेत्॥
अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः॥ वीरसूर्देवकामा स्योना शंनो भव द्वि

का ३

श्री
१८८

पदे शं चतुष्पदे॥ कन्यया वीक्ष्यमाणो ऽपि तादृशीमेव तत्स्यात्प्रयोगमध्ये॥ ॐ भूर्भुवः स्वः परिम
ज्यदर्भैर्निरस्य अपउपस्पृश्येत्॥ ततः परस्परं शिरसि ऋकवे साद्विरवदानेव पूर्वकं अंज
लिस्थापिताऽक्षतारोपणं कारणीयमाचारात्॥ तानि तु॥ ॐ ऋक्च वा इदमग्रे साम चास्तां सै
व नाम ऋगासीदमो नाम साम सा वा ऋक्सामोपावदन्मिथुनं संभवाव प्रजात्या इति नेत्य
ब्रवीत्साम ज्यायान्वा अतो मम महिमेति ते द्वे भूत्वोपावदतां ते न प्रति चन समवदत ताः तिस्
स्रो भूत्वोपावदंस्तत्तिसृभिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवंति तिसृ
भिरुद्गायंति तिसृभिर्हि साम संमितं तस्मादेकस्य बह्व्यो जाया भवंति नैकस्यै बहवः सह

स्य

पत्न्यौ यदृचं तत्साचामश्चसमभवतां तत्सामाभवत्तत्साम्नः सामत्वं सामन्भवति य एवं वेद यो वै भ
वति यः श्रेष्ठतामश्नुते स सामन्भवत्यसामन्य इति हि निंदन्ति ते वै पंचान्यद्भूत्वा पंचान्यद्भूत्वा कल्पे
तामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा च ऋग्उद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निध
नं च वषट्कारश्च ते यत्पंचान्यद्भूत्वा पंचान्यद्भूत्वाकल्पेतां तस्मादाहुः पांक्तो यज्ञः पांक्ताः पश
व इति यदु विराजं दशिनीमभिसमपद्येतां तस्मादाहुर्विराजि यज्ञो दशिन्यां प्रतिष्ठित इत्या

धा

त्मा वै स्तोत्रियः प्रजानुरूपः पत्नी धाय्या पशवः प्रगाथो गृहाः सूक्तं स वा अस्मिंश्च लोके मु
ष्मिंश्च प्रजया च पशुभिश्च गृहेषु वसति य एवं वेद ॥ १ ॥ स्तोत्रियं शंसत्यात्मा वै स्तोत्रियः स

व

त२

मध्यमया वाचा शंस्तव्य आत्मानमेव तत्संस्कुरुतेऽनुरूपं शंसति प्रजा वा अनुरूपः स उच्चैस्तरामिवा
नुरूपः शंस्तव्यः प्रजामेव श्रेयसीमात्मनः कुरुते धाय्यां शंसति पत्नी वै धाय्या सा नीचैस्तरा
मिव धाय्या शंस्तव्याऽप्रतिवादिनी हास्य गृहेषु पत्नी भवति यत्रैवं विद्वान्नीचैस्तरां धाय्यां शं
सति प्रगाथं शंसति स स्वरवत्या वाचा शंस्तव्यः पशवो वै स्वरः पशवः प्रगाथः पशूनामवरुध्या
इंद्रस्य नु वीर्याणि प्रवोचमिति सूक्तं शंसति तदा एतत्प्रियमिंद्रस्य सूक्तं निष्केवल्यं हैरण्यस्तू
पमेतेन वै सूक्तेन हिरण्यस्तूप आंगिरस इंद्रस्य प्रियं धामोपागच्छत्स परमं लोकमजयदुपें
द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठिततम

अ० प्र०
१६०

याचा चाशंसत्वयं तस्मादप्युपिद्रवदव परस्तात्सभतेगच्छतो ने वै ना नाडिगमिष्यतिग। हारिद्रवत नांप्र
तिष्ठाप्रतिष्ठा॥२॥ अग्नेवै सुब्रह्मण्यात स्यै सोमोराजा वत्सः सोमे राजनि क्रीते सुब्रह्मण्या
माह्वयंति यथा धेनुमुपह्वयेत्तेन वत्सेन यजमानाय सर्वान्कामान्दुहे सर्वान्हास्मै कामान्दुहु
हे य एवं वेद तदाहुः किं सुब्रह्मण्यायै सुब्रह्मण्यात्वमिति वागेवेति ब्रूयाद्वाग्वै ब्रह्म च सुब्रह्म चेति
तदाहु रथ कस्मादेनं पुमांसं संतं स्त्रीमिवाचक्षत इति वाग्घि सुब्रह्मण्येति ब्रूयात्तेनेति तदाहुर्यदन्ये वेदीनर
ऋत्विज आर्त्विज्यं कुर्वंति बहिर्वेदि सुब्रह्मण्या कथमस्यांतर्वेद्यार्त्विज्यं कृतं भवतीति वेदेर्वा उत्करमुपकि
रंति यदेवोत्करे तिष्ठन्नाह्वयतीति ब्रूयात्तेनेति तदाहुरथ कस्मादुत्करे तिष्ठन्सुब्रह्मण्यामाह्वयतीत्य

ति४
श्री
१६०

षयो वै सत्रमासत तेषां यो वर्षिष्ठ आसीत्तमब्रुवन्सुब्रह्मण्यामाह्वयत त्वन्नो नेदिष्ठाद्देवान्ह्वयिष्यसीति
वर्षिष्ठमेवैनं तत्कुर्वंत्यथो वेदिमेव तत्सर्वामाप्नोतीति तदाहुः कस्मादस्मा ऋषभं दक्षिणामभ्याजंती
ति वृषा वा ऋषभो योषा सुब्रह्मण्या तन्मिथुनं तस्य मिथुनस्य प्रजात्या इत्युपांशु पात्नीवतस्याग्नी
ध्रो यजति रेतो वै पात्नीवत उपांश्विव वै रेतः सिच्यते नानुवषट्करोति संस्था वा एषा यदनुवषट्
कारो नेद्रेतः संस्थापयानीत्यसंस्थितं वै रेतसः समृद्धं तस्मान्नानुवषट्करोति नेष्टुरुपस्थ
आसीनो भक्षयति पत्नीभाजनं वै नेष्टाग्निः पत्नीषु रेतो दधाति प्रजात्या अग्निनैव तत्पत्नीषु
रेतो दधाति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद दक्षिणा अनुसुब्रह्मण्या संतिष्ठते वा

अ० प्र०
१६१

ष्वे सुब्रह्मण्या त्वं दक्षिणा त्वा यद्द्वेव तद्धाचियज्ञमं ततः प्रतिष्ठापयंति प्रतिष्ठापयंति ॥३॥ उत्तमा
प्रतिष्ठा तदेवं क्षत्रं सा श्रीस्तदाधिपत्यं तद्ब्रध्नस्य विष्टपं तत्प्रजापतेरायतनं तत्स्वाराज्यमभ्यो
त्यैतमेवैताभिरेकविंशात्येकविंशत्या ॥४॥ यद्द्यावां चो द्यावापृथिवीयं शंसंति द्यावापृथिवी वै
प्रतिष्ठे इयमेवेह प्रतिष्ठासावमुत्र तद्यद्द्यावापृथिवीयं शंसंति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति
॥५॥ अथैते पोत्रीया आग्नेष्ट्रीयाश्च चत्वार ऋतुयाजाः पत्नीवतः सा विराट् दशिनी तद्विराजि
यज्ञं दशिन्यां प्रतिष्ठापयंति प्रतिष्ठापयंति ॥६॥ मही द्यौः पृथिवी च न इत्येते हि द्यावापृथिवी विश्व
शंभुवेति द्यावापृथिवीये शंसंति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठासावमुत्र तद्यद्द्यावापृ

श्री
१६१

थिवीये शंसंति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयति ॥७॥ धारयन्धारयन्विति शंसंति प्रस्रंसा ह्वा अंत
श्च विभाजंत यथा पुनराग्रंथं पुनर्निग्रंथं मं क्लं बध्नीयान्मयूखं वा तनो धारणाय निहन्यात्तादृक्
धे द्धारयं धारयन्निति शंसंति संतत्यै संतते ह्यहैरव्यवच्छिन्ने यंति य एवं विद्वांसो यंति यंति ॥८॥
अस्मै देवासो वपुषे चिकित्सत यमाशिरा दंपती वाममश्नुतः ॥ पुमान्पुत्रो जायते विंदते वस्वथ
विश्वे अरपा एधते गृहः ॥ आशीर्दायादंपती वाममश्नुतामरिष्टो रायः सचतां समोकसा ॥
य आसिंचत्संदुग्धं कुंभ्या सहेष्टेन यामन्नमतिं जहातु सः ॥ सर्पिर्ग्रीवी पीवर्यस्य जाया पीवा
नः पुत्रा अकृशासो अस्य ॥ सहजानिर्यः सुमखस्यमान इंद्रायाशिरं सह कुंभ्यादात् ॥

आशीर्मऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणं सुवर्चसं॥ संजयन्क्षेत्राणि सहसाहमिं
द्र कृण्वानो अन्यां अधरान्सपत्नान्॥ आशिषमेवैतामाशास्ते पूर्णपात्रे॥ अंततो नुष्टुभा॥
चतुष्पदा एतच्छंदः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति॥ अस्मिंल्लोके प्रतितिष्ठानीति॥ अस्मिं
नेव लोके प्रतितिष्ठति॥ अथो वाग्वा अनुष्टुप्॥ वाङ्मिथुनं॥ आपो रेतः प्रजननं॥ एतस्माद्वै
मिथुनाद्घोमानस्तनयित्नुर्वर्षति॥ रेतः सिंचन्॥ प्रजाः प्रजनयन्॥ यद्वै यज्ञस्य ब्रह्म
णा युज्यते॥ ब्रह्मणा वै तस्य विमोकः॥ अद्भिः शांतिः॥ विमुक्तं वा एतर्हि योक्त्रं ब्रह्मणा॥
आदायै नत्वली सहाय उपगृहीते शांत्यै॥ अंजलौ पूर्णपात्रमानयति॥ रेत एवास्यां

प्रजां दधाति॥ प्रजया हि मनुष्यः पूर्णः॥ मुखं विमृष्टे॥ अवभृथस्यैव रूपं कृत्वोत्तिष्ठति॥ १॥ अनृक्ष
रा ऋजवः संतीति वरं प्राङ्मुखं वधूं च प्रत्यङ्मुखीं कृत्वा॥ ॐ अनृक्षरा ऋजवः संतु पंथा येभिः
सखायो यंति नो वरेयं॥ समर्यमा संभगो नो निनीयात्संजास्पत्यं सुयममस्तु देवाः॥ ततो दाता
यथाशक्ति अलंकृतवराय कन्यां दद्यात्॥ तत्रायं क्रमः॥ आचम्य कुशपाणिः प्राणानायम्य दे
शकालौ संकीर्त्य मम समस्तपितृणां निरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानक
ल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान् द्वाद
शपरान् पुरुषांश्च पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये॥ ब्राह्मविवाहविधिनाय

थाशक्त्यलंकृतकन्यादानमहं करिष्ये॥ इति संकल्प्य॥ कन्यां कनकसंपन्नां कनकाभरणैर्युतां॥ दास्या
मि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः॥ इमां कन्यां प्र
दास्यामि पितॄणां तारणाय च॥ इति मंत्रौ पठित्वा॥ ततो वधूवरौ तिष्ठेतां॥ ततो दाता स्वदक्षिण
स्थभार्यादत्तपूर्वकल्पितजलधारामविच्छिन्नां नवकांस्योपरिधृतकन्यांजल्युपरिस्थवरांज
लिदक्षिणहस्ते क्षिपन्वदेत्॥ कन्या तारयतु पुण्यं वर्द्धतां॥ शिवा आपः संतु॥ सौमनस्यमस्तु॥
अक्षतं चारिष्टं चास्तु॥ दीर्घमायुः श्रेयः शांतिपुष्टिस्तुष्टिश्चास्तु॥ यच्छ्रेयस्तदस्तु॥ यत्पापं
तत्प्रतिहतमस्तु॥ पुण्याहं भवंतो ब्रुवंतु॥ स्वस्ति भवंतो ब्रुवंतु॥ ऋद्धिं भवंतो ब्रुवंतु॥ श्रीर

वरगोत्र समुच्चार्य २

स्त्विति भवंतो ब्रुवंतु॥ अमुकप्रवरान्विता अमुकगोत्रोत्पन्नोहं अमुकशर्मा मम समस्तेत्यादि प्री
तये इत्यंतं पूर्वोक्तमुक्त्वा अमुकप्रवरान्विताअमुकगोत्रोत्पन्नाय अमुकशर्मणः प्रपौत्राय
अमुकशर्मणः पौत्राय अमुकशर्मणः पुत्राय अमुकशर्मणे वराय कन्यार्थिने श्रीधररूपि
णे॥ अमुकप्रवरान्विताअमुकगोत्रोत्पन्नां अमुकशर्मणः प्रपौत्रीं अमुकशर्मणः पौत्रीं अ
मुकशर्मणः मम श्रीं अमुकनाम्नीं कन्यां वरार्थिनीं श्रीरूपिणीं प्रजापतिदैवत्यां प्रजास
हत्वकर्मभ्यस्तुभ्यमहं संप्रददे॥ एवं वारत्रयं कन्यातारयत्वित्यादि संप्रददे इत्यंतं कन्यादा
नं कार्यमिति शौनक आह॥ वरः ॐ स्वस्तीत्युक्त्वा कन्याया दक्षिणांसे मभिमृश्य॥ क इदं

कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा
प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु ॥ इति जपित्वा ॥ धर्मप्र
जासिध्यर्थं कन्यां प्रतिगृह्णातु भवान् ॥ वरः प्रतिगृह्णामीति वदेत् ॥ दाता ॥ गौरीं कन्यामि
मां विप्र यथाशक्ति विभूषितां ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ कन्ये मम्माग्रतो
भूयाः कन्ये देवि पार्श्वयोः ॥ कन्ये मे सर्वतो भूयास्त्वद्दानान्मोक्षमाप्नुयां ॥ मम वंशकुले जा
ता पालिता वत्सराष्टकं ॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धिनी ॥ न्यु नवयस्का यां पालि
ता वर्षसप्तकमित्याद्यूहः कार्यः ॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयं ॥ नातिचरा

मीति वरः ॥ दाता देशकालौ स्मृत्वा कृतस्य कन्यादानस्य प्रतिष्ठासिध्यर्थं इमां दक्षिणां लक्ष्मीनारायण
स्वरूपिणे वराय तुभ्यमहं संप्रददे न मम इति वदेत् ॥ ॐ स्वस्तीति वरः ॥ ततो दाता इदं भोजनपात्रं उ
पपात्रद्वयं जलपात्रं च तुभ्यमहं संप्रददे ॥ ततो दाता जलभाजन भोजनभाजन मोमीहिष्य श्वागजदा
सीदासभूवाहनालंकारादि यथाविभवं संकल्पपूर्वकं वराय दद्यात् ॥ तत्र मंत्राः ॥ यज्ञसाधनभू
ताय विश्वस्याघप्रणाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥ इति गोः ॥ सर्वसस्याश्रया
भूमिर्वराहेण समुद्धृता ॥ अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे ॥ भूमेः ॥ इयं दासी मया तुभ्यं श्री
वत्स प्रतिपादिता ॥ सदा कर्मकरी भोग्या यथेष्टं भुज्यतां ॥ दास्याः ॥ अश्वत्थेशयनं नित्यमनंतां

श्रियमुन्नतिं॥ सौभाग्यं देहि मे नित्यं शय्यादानेन केशव॥ शय्यायाः॥ हिरण्यगर्भसंभूतं सौवर्णं चांगु
लीयकं॥ सर्वप्रदं प्रयच्छामि प्रीणातु कमलापतिः॥ अंगुलीयकस्य॥ क्षीरोदमथने पूर्वं मुद्भूतं कुंड
लद्वयं॥ श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति॥ कुंडलयोः॥ इदं गृहं गृहाण त्वं सर्वोपस्कर सं
युतं॥ तव विप्र प्रसादेन ममास्त्वभिमतं फलं॥ गृहस्य॥ इंद्रादिलोकपालानां या राज्यमहिषी शुभा॥
महिषासुरस्य जननी मा दत्तेनेस सर्वकामदा॥ महिष्याः॥ परापवादे पैशून्यादभक्ष्यस्य च भक्ष
णात्॥ उत्पन्नं पापं प्रदानेन ताम्रपात्रे नश्यतु॥ ताम्रपात्रस्य॥ यानि पापान्यकामान्यानि का
मोत्थानि कृतानि च॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा॥ कांस्यपात्रस्य॥ इत्यादि॥ त

तस्य कन्यादानकर्मणः सांगतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् यथाकालं भोजयिष्ये॥ यथाशक्ति भूय
सीं दक्षिणां दातुमहमुत्सृजे॥ अथ वरः॥ पलक्षीवांसंवननं विश्वेदेवा नुष्टुप्॥ कुक्ष्यभिमर्शने वि०॥ य
लक्षीवांसंवननं पुत्रो अंगिरसामभवेत्॥ तेन नोद्य विश्वेदेवाः संप्रियां समचीचरन्॥ इत्यनेन कन्या
या दक्षिणकुक्षिमभिमृशेत्॥ अथ पुरोधाः॥ कांस्यपात्रे पूर्वार्चितकलशजलमासिंच्य॥ अनाधृ
ष्टमित्यस्य वामदेव आपो बृहती॥ उदकाभिमंत्रणे विनि०॥ अनाधृष्टमस्यनाधृष्यं देवानामो
जो अभिशस्तिपाः॥ अनभिशस्त्यं जसा सत्यमुपगेषं स्विते मा धाः॥ इति जलमभिमंत्र्य कुशैः
॥ ॐ आ नः प्रजां म० १॥ अघोरचक्षु० २ इमां त्वमिंद्र० ३ संम्राज्ञी० ४ समुद्रज्येष्ठा० ४ आपो हिष्ठा० ३

इतिमंत्रैरभिषिंचेत्॥ ततोदुग्धाक्तेनद्विगुणशुक्लसूत्रेणदंपतीकंठदेशेकटिदेशेचईशानीमा
रभ्यपंचवारंचतुर्वारंवाप्रदक्षिणंवेष्टयेत्॥ पुरोधाएतैर्मंत्रैः॥ परित्वागिर्वणोगिरइमाभवंतुवि
श्वतः॥ वृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयः॥ तान्वोमहोमरुतएवयाव्नोविष्णोरेषस्यप्रभृ
थेहवामहे॥ हिरण्यवर्णान्ककुहान्यतस्रुचोब्रह्मण्यंतःशंस्यंराधईमहे॥ दशावनिभ्योदशक
क्ष्येभ्योदशयोक्त्रेभ्योदशयोजनेभ्यः॥ दशाभीशुभ्योअर्चताजरेभ्योदशधुरोदशयुक्तावह
द्भ्यः॥ तेअद्रयोदशयंत्रासआशवस्तेषामाधानंपर्येतिहर्यतं॥ तऊसुतस्यसोम्यस्यांधसों
शोःपीयूषंप्रथमस्यभेजिरे॥ तेसोमादोहरीइंद्रस्यनिंसतेंशुंदुहंतोअध्यासतेगवि॥ ते

भिर्दुग्धंपपिवान्सोम्यंमध्विंद्रोवर्धतेप्रथतेवृषायते॥ वृषावोअंशुर्नकिलारिषाथनेलावं
तः सदमित्स्थनाशिताः॥ रैवत्येवमहसाचारवस्थनयस्यग्रावाणोअजुषध्वमध्वरं॥
ततःकंठदेशस्यसूत्रमधोनिष्कास्यकुंकुमाक्तमूर्णायुक्तंचकृत्वातेनहरिद्राखंडंवध्वा
तद्वधूवामहस्तप्रकोष्ठेवरोबध्नीयात्॥ नीललोहितंभवतीतिमंत्रेण॥ नीललोहितंभ
वतिकृत्यासक्तिर्व्यज्यते॥ एधंतेअस्याज्ञातयःपतिर्बंधेषुबध्यते॥ कटिदेशस्यसूत्र
मुपरिनिष्कास्यतादृशंकृत्वावरदक्षिणहस्तप्रकोष्ठेवधूर्बध्नीयात्॥ यद्वा॥ विश्वेत्तात
सवनेषुप्रवाच्यायाचकर्थमघवन्निंद्रसुन्वते॥ पारावतंयत्पुरुसंभृतंवस्वपावृणोः

अ०प्र०
१८७

शर्माय पक्षे विवंधये॥ ततः अग्ने वृत्रहत्योग्निर्द्रविणस्युः॥ पूर्णा स्रुक् त्वं बंधो पनेर्विनियोगः॥ अग्ने विश्वे
भिः स्वनीक देवैरूर्णावंतं प्रथमः सीद योनिं॥ कुलायिनं घृतवंतं सवित्रे यज्ञं नय यजमानाय सा
धु॥ इति वरो वध्वा दक्षिणोत्तरकेशपक्षयोः क्रमेणामंत्रा रत्याऊर्णादशां वध्नीयात्॥ शिरसे वितुंच
ति यदि कृतेभवतइत्यग्रे सूत्रनिर्देशात्॥ ततः अक्षतारोपणं कुर्यात्॥ वरः वध्वं जलौ क्षीरेण
द्विरुपस्तीर्य द्विवारं तथैव तंडुलानोप्य तेन तथैव द्विरभिघारयेत्॥ ततो वरांजल्या वध्वेवमेव दा
द्या अन्येन वा पूरिते दातादेतदंजल्योः सुवर्णं निधाय॥ वरांजलिं कन्यांजल्युपरि निधाय कुर्या
त्॥ कन्यां उद्धृत्य तयां जलिस्थानक्षतान्॥ भगो मे कामः समृध्यतामिति वरमूर्ध्न्यारोपयेत्॥

श्री
१८७

कन्या तारयतु। पुण्यं वर्धतां। दक्षिणाः पांतु। बहुदेयं चास्तु। दीर्घमायुः श्रेयः
शांतिः पुष्टिस्तुष्टिश्चास्तु। तिथिकरणम्....

ततो वरः॥ यशो मे कामः समृध्यतामिति कन्याशिरसि निक्षिपेत्॥ एवं पुनर्द्विवारं कार्यं॥ द्वितीये॥
श्रियो मे कामः समृध्यतां॥ वधूः॥ धर्मो मे कामः समृध्यतामिति वरः॥ प्रजा मे कामः समृध्य
तामिति वधूः॥ यशो मे कामः समृध्यतामिति वरः॥ कन्या वरांजलिं द्विरुपस्तीर्य द्विस्तंडुले
रापूर्य द्विरभिघारयेत्॥ तत्रोदाद्यान्येन वा पूर्ववत्कृत्वा ततो वरः॥ यशो मे०॥ कन्यामूर्ध्नि निक्षि
पेत्॥ कन्या तु॥ भगो मे०॥ इति वरमूर्ध्नि॥ एवं पुनर्द्विवारं कार्यं॥ धर्मो मे० वरः॥ श्रियो मे० वधूः॥
यशो मे० वरः॥ प्रजा मे का० वधूः॥ सप्तमे तत्र छीमक्षतारोपयेत्॥ स्वशिरसि पुष्पं सघृतक्षीरे
णाप्लाव्य कन्याललाटे तिलकं कुर्यात्॥ सापि स्वशिरःपुष्पेण तथैव वरललाटे तिलकं कुर्यात्॥

वधूपर्वकार

पुष्पमालांबरं कंठे निदध्यात् ॥ वरोपि कन्याकंठे ॥ ततो वधूवरौ प्राङ्मुखावुपवेश्य वस्त्रद्वयं सकंचुकं कु
ङ्कुमणिसूत्रं च धौ समर्पयेत् ॥ श्रिये जातनीरा अनं ॥ युवं वस्त्राणीति वस्त्रं ॥ हिरण्यरूपमिति हिरण्यं ॥
ततो वरः तत्सूत्रं वधूकंठे वध्नीयात् ॥ मांगल्यतंतुनानेन मम जीवनहेतुना ॥ कंठे बध्नामि सुभगे त्वं
जीव शरदां शतं ॥ इष्टदेवतास्मरन्बध्नीयात् ॥ भूषणे आयुष्यं वर्चस्यमिति सूक्तं पठन्भूषयेत् ॥ त
तः पुरोधा उभाभ्यां गणपतेरावाहनादि दक्षिणांतोपचारैः पूजयेत् ॥ तत्रायं क्रमः ॥ विवाहस्यनि
र्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्ये ॥ इति संकल्प्य ॥ पूजां कारयेत् ॥ गणानां त्वा इति मंत्रेण गण
पतिपूजनं कृत्वा ॥ आतू न इंद्र क्षुमंतं चित्रं ग्राभं संगृभाय ॥ महाहस्ती दक्षिणेन ॥ विद्मा हि त्वा तु

धमसौभाग्यार्थं महालक्ष्मीपार्वतीशचीपू०
आदौ नि० ऽमो गणपतिपू०

विकुर्मिं तुविदेष्णं तुविमघं ॥ तुविमात्रमवोभिः ॥ नहि त्वा शूर देवा न मर्त्तासो दित्संतं ॥ भीमं न गां वारयं
ते ॥ एतो न्विंद्रं स्तवामेशानं वस्वः स्वराजं ॥ न राधसा मर्धिषन्नः ॥ प्रस्तोषदुपगासिषच्छ्रवत्सामगी
यमानं ॥ अभि राधसा जुगुरत् ॥ १ ॥ आ नो भर दक्षिणेनाभि सव्येन प्रमृश ॥ इंद्र मा नो वसोर्निर्भाक् ॥
उपक्रमस्वा भर धृषता धृष्णो जनानां ॥ अदाशूष्टरस्य वेदः ॥ इंद्र यस्तु ते अस्ति वाजो विप्रेभिः स
नित्वः ॥ अस्माभिः सु तं सनुहि ॥ सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चंद्राः ॥ वशैश्च मक्षू जरंते ॥
॥ २ ॥ तत्र वरेण यथाशक्ति गणपतिप्रीतये दक्षिणा देया ॥ पुरोधा दंपत्योर्नैरुतरीयांतयोः पूजामं
त्राभ्यां रथकूरपकू वध्नीयात् ॥ व्रतसमाप्त्यंतं ग्रंथिद्वयं न विसृजेतां ॥ ततः पुरोधा नीललोहितं

अ० प्र०
१९९

भवतीतिमंत्रेणतयोरुत्तरीयांतौमिथोवध्नीयात्॥ततोसौभाग्यार्थंमहालक्ष्मीपार्वतीशचीपूजये
त्॥तत्रादौसंकल्पः॥ममसौभाग्यप्राप्त्यर्थंइंद्राण्याःपूजनंचकरिष्ये॥इतिसंकल्प्य॥पूजांकृत्वा
प्रार्थयेत्॥देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभामिनी॥विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे॥इति
प्रार्थ्य॥सुवासिनीभ्यःसौभाग्यद्रव्यादिदानंकुर्यात्॥वधूः॥अथद्विजैराशिषोदेयाः॥तत्र
मंत्राः॥भद्रंकर्णेभिः०इंद्रविष्णोदृ०सविताप०नवोनवो०उच्चादिवि०दक्षिणावतामिद्
मानिचित्रादक्षिणावतांदिविसूर्यासः॥दक्षिणावंतोअमृतंभजंतेदक्षिणावंतःप्रतिरंतआ
युः॥इत्यादयआयुःप्रदांतामंत्राः॥ततोवधूवरौमंत्रघोषेणवेदिकायांगच्छेतां॥गृह्यपरिशिष्टा

श्री
१९९

१

चारानुसारेणकन्यादानंतत्प्रतिग्रहजवनिकापूर्वकमंत्रवन्निरीक्षणाक्षतारोपणादास्यादिदानपुरो
धःकर्तृकाभिषेकपरस्परक्षीरघृतालिंलककरणमालारोपणपूर्वसंपादितकौतुकसूत्रबंधगणपति
पूजनक्रमुकबंधादित्ययमनुष्ठानक्रमउक्तः॥सर्वदेशाचारवंशानानुसर्त्तव्यः॥इतिकन्यादानप्रयो
गः॥अथविवाहहोमः॥वरःप्रागुक्तवेदिकायांपीठाघासनेप्राङ्मुखवधूसहउपविश्यद्विराचम्यप्रा
णानायम्यदेशकालौसंकीर्त्यप्रतिगृहीतायामस्यांवध्वांभार्यात्वसिद्ध्येगृह्याग्निसिद्ध्यैचविवाहहो
मंकरिष्ये॥तदंगंस्थंडिलाद्यग्निप्रतिष्ठापनंकरिष्ये॥अग्निध्यानांतंकृत्वा॥अग्नेःप्रत्यग्दृषदंसो
पलंप्रतिष्ठाप्य॥अग्नेरीशानदेशेउदकुंभंपर्णेनिधायतंपल्लवैरुपधायगंधपुष्पैरलंकृत्योदगग्रैः

~~[illegible]~~तथाममविवाहाग्नेःगृह्यत्वसिद्धिद्वाराश्रीप०र्थंगृह्यप्रवेशनीयहो
मंचतंत्रेणकरिष्ये॥आदौनिविघ्नतासि०र्थंमहागण०नपूर्वकंकर्मणःपुण्याहवाच
नंचतंत्रेण०

अ० प्र०
२००

सतंदुलराशिमुपकल्प्य समिदाधारयास्मिन्विवाहहोमे देवतापरिग्रहार्थमन्वाधानमहं करिष्ये ॥ अस्मि
नन्वाहितेग्नाविध्मादिआघारावाज्येनेत्यंतमुक्त्वा अत्र प्रधानं त्रिरग्निं पवमानं अग्निं प्रजापतिं चाज्ये
न अर्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिं चलाजाद्रव्येण चतुर्वारं सूर्यां सावित्रीं आज्येन शेषेण स्वि
ष्टकृतमित्याद्यिध्मं घृतयुक्तं को स घोयक्ष्य इत्यग्न्याधाय परिसमूहनादि षट्पात्रासादनांतं कुर्यात् ।
प्रोक्षणी स्रुवं चमसे चाज्यभाजने धान्यवर्हिष्यासादय पात्रपश्चिमतो लाजाः शूर्पे वासादयाधिश्र
पणांतं कृत्वाज्यं लाजैः सहपर्यग्निं कृत्वाज्योत्पवने कृते लाजान् त्रिः प्रोक्ष्य स्रुवसंमृज्य अन्वार
ब्धेनाधानाद्याघारहोमौ कुर्यात् ॥ अत्राज्यभागौ न स्तः ॥ अथ प्रधानहोमः ॥ अग्न आयूंषीतितिसृ

श्री
२०

णां शतवैखानसा ऋषयः ॥ अग्निः पवमानो देवता ॥ गायत्री छंदः ॥ विवाहप्रधानाज्यहोमे वि० ॥ ॐ अग्न आ
यूंषि० ॥ अग्निर्ऋषिः० अग्ने पवस्व० ॥ स्वाहांताः अग्नये पवमानायेदं० ॥ इति त्यागः ॥ त्वमर्यमा वसु
श्रुतोग्निस्त्रिष्टुप् ॥ विवाहप्र० ॥ त्वमर्यमा० अग्नये इदं० ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ विवाह
प्र० ॥ प्रजापते० ॥ प्रजापतये इदं० ॥ एवं पंचाहुतीर्हुत्वा ॥ प्राङ्मुखोपविष्टायाः पुरतः प्रत्यङ्मुखस्तिष्ठन् ॥
वर उत्तानं दक्षिणपाणिं सांगुष्ठं दक्षिणकरेण ॥ गृभ्णामीत्यस्य सूर्यासावित्री सूर्यासावित्री त्रिष्टुप् ॥ भा
र्यायाः पाणिग्रहणे वि० ॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ॥ भगो अर्यमा स
विता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ अनेन मंत्रेण दक्षिणपाणिं सांगुष्ठं गृह्णीयात् ॥ ततो वधू

अ॰प्र॰
२०१

विवा॰

मुत्थाप्य तयाकरौ प्रक्षालयित्वा उपस्तीर्य वधूश्चात्तस्थानीयेन वापितव्यपुत्रादिना तिष्ठता शूर्पस्थाले
जान्मुख्याञ्जलिरोप्य स्वयं चैतं वावत्ती तदाञ्जिरोप्य शूर्पस्थानभिघार्याञ्जलिस्थानभिघार्य॥ अर्यमणं वरु
णं पूषणमिति त्रयाणां वामदेवोर्यमाग्निर्वरुणाग्निः पूषाग्निरनुष्टुप्॥ विवाहप्रधानलाजाहोमे वि०॥ ॐ
अर्यमणं नु०१॥ इति मंत्रं पठित्वा तिष्ठन्तिष्ठंत्या धृतांजलिरंजल्यविच्छेदेनांगुल्यग्रैरंजलिं वामपार्श्वे
णैवाहावयेत्॥ वरोर्यमाग्नय इति त्यजेत्॥ ततो दृषदूर्ममग्निमुदकुंभसहितं वधूं प्रदक्षिणं परिणय
न्स्वयमग्नेः प्रदक्षिणं कुर्वन् जपेत्॥ अमोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहम्
ऋक्त्वं ताविह विवहावहै प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेम शरदः शतं॥ ततो

श्री
२०१

वधूं प्राङ्मुखीं हस्ताभ्यामधिपादाभ्यां दृषदं॥ इममश्मानं वामदेवो वधूरनुष्टुप्॥ अश्मारोहणे वि०॥ ॐ इममश्मा
नमारोहाश्मेव त्वं स्थिरा भव॥ सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः॥ इति मंत्रेणारोपयेत्॥ पूर्ववदंजल्यु
पस्तरणादि॥ ॐ वरुणं नु०१॥ पूर्ववद्वरुणाग्नय०॥ पुनरमोहमस्मीति पूर्ववत्॥ इममश्मानमित्यश्मान
मारोपयेत्॥ पुनः पूर्ववदंजल्युपस्तरणादि॥ पूषणं नु०१ पूर्ववदुक्त्वा पूषाग्नय इदं०॥ पूर्ववदिममश्मान
मारोहयेत्॥ ततः शूर्पकोणेन शिष्टान्लाजानाग्नावभिमुखं वरो जुहोति प्रजापतये स्वाहेत्युच्चार्य प्रजा
पतय इदं०॥ अत्र परिणयनाश्मारोहणे न स्तः॥ ततो वरः॥ प्रत्वा मुंचामीति द्वयोः सूर्या सावित्री स
र्या सावित्री आद्या त्रिष्टुप् द्वितीयानुष्टुप्॥ शिखाविमोचने वि०॥ प्रत्वा मुंचामि वरुणस्य पाशाद्येन त्वा

अ० प्र०
२०२

बंभात्सविता सुशेवः॥ ऋतस्य योनौ सुकृतस्य लोके रिष्टां त्वा सह पत्या दधामि॥ प्रेतो मुंचातु नामुतः
सुबद्धाममुतस्करं॥ यथेयमिंद्र मीढ्वः सुपुत्रा सुभगा सति॥ दक्षिणो त्तरशिखे विमुंचति॥ शिखे वर
स्य वध्वाश्च तूष्णीमेव विमुंचति॥ इति कारिकोक्तेः॥ अथाग्नेरुदीच्यां सप्त तंडुलपुंजोपरि वध्वा द
क्षिणपादेन वरः क्रमेणाभ्युत्क्रमयेन्मंत्रैः॥ इष एकपदी भव॥ सा मामनुव्रता भव॥ पुत्रान्विंदावहै ब
हूंस्ते संतु जरदष्टयः॥१॥ ऊर्जे द्विपदी भव॥ सा०२॥ रायस्पोषाय त्रिपदी भव॥ सामा० ३॥ मायोभ
व्याय चतुष्पदी भव॥ सामा०४॥ प्रजाभ्यः पंचपदी भव॥ सामा०५॥ ऋतुभ्यः षट्पदी भव॥ सामा०
६॥ सखा सप्तपदी भव॥ सामा०७॥ इत्यादिनाम सप्तमंत्राशिं भवेत्पादेः सर्वत्रानुषंगः॥ ततो वरः स्व

श्री
२०२

शिरसा वधूशिरः संयोज्य कलशस्थमुदकमादाय आत्मशिरः पश्चाद्वधूशिरः शं नो निरस्तेत्यादि अ
रिष्टनिरसनमस्तु इत्यंतं मंत्र दशमंत्रैः अभिषिंच्य स्वासनेउपविश्य चतुर्भिराज्याहुती र्जुहुयात्॥
तत्रेमे मंत्राः॥ आ नः प्रजामिति चतसृणां सूर्या सावित्री २ आद्या जगती॥ द्वितीया त्रिष्टुप्॥ अंत्ये
द्वे अनुष्टुभौ॥ गृहप्रवेशप्रधानाज्यहोमे वि०॥ आ नः प्रजां०॥ ऋ०४॥ सूर्यायै सावित्र्या इदं०॥ समं
जंत्विति अस्य सूर्या सावित्र्यनुष्टुप्॥ दधिप्राशने वि०॥ आज्यशेषेण हृदयांजने वि०॥ ॐ समंजंतु० १॥
मंत्रेण आत्मानं तूष्णीं वधूं च॥ आज्येन स्विष्टकृद्धोमं कृत्वा इध्मसन्नहनहोमादि समाप्य॥ दिवा
विवाहे संध्यामुपास्य ध्रुवमरुंधतीं सप्तऋषिप्रभृतीन्वध्वा सह दृष्ट्वा जीवपत्नी प्रजां विंदेयेति व

धातयोः विवाहगृहप्रवेश २

अ०प्र०
२०३

धावाचयेत्॥रात्रिविवाहे संध्यामुपास्यैव ध्रुवादिदर्शनात्॥प्रदोषकालोपलक्षणमेतत्॥इति विवा
हप्रवेशनीयहोमः॥अथ भिन्नगृहप्रवेशनीयहोमः॥शिष्टास्तु श्वशुरगृह एव कुर्वंति॥अ
त्र यथाचारं व्यवस्था॥अथ प्रयोगः॥वरगृहे देशकालौ संकीर्त्य मम विवाहाग्नेर्गृहस्थसिद्धिद्वा
रा श्री॰र्थं गृहप्रवेशनीयहोमं करिष्ये॥स्थंडिलकरणादि विवाहाग्निप्रतिष्ठापनांतं कृत्वा अस्मि
न् गृहप्रवेशनीहोमे देवतापरिग्रहार्थमन्वाधानमहं करिष्ये॥अस्मिन्नन्वाहितेऽग्नाविव्यादि
चक्षुषी आज्येनेत्यंतमुक्त्वा सूर्यां सावित्रीं चतुर्वारमाज्येन शेषेण स्विष्टकृतमित्यादि उक्त्वाऽ
ग्नौ समिधावाधाय परिसमूहनादि अन्न्यलंकरणांतं कुर्यात्॥पत्न्यान्वारब्ध इध्माधाना

श्री
२०३

ज्यभागांतं कृत्वा॥आनः प्रजामित्यादि ऋक्चतुष्टयस्य सूर्या॥गृहप्रवेशनीयप्रधानाज्यहोमे॰॥पूर्वव
न्मंत्रैर्जुहुयात्॥तथैव त्यागः॥समंजंत्वित्यनेन दधिप्राशनं॥आज्यशेषेण हृदयांजनं कुर्यात्॥स्व
यं मंत्रेण वध्वा तूष्णीं॥हस्तं प्रक्षाल्य आज्यशेषेण स्विष्टकृदादि होमशेषं समापयेत्॥ततः द्विजा
शिषो गृहीत्वा मुदितो तिष्ठेतां॥अत्र विशेषमाहाचार्यः॥विवाहश्चेद्दिवे द्वाभ्यां सार्धयाम द्वयाद
धः॥तद्देवोपासनं कुर्यात्केचिद्दृष्टविदो विदुः॥नित्यहोमे तु कालस्यार्धाधो नाडीनवालिका॥
द्विगुणस्याद्विवाहे तु प्रवदंति महर्षयः॥इत्याश्वलायनस्मृतौ॥अर्धरात्रे व्यतीते तु परेद्युः प्रा
तरेव हि॥गृहप्रवेशनीयस्यादि नियज्ञविदो विदुः॥त्रिरात्रादिव्रतं चरित्वा वध्वा परिहितं वा

सः प्रक्षाल्य॥ सत्येनोत्तभिता इति सूक्तं पाठ प्रार्थनश्च। आनीतेभ्यो ब्राह्मणेभ्यो दद्यात्॥ ततो व्रतसंपूर्णतासिध्यर्थं यथाश
क्ति ब्राह्मणान्भोजयिष्ये॥ ॐ स्वस्तिभवंतो ब्रुवंत्विति तानुक्त्वा ॐ स्वस्तीति तैर्वा वाचयेत्॥ इति गृहप्रवेशनीयहोमः॥
अथ विवाहाच्चतुर्थदिनरात्रौ न त्रयं भद्रादि संभवेदिनएव वा शिष्टाचारप्राप्तं वरमात्रे कन्यादातृभिर्वंशपात्रदानं का
र्यं॥ सवस्त्रनां बूलदंपत्योर्वंशबंधनं॥ ऐरिण्याख्यं वंशपात्रं पक्वान्नेन परिपूरितं॥ करकैः रुद्रसंख्याकैः सुवर्ण
परिपूरितैः॥ एतावदैरिणीरूपं कर्तव्यं किल सूरिभिः॥ एवं संपाद्य कन्यादाता सभार्यो देशकालौ संकी
र्त्य विवाहस्य संपूर्णफलप्राप्तये वरस्य तत्पितृमातृादीनां तत्सक्षीयाणां च यथाविभवं वस्त्रादिभिः पूजनं
महं करिष्ये॥ वरतत्पितृमातृभ्रात्रादिभिः क्रमेण यथाविभवं वस्त्रादि दत्वा॥ पुनस्तिथ्यादि संकीर्त्य

मम उमामहेश्वरप्रीतिद्वारा कन्यादानफलसंपूर्णतायै वंशाभिवृद्धये च ऐरिणीपूजनं वरमात्रे ऐरिणीदानं च
करिष्ये॥ ऐरिणी त्वमुमादेवि महेशो गिरिजापतिः॥ अतस्त्वां पूजयिष्यामि ऐरिणीं सर्वकामदां॥ १॥ सव
स्त्रां च सदीपां च धूपैः षोडशभिर्वृतां॥ वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये॥ २॥ तदस्तु॰ गन्धो वै॰॥
महावंशपात्रे उमामहेश्वरौ षोडशोपचारैः पूजयित्वा॥ वंशपात्रं वरमात्रे दत्वा मंत्रान्पठेत्॥ तत्रादौ संक
ल्पः॥ इदं सोपस्करं वंशपात्रं उमामहेश्वप्रीतये तुभ्यमहं संप्रददे॥ वरमातृहस्ते जलं क्षिपेत्॥ ततः वंशो
वंशकर श्रेष्ठो वंशो वंशसमुद्भवः अनेन वंशदानेन तुष्टो ऋद्धिं करोतु मे॥ १॥ वंशपात्रमिदं पुण्यं वंशजात
समुद्भवं॥ वंशानामुत्तमं दानमतः शांतिं प्रयच्छ मे॥ २॥ वंशपात्राणि सर्वाणि मया संपादितानि वै॥ उमाकां

अ॰ प्र॰
२०५

तायदत्तानिममगोत्राभिरद्ध्ये॥३॥वंशरद्धिकरंस्थानंसौभाग्यादिसमन्वितं॥वस्त्रेणाच्छादितंपूगफलैहेमसमन्वितं॥४॥सर्वपापक्षयकरंनानाद्रव्यैस्तुपूरितं॥दानानामुत्तमंदानमतःशांतिंप्रयच्छमे॥५॥स्वस्तिनोमिमीतेतिसूक्तेनवरगोत्रजानांशिरस्सिवंशपात्रंनिधायवंशाभिवर्द्धिरस्त्वितिभवंतोब्रुवंतु॥वंशाभिवर्द्धिरस्तु॥कन्यावरपितृमातृकुलसंगयोःप्रत्यगुपवेश्यपृथक्तैाप्रार्थयेत्॥सप्तवर्षात्प्रियंकन्यापुत्रवत्पालितामया॥इदानींतवपुत्रायदत्तास्नेहेनपाल्यतां॥वरमात्रावधूमात्रादिनसक्षसुवासिनीभ्यःसकंचुकंक्षुद्रवंशपात्रंपवायनदानादिवध्वाकारणीयंइत्याद्याचारप्राप्तंयथाचारंज्ञेयं॥इतिरोहिणीदानविधिः॥पूर्ववद्देवकोत्थापनंकुर्यात्॥अथवध्वाप्रथमगृहप्रवेशः॥स्व

श्री
२०५

स्तिनोमिमीतेतिषुभयन्नोअस्त्वित्यंतंसूक्तंजपेत्॥प्रयाणउपपद्यमानेपूषात्वेतोनयतुहस्तगृह्येतिऋचंपठेत्॥वधूगृहप्रवेशःप्रथमेत्वतीयेशुभप्रदःपंचमकेथवाह्नि॥द्वितीयेकेवाथचतुर्थकेवाषष्ठेवियोगाभयदुःखदःस्यात्॥लल्लः॥स्वभवनपुरप्रवेशेदेशानांविप्लवेतथोद्वाहेनववध्वागृहगमनेप्रतिशुक्रविचारणानास्ति॥मांडव्यः॥नित्ययानेगृहेजीर्णेप्राशनांतेषुसप्तसु॥वधूप्रवेशमांगल्येनदोषंगुरुशुक्रयोः॥नियतकालेपिकदाचिन्निषेधमाह॥गर्गः॥व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि॥श्राद्धंविनाशुभंनैवप्राप्तकालेपिमानवः॥तथाअमासंक्रांतिविष्टयादौप्राप्तकालेपिनाचरेत्॥इति॥इहप्रियंप्रजयातइतिवधूगृहंप्रवेशयेत्॥ॐइहप्रियंप्रजायैतेसमृध्यतामस्मिन्गृहेगार्हपत्यायजागृहि॥एनापत्यातन्वं१संसृजस्वा

अ॰ प्र॰
२०६

था॥ जिब्रीविदथमावदाथः॥ सवधूकोवरोगणपतिंलक्ष्मींचयथाचारंसंपूज्य॥ पुण्याहंवाचयित्वावि
प्राशिषोगृहीत्वा॥ एवंगुणेत्यादिगृहप्रवेशांगभूतंलक्ष्मीपूजनमहंकरिष्ये॥ तदादौनि॰ ग॰ स्व
स्तिपुण्याहवाचनंकृत्वा॥ सत्कुमिवनितेउनापुनंतोयत्रधीरामनसावाचमक्रत॥ अत्रासखो
यःसख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि॥ अनेनमंत्रेणषोडशोपचारैःपूजयित्वा॥
कृतस्य॰ यस्यस्मृत्वा॰॥ विवाहात्प्रथमेपौषेआषाढेवाअधिकमासे॥ भर्तुर्गृहेवसेंनस्त्रीचै
त्रेतातगृहेतथा॥ इतिवधूगृहगमनविधिः॥ अथोपासनाख्यंसायंप्रातर्होमोभिधीयते॥ स
चविवाहहोमानंतरंकालीनेसायंकालेभद्राव्यतीपातादिसंभवेपिकृतेअकृतेवागृहप्रवेश

श्री
२०६

म१

नीयहोमोत्तरमारंभणीयः॥ यद्यह्नि विवाहहोमस्तदोत्तरेसायंकालेहोमारंभः॥ रात्रौविवाहश्चेद्धोमेऽन
रेद्युःसायंहोमारंभः॥ तत्रकर्तारः॥ स्वयंस्वस्यासंभवेपत्न्यादयः॥ भगवान्॥ पत्नीकुमारीपुत्रोवाशि
ष्योवापियथाक्रमं॥ पूर्वपूर्वस्यचाभावेविदध्यादुत्तरोत्तरः॥ दक्षः॥ ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथ
विट्पतिः॥ एतैरपिहुतंयत्तुतद्धुतंस्वयमेवतु॥ विट्पतिर्जामाता॥ एतैश्चयजमानानुज्ञयापत्न्य
नुज्ञयावाहोतव्यं॥ पर्वणितुसायंहोमस्वयमेवकार्यो नान्येन॥ अन्येनहोमोदंपत्योसंनिधाने
न्यतरसंनिधानेवाकार्यः॥ उभयोरलाभेक्षंहुतमहुतमेव॥ अथाग्निप्रादुष्करणकालः॥ प्रादु
ष्करणमग्नेःप्रज्वलनं॥ कात्यायनः॥ सूर्येतुशैलमप्राप्तेषट्त्रिंशद्भिरिहांगुलैः॥ प्रादुष्करण

मग्नीनांशान्तर्मासाप्यदर्शने॥एतत्प्रादुष्करणकालात्ययेसमस्तव्याहृतिभिरेकाज्याहुतिःका
र्या॥अथहोमकालः॥आश्वलायनः॥सम्यङ्निम्लोचतिरवौसायंचजुहुयुःसदा॥अथप्रा
तर्हुतेनित्यकालेउदितेर्केयथाविधि॥कात्यायनोपि॥यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्व
तः॥लोहितत्वंचनोयैतितावत्सायंतुहूयते॥मनुः॥लेखामात्रस्तुदृश्येतराशिभिस्तुसम
उदितंतंविजानीयात्तत्रहोमंप्रकल्पयेत्॥अनुकल्पकालमाह॥सूत्रकारः॥प्रदोषांतोहो
मकालः॥संगवांतःप्रातस्तनस्तनमतिनीयचतुर्गृहीतमाज्यंजुहुयात्॥अस्तोत्तरत्रि
मुहूर्तउदयोत्तरश्चत्रिमुहूर्तक्रमेणसायंप्रातश्चहोमवृत्तिफलितार्थः॥अत्रमुख्यकाला

तिक्रमेसमस्तव्याहृतिभिरेकाज्याहुतिः॥प्रायश्चित्तविशेषेणयत्रनोक्तोभवेद्विधिः॥होतव्याज्याहुतिस्त
त्रभूर्भुवःस्वरितीहचेतिकारिकोक्तेः॥गौणकालातिक्रमेतुमनोज्योतिरितिमंत्रेण॥चतुर्गृहीताज्या
हुतिरेकेतिप्रायश्चित्तविवेकः॥अथहोमद्रव्याणि॥गृह्यपरिशिष्टे॥पयोदधिसर्पिर्यवागुगुडोदनंतं
डुलाःसोमस्तैलमापोव्रीहयोयवास्तिलाइतिहोम्यानि॥व्रीहिशालियवगोधूमप्रियंगवःस्वरूपे
णापिहोम्यास्तिलाःस्वरूपेणैव॥बौधायनः॥व्रीहीणांवायवानांवाशतमाहुतिरिष्यते॥होमेप्रका
रउक्तः॥संग्रहे॥द्रवंहविःस्रुवेणैवपाणिनाकठिनंहविः॥अंगुल्यग्रैर्नहोतव्यंनकुर्यादंगुलिभेद
नं॥अंगुल्युत्तरपार्श्वेनहोतव्यमितितुस्मृतिः॥अयंचहोमोआयतनेस्थंडिलेवागत्याग्निंपूर्ववत्प्र

तिष्ठाप्यतत्रकार्यः॥ कुंडेवास्थंडिलेवापीत्युक्तं॥ अथऔपासनहोमः॥ आपननेस्थंडिलेवागत्या
ग्निंपूर्ववत्प्रतिष्ठाप्यविवाहोत्तरसंध्याकालादारभ्योपासनंकुर्यात्॥ तद्यथा॥ यजमानः कृतसंध्या
वंदनपूर्वंप्रादुष्कृतस्याग्नेःपश्चिमतउपविश्यप्राणानायम्यदेशकालौनिर्दिश्यअग्निरूपपरमे
श्वरप्रीत्यर्थंसायमौपासनहोमंकरिष्ये॥ इतिसंकल्प्य॥ द्विजनामानंप्रज्वालितेसोदकेनकपा
णिनासमंतात्प्रदक्षिणंपुनःपुनरुदकमादायत्रिःपरिमृज्यपूर्ववत्परिस्तीर्यत्रिःपर्युक्ष्यप्रागुक्त
द्वादशाद्रव्येषुमध्येप्रक्षालितानार्द्रसिततंडुलप्रसृतिमात्रमग्नेरुत्तरतोनिधायज्वलतादर्भेणा
वज्वल्यप्रोक्ष्यतेनैवत्रिःपर्यग्निकृत्वातदुल्मुकंनिरस्याग्नेःपश्चिमतःकुशेषुसमिधाहविर्नि

ग्नौध्यात्वा॥४

श्री
२०८

धाय॥ विश्वानिनइतितिसृणांआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप्॥ द्वाभ्यामग्न्यर्चनेत्योपस्थानेविं०॥
ॐविश्वानिनः॥ द्वाभ्यामग्न्यांप्रतिपादमष्टदिक्षुगंधादिनापूजयेत्॥ यस्मैत्वंसुकृतेइत्यनेना
ग्निमुपस्थाय॥ दक्षिणंजान्वाच्य॥ तत्समिधंतद्धौअग्नौप्रक्षिप्यअपउपस्पृश्यसमिधप्रदी
प्तायांविधूमज्वालांगारेग्नौशतसंख्यास्तंडुलान्दक्षिणहस्तेनादायसव्यपाणिंहृदिनिधा
यांगुल्युत्तरपार्श्वेणासमिन्मूलतोघंगुलप्रदेशेअग्नयेस्वाहा॥ अग्नयइदं०॥ तस्यऐशानदेशे
पूर्वाहुतेभूयसीमाहुतिंप्रजापतिपदंमनसाध्यायन्स्वाहेत्युच्चार्यासंसृष्टांहुत्वाप्रजापत
यइदं०॥ ततःपरिस्तरणंविसृज्यपरिसमूहनपर्युक्षणेकृत्वोपस्थानंकुर्यात्॥ अग्निमलंकृत्य॥

अग्ने त्वं न इति चतसृणां गौपायनानां लोपायनानां वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुः क्रमेण ऋषयः॥ अग्निर्देवता द्वितीया विराट् छंदः॥ अग्न्युपस्थाने वि०॥ ॐ अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः॥ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥ अयमेकः पक्षः॥ अथ द्वितीयः पक्षः॥ अग्न आयूंषि पवस इति तिसृणां शतं वैखानसा ऋषयः॥ अग्निः पवमानो देवता॥ गायत्री छंदः॥ अग्न्युपस्थाने वि०॥ अग्न आयूंषि० ऋक् ३॥ तंतुं तन्वन्निति वामदेवोग्निर्जगती॥ अग्न्युप०॥ तंतुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो

हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ अग्न्युप॥ प्रजापते॥

रक्ष धिया कृतान्॥ अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनं॥ प्रजापते॥ हिरण्यगर्भः प्रजापतिः प्रजापतिस्त्रिष्टुप्॥ अग्न्युप०॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ इति द्वितीयः पक्षः॥ इत्युपस्थानं॥ अग्निपूजां कृत्वा॥ मा नस्तोक इति भस्म समादाय यथास्थानेषु विभूतिं धा ॐ च मे० स्वस्ति श्रद्धां० देहि मे हव्यवाहनो नम इति संप्रार्थ्य॥ यस्य स्मृत्या०॥ अनेन सायमौपासनाख्येन कर्मणा तेन श्रीभगवान्परमेश्वरः प्रीयतां॥ इत्युक्त्वाग्निं संभारयेत्॥ एवं प्रातरुदयात्पूर्वं प्रादुष्करणं कृत्वा होमकाले पूर्ववत्सर्वांगानि कृत्वा सूर्याय स्वाहेति सायंद्र येणे

वप्रथमाहुतिं हुत्वा द्वितीयाहुतिवत् द्वितीयाहुतिं हुत्वा परिसमूहनादिकं कृत्वा अग्निमलंकृत्य॥
उपस्थानं कुर्यात्॥ सूर्यो नो दिवस्पात्विति पंच वै॥५॥ नमो मित्रस्येति द्वे॥ पूर्ववत्समापयेत्॥
अयमेकः पक्षः॥ अथ द्वितीयः पक्षः॥ उदुत्यं काण्वप्रस्कण्वः सूर्यो गायत्री॥ अग्न्युपस्थाने वि॰॥
उदुत्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥ चित्रं देवानामांगिरसः कुत्सस्त्रिष्टु
प्॥ अग्न्युपस्थाने वि॰॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावा
पृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ सूर्यो नो दिवस्पात्विति चक्षुः सूर्यो गायत्री॥
अग्न्युपस्थाने वि॰॥ सूर्यो नो दिवस्पातु वातो अंतरिक्षात्॥ अग्निर्नः पार्थिवेभ्यः॥ जोषा

सवितर्यस्य ते हरः शतं सवां अर्हति॥ पाहि नो दिद्युतः पतंत्याः॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्व
तः॥ चक्षुर्धाता दधातु नः॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः॥ सं चेदं वि च पश्येम॥ सु
संदृशं त्वा वयं प्रति पश्येम सूर्य॥ विपश्येम नृचक्षसः॥ नमो मित्रस्य सौर्यो भितपाः सूर्यो जगती॥ अ
ग्न्युप॰॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत॥ दूरे दृशे देवजाताय केतवे दि
वस्पुत्राय सूर्याय शंसत॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ अग्न्युप॰॥ प्रजापते॰।
हिरण्यगर्भः प्रजापतिः प्रजापतिस्त्रिष्टुप्॥ अग्न्युप॰॥ हिरण्यगर्भ॰॥ इति द्वितीयः पक्षः॥
इत्युपस्थाय॥ अग्निं संपूज्य॥ मानस्तोके तिभस्ममादाय॥ त्र्यायुषमिति मंत्रेण यथास्थाने

अ०प्र०

२११

षुविभूतिंधारयेत्॥ॐ चमेतिहव्यवाहनोंनमइतिसंप्रार्थ्य अनेनप्रातरौपासनाख्येनकर्मणा तेनश्रीभगवान्परमेश्वरः प्रीयतां॥इत्यौपासनप्रयोगः॥अथ अनुगतप्रायश्चित्तं॥देशका लौसंकीर्त्य अनुगताग्निप्रायश्चित्तं करिष्ये॥उल्लेपादि श्रोत्रियागारात्स्वगृहाद्वा अग्निंप्र तिष्ठाप्याज्योत्सवनादिकृत्वा॥अयाश्चेतिमंत्रस्यविमदऋषिः अयाअग्निर्देवतापंक्तिश्छंदः अनुगताग्निप्रायश्चित्ताज्याहोमेवि०॥ॐ अयाश्चाग्ने० भेषजंस्वाहा॥अग्नेअयासइ दं०॥ॐ भूर्भुवःस्वः स्वाहाप्रजापतयइदं०॥परिसमूहनादिसर्वंकुर्यात्॥सायंवाप्रात र्होमंकुर्यात्॥इतिअनुगतप्रायश्चित्तं॥अथविवाहे आशौचनिर्णयः॥विधिवत्

श्री

२११

तेकन्यावरणेचिराद्यादिव्रतसमाप्तिपर्यंतंमध्येआशौचप्राप्तौतयोर्यसद्यःशौचंचंद्रिकाकारआ हात्रयाज्ञवल्क्यः॥दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे॥आपद्यपिचकष्टायांसद्यःशौचं विधीयते॥दातृवरस्यकन्यापाश्चसद्यःशौचंविवाहइत्यर्थः॥बृहस्पतिः॥विवाहोत्सवय ज्ञेषुत्वंतरामृतसूतके॥पूर्वसंकल्पितार्थेषुनदोषःपरिकीर्तितः॥षट्त्रिंशन्मते॥विवाहो त्सवयज्ञेषुत्वंतरामृतसूतके॥परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः॥विष्णुः॥व्रतयज्ञवि वाहेषुश्राद्धेहोमेर्चनेजपे॥प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं॥प्रारंभस्तेनैवोक्तः॥प्रा रंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः॥नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रिया॥एक

अ०प्र०
२१२

विंशत्यहर्संज्ञे विवाहे दश वासरः ॥ त्रिपूरुषे चोलोपनयने नांदीश्राद्धं विधीयते ॥ इति ॥ तेन एक
विंशत्यादहरंतः प्राप्ति यथा यज्ञादि भवति तथा आवश्यके यज्ञादौ पूर्वं श्राद्धं कुर्यादित्य
र्थः ॥ प्रारंभाभावेपि कन्याया अधार्यत्वे संनिहितलग्नांतराभावे चक्रोमादि पूर्वं कंवि
छुरत्नज्ञा माह ॥ अनारब्धविशुध्यर्थं कूष्मांडैर्जुहुयाद्घृतं ॥ गांदघातंचगव्याशीत
तः शुध्यति सूतकी ॥ उपकल्पितसर्वबृहत्संभारस्यापि संनिहितलग्नांतराभावेन सं
भारधारणाशक्तो आशौचाभावमाह विश्वः ॥ न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयो
रिति ॥ अथ विवाहकाले कन्या ऋतुमती तां चेत्तदाह ॥ पाराशर्यः ॥ विवाहे वितते मं

श्री
२१२

त्रे होमकाल उपस्थिते ॥ कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः ॥ स्नापयित्वा तु तां कन्या
मर्चयित्वा यथाविधि ॥ युंजानाहुतिभिर्हुत्वा ततः कर्म नियोजयेत् ॥ आहुतिमंत्रस्ते
त्तरीयशाखायां ॥ ॐ युंजानः प्रथमं मनस्तत्त्वाय सविता धियः ॥ अग्निर्ज्योतिर्निचा
य्य पृथिव्या अध्याभरत् ॥ इति ॥ यद्वा विवाहहोमे प्रक्रांते यदि कन्या रजस्वला ॥ त्रिरा
त्रं दंपती स्यातां पृथक्शय्यासनाशनौ ॥ चतुर्थेहनि संस्नातौ तस्मिन्नग्नौ यथावि
धिरिति ॥ जुहुयान्नामितिशेषः ॥ इति विवाहे आशौचादि निर्णयः ॥ अथ प्रसंगात्
पुनर्विवाह उच्यते ॥ कृते विवाहे पंचांगशुद्धिरादित्यादिदोषश्चेत् ज्ञातस्तदा ज्योतिःशा

अ॰ प्र॰
२१३

स्त्रोक्तकालविशेषपुनर्विवाहः कार्यः॥ तदाह वसिष्ठे॥ श्री धरीये॥ पुनर्विवाहं वक्ष्यामि दंपत्योः
शुभवृद्धिदं॥ लग्नेंदु लग्नयोर्दोषग्रहताराादि संभवे॥ अन्येष्वशुभकाले षु दुष्टयोगादि सं
भवे॥ विवाहे चापि दंपत्योरा वौ चादि समुद्भवे॥ तस्य दोषस्य शांत्यर्थं पुनर्वैवाह्यमिष्यते॥
अयनं चोत्तरं श्रेष्ठं वर्धये तु विशेषतः॥ आषाढ मार्गशीर्षादीवर्ज्यौ शेषाः शुभावहाः॥
विवाहोक्त तिथ्यंशराशिवारादिवर्गजाः॥ करणा योग संज्ञा निग्रहगोचरयोगकाः॥ तस्मि
न्विवाहसमये शुभदाश्च तथैव हि॥ पूर्वाह्णे पूर्वरात्रे च विवाहः शुभदो भवेत्॥ अथ द्वि
तीयादि विवाह विधिः॥ तत्राधिवेदनीयाह याज्ञवल्क्यः॥ सुरापी व्याधिता धूर्ता व

श्री
२१३

ध्यार्थघ्न्यप्रियंवदा॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥ अधिविन्ना तु भर्तव्या महदेनोन्य
थाभवेत्॥ अधिवेत्तव्या तदुपरि स्थ्यंनरं कर्तव्यमित्यर्थः॥ आपस्तंबः॥ धर्मप्रजासंपन्नो दारा
नन्यान्कुर्वीतेति॥ अधिवेदत्ते प्रतीक्षाकाले मनुराह॥ वंध्याष्टमे धिवेत्तव्या दशमे तु मृतप्रजा॥
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥ अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्॥ मृतप्र
जां पंचदशे सद्यस्त्वप्रियवादिनीं॥ इत्यर्थो विवाहांतरे विशेषः॥ एकामुत्क्रम्य कामार्थमन्यां ल
ब्धुं य इच्छति॥ समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत्॥ याज्ञवल्क्यस्तु॥ आज्ञासंपादि
नीं दक्षां वीरसूं प्रियवादिनीं॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः॥ सधनो

धनत्तृतीयांशमधनो राशनात्यकेभरणं दाप्यइत्यर्थः॥ यालेनावत्तापरितुष्टागृहान्निर्गच्छतां प्रत्याह
मनुः॥ अधिविन्नातु यानारीनिर्गच्छेद्रोषितागृहात्॥ सासद्यः संनिरोद्धव्यात्याज्या वाकुलसंनि
धिनि॥ बहुभार्योज्येष्ठयैवसह धर्मंसपत्नीकसाध्यं कुर्यात्॥ हेमाद्रौ कात्यायनः॥ अग्निशि
ष्टाद्यशुश्रूषांबहुभार्यासवर्णया॥ कारयेत्तद्बहुत्वं चेत् ज्येष्ठयागर्हितानचेत्॥ इति॥ शिष्टशुश्रू
षा अतिथ्यादिपूजा॥ साचपत्नीसंपाद्य धर्ममात्रोपलक्षणार्थः॥ गर्हिता धर्मायायोग्यतापा
दकयातित्यादि दोषवती न चेदित्यर्थः॥ नादृशी चेन्न तत्याः किं तर्ह्येवंविधयाद्वितीययापिका
रयेत्॥ याज्ञवल्क्यः॥ सत्यामन्यांसवर्णायां धर्मकार्यं न कारयेत्॥ सवर्णासुविधौ धर्मे

ज्येष्ठयानविनेतराः॥ अन्यासमवर्णा॥ इदं चाधानेसहाधिकृतानेकभार्याविषयं॥ अनधिकृ
तायास्तुप्रसक्त्यभावएव॥ नाचापिकेवलकृतत्थमाद्यावेक्षणादियजमानौदुंबरीसमान
वदेकयैवसवर्णयाज्येष्ठयाकारयेत्॥ पत्नीसन्नहनादितु कर्त्रसंस्कारकं सहाधिकृताभिः स
र्वाभिरित्यादिमीमांसासांससैकलनसांसुज्ञानं॥ स्मात्तोग्निसाध्येतु कर्मणि सर्वासां
सहाधिकारः॥ प्रथमविवाहाग्नावेवापरविवाहहोमविधानात्तदसंभवेऽग्निद्वयसंसर्ग
विधानाच्च॥ अतस्तत्रासुकेएवकर्मसुकर्त्रविवेकः॥ द्वितीयादिविवाहेऽग्निनियमनाह॥
होमायकात्यायनः॥ सदारोन्यान्पुनर्दारानुद्वोढुं कारणांतरात्॥ यदिछेदग्निमान्कुर्वन्क

होमोस्य विधीयते॥ स्वाग्नावेव भवेद्धोमो लौकिके न कदाचनेति॥ अयं च नियममासंभवे॥ स्वाग्नौ
नष्टादावसंभवे तु लौकिकाग्नौ हुत्वा तयोर्यथाकालं वक्ष्यमाणसंसर्गविधिः कार्यः॥ अत्र
द्वितीयादिविवाहे जीवत्पितृकोपि नांदीश्राद्धं कुर्यात्॥ नांदीश्राद्धं पिता कुर्याद्दाद्येपा
णिग्रहे पुनः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकं॥ इति स्मृतेः॥ तत्र पितृवर्गं वि
हाय मातृमा॰ तामह वर्गयोः कुर्यात्॥ मातर्यजीवत्यां मातामहवर्गस्यैव॥ तस्मि
न्नपि जीवति द्वारलोपात् वृद्धिश्राद्धलोप एव॥ सोपि साग्निश्चेद्येभ्यः पिता दद्यात्ते
भ्यः स्वयमपि दद्यात्॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्तु साग्निक इति वचनात्॥

उ अन्ये तु साग्निकोपि पितृदेवताभ्यो दद्यात्॥ न तु लोपः॥ वृद्धौ तीर्थे च सन्यस्ते ताते च पतिते
सति॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥ इति मैत्रायणीयपरिशिष्टादित्या
हुरित्यादि॥ त्रिस्थलीसेतौ विस्तारो ज्ञेयः॥ द्वितीयादिविवाहे कालविशेषउक्तः सं
ग्रहे॥ प्रमदामृति वासरादितः पुनर्विवाहविधिर्धवस्य च॥ विषमे परिवत्सरे शुभे
युगले वापि मृतप्रदो भवेत्॥ जीवत्यां तु पूर्वपत्न्यां द्वितीयादिविवाहे कालनियमः॥
इति पुनर्विवाहः॥ अथार्कविवाहः॥ अथ तृतीयमानुषीविवाहाय निषिद्धत्वात्तस्मि
न्कर्तव्ये अर्कविवाहविधिः॥ तृतीये निषेधमाह मात्स्ये॥ कश्यपः॥ तृतीयमानुषीं नैव च तु

अ० प्र०
२१६

थीयः समुद्वहेत्॥ पुत्रपौत्रादिसंपन्नः कुटुंबी साग्निको ज्वलः॥ उद्वहेद्दुहितृसिद्ध्यर्थं तृती
यां न कदाचन॥ मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं॥ नश्यत्येव न संदेहो गर्ग
स्य वचनं यथा॥ अथान्यत्रापि॥ तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत्॥ चतुर्था
दिविवाहार्थं तृतीयेर्कं समुद्वहेत्॥ अथ भेदेर्कविवाहस्यानुष्ठानार्हप्रयोगस्यानु
क्रता सोभिधीयते॥ वरः॥ नित्यक्रियः रविशनिवारयोर्हस्तनक्षत्रेन्यस्मिन्वा शुभेह्नि
ग्रामात्प्राच्यां वा कं गत्वा देशकालौ संकीर्त्य मम तृतीयमानुषीपरिणयनजनि
तसर्वारिष्टशांत्यर्थं मर्कविवाहं करिष्ये॥ तदंगतया गणेशपूजनं स्वस्तिवाचनमा

श्री
२१६

तृकापूजनं नांदीश्राद्धानि कृत्वा ऽऽचार्यं वृणुयात्॥ अस्मिन्नर्कविवाहकर्मणि आचार्येन त्वामहं वृ
णे॥ वृतोस्मीत्युक्त्वा॥ तत आचार्यो वरो वा आकृष्णेनेति मंत्रेणार्कच्छायासहितं सूर्यमावा
ह्य षोडशोपचारैः संपूज्य गुडोदननैवेद्यं समर्प्य वस्त्रेण तंतुभिर्वा वेष्ट्य प्रार्थयेत्॥ त्रिलोकवा
सिन्सप्ताश्व छायया सहितो रविः॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥ ततो वरः॥ ज
लमादाय त्रिः प्रदक्षिणं परिषिंचेत्॥ एभिर्मंत्रैः॥ मम प्रीतिकरा येयं मया सृष्टा पुरातनी॥ अ
र्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु॥ नमस्ते मंगले देवि नमः सवितृसूनवे॥ त्राहि मां
कृपया देवि पत्नी त्वं मे इहागता॥ अर्क त्वं ब्रह्मणा सृष्टा सर्वप्राणिहिताय च॥ वृक्षाणामा

अ०प्र०
२२७

दिभूतस्त्वं देवानां प्रीतिवर्द्धन ॥ तृतीयो ग्रहजं पापं मृत्युं चाशुविनाशय ॥ ततो वरो वाग्दानस्था
नीयं पुनरर्कस्य पूजनं कृत्वा वाग्दानं कुर्यात् ॥ तत्रायं क्रमः ॥ स्वगोत्राद्युच्चार्य काश्यपावत्सा
रनैध्रुवेति त्रिप्रवरान्वित काश्यपगोत्रोत्पन्नां आदित्यस्य प्रपौत्रीं सवितुः पौत्रीं मामामुकश
र्मणः पुत्रीं नाम्नीं कन्यां अमुकप्रवरोपेतायामुकप्रपौत्रायामुकपौत्रायामुकपुत्रायामुकना
म्ने वरायार्ककन्यां दास्य इति ॥ ततः आचार्यो वरस्य मधुपर्कं कारयित्वा मुहूर्त्तं निरीक्ष्य
स्वस्ति नो मिमीतेति सूक्तं पठित्वा आचार्येणार्ककन्यादानं कारयेत् ॥ तत्रायं क्रमः ॥ वा
ग्दानवत्स्वगोत्राद्युच्चार्य आत्मनश्छायासहितसवितृप्रीतये इमामर्ककन्यां सवस्त्रां तु

श्री
२२७

भ्यमहं संप्रददे ॥ नममेत्युक्त्वा वरहस्ते जलं क्षिप्त्वा मंत्रं पठेत् ॥ अर्ककन्यामिमां विप्र यथाशक्ति
विभूषितां ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति ॥ वरः ॥ स्वस्तीत्युक्त्वा ॥ स्वशाखोक्तं
कामस्तुतिं पठेत् ॥ ततः कृतस्यैतद्दानकर्मणः संपूर्णतासिध्यर्थं इमां दक्षिणां संप्रददे ॥ इ
ति हिरण्यं दद्यात् ॥ ततो गायत्र्या त्रिरावृत्त्या पंचकृत्वोर्कं वरं च सूत्रेणावेष्ट्य तत्सूत्रं द्विधा कृ
त्वा ॥ एकं गायत्र्यार्कस्य स्कंधे बध्वा ॥ अपरं च वरहस्ते आचार्यो विध्यीयान्मंत्रेण ॥ रक्षस्वा
मक्षभृद्रुद्र स्कंध त्रिपुभोजः श्रुभित मुग्रवीर्य ॥ इंद्रस्तोमेन पंचदशेन मध्यमिदं वातेनस
गरेण रक्ष ॥ ततोर्कस्य चतुर्दिक्षु मही द्यौरित्यादिमंत्रावृत्त्या चतुरः कलशान्संस्थाप्य त

त्र्यंतिकुंभंइदंविष्णुरितिमंत्रेण विष्णुंसंस्थाप्यप्रतिकुंभंषोडशोपचारैः संपूज्यार्कोत्तरस्थंडिले
ग्निंप्रणीय अस्मिन्नन्वाहितेग्नावित्यादि आघारांतमुक्त्वा उत्रप्रधानं॥ बृहस्पतिं· अर्कं·वा
युं· सूर्यं· प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्याद्याघाघारांतं हुत्वा॥ संगोभिरांगिरसो
बृहस्पतिस्त्रिष्टुप्॥ अर्कविवाहप्रधानाज्यहोमेवि·॥ ॐ संगोभिरांगिरसोनक्षमाणोभग
इवेदर्यमणंनिनाय॥ जनेमित्रोनदंपती अनक्ति बृहस्पतेवाजयाशूंरिवाजौ॥ यस्मै त्वा
कामकामायवयंसंम्राड्यजामहे॥ तमस्मभ्यंकामंदत्वाथेदं घृतंपिबस्वाहा॥ अग्नय॰॥
यस्तत्समस्तव्याहृतिभिर्हुत्वा होमशेषंसमाप्याचार्यंसंपूज्यतस्मैगोयुग्मंदक्षिणांद

त्वाममप्रीतिकरायेयमितिमंत्रेणपुनस्त्रिः प्रदक्षिणीकृत्यप्रार्थयेत्॥ मयाकृतमिदंकर्मस्था
वरेषुजरायुणा॥ अर्कापत्याभिनोदेहितत्सर्वंक्षंतुमर्हसि॥ ततोमहाशांतिंपठेयुः॥ अस्मिन्
कर्मणिदशब्राह्मणाभोज्याः॥ त्रयोवा॥ यथाशक्तिभूयसींदत्वा॥ ततश्चतुर्थदिनेसद्योवापु
नरर्कंसंपूज्य॥ उत्तिष्ठब्रह्मण॰॥ अभ्यारमित्॰॥ इत्यर्कविवाहप्रयोगः॥ अथाग्निद्वयसंसर्ग
विधिः॥ यदिपूर्वंगृह्याग्नावेवद्वितीयादिविवाहहोमकृतस्तदातेनैवाग्निनाद्वितीयादिपत्नी
सहाधिकारिणीयदिवान्याग्नौद्वितीयादिविवाहहोमः कृतस्तदाद्वितीयविवाहनिमित्तक
त्रिरात्रादिव्रतांतेग्निद्वयसंसर्गकार्यः॥ अथतत्प्रयोगः॥ द्वितीयादिविवाहव्रतांतेशुभ

दिनेप्राणानायम्य देशकालस्मरणांते कृत्वा मम विवाहद्वयेन जातयोर्गृह्याग्न्योः संसर्गम
हं करिष्ये॥ उदक् संस्थयोर्द्वयोः स्थंडिलयोरुपलेपादिपूर्वकं क्रमेण गृह्याग्नी प्रतिष्ठाप्य
प्रथमाग्नावन्वादध्यात्॥ तत्क्रमः॥ अस्मिन्नग्निद्वयसंसर्गकर्मण्यन्वाधानं करिष्ये॥
अस्मिन्नन्वाहितेग्नावित्याद्याज्यभागांतं कृत्वा आघ्याय पत्न्या समन्वारब्धो नवाज्याहुती
र्जुहुयात्॥ अग्निमीळ इति नवानां वैश्वामित्रो मधुच्छंदाग्निर्गायत्री॥ अग्निद्वय

संसर्गप्रधानाज्यहोमे वि॰॥ अग्निमीळ इति वर्गद्वयं प्रत्यृचं हुत्वा अग्नय इदं॰॥ स्विष्ट
कृदादिहोमशेषमुपस्थानांतं समाप्य॥ अग्ने त्वं न इति चतसृभिरुपस्थाय॥ ॐ

अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः॥
स नो बोधि श्रुधी हवमुरुष्याणो अघायतः समस्मात्॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीम
हे सखिभ्यः॥ तमग्निमयं ते योनिरिति समिधि समारोप्य॥ ॐ अयं ते योनिरृत्वियो यतो जा
तो अरोचथाः॥ तं जानन्नग्न आसीदाथा नो वर्धया गिरः॥ कनिष्ठाग्नौ प्रत्यवरोहेति॥ तं प्रत्य
वरोह्यान्वाधाने पूर्ववदाज्यभागांतमुक्त्वाऽत्र प्रधानं षड्वारमग्निं चतुर्गृहीताज्येन शेषेण स्विष्ट
कृतमित्याज्यभागांतं कुर्यात्॥ ततः स्रुचि स्रुवेण चतुर्वारं प्रभृतमाज्यं गृहीत्वा पत्नीभ्यामन्वार
ब्धस्तेनाज्येनावयवशः षडाहुतीर्जुहुयान्मंत्रैस्तैश्च॥ ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां

अ० प्र०
२२०

पुत्रो अधिराजएषः॥ अस्मै जुहोमि हविषा घृतेन मादेवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भा
गधेयं स्वाहा॥ अग्नय इदं न मम॥ सर्वत्र त्यागः॥ अग्निनाग्निरंगिरसो विरूपो ऽग्निर्गायत्री॥
अग्निद्वयसंसर्गप्रधानाज्यहोमे॥ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा॥ हव्यवा
ड्जुह्वास्यः स्वाहा॥ अग्न०॥ अस्तीदमधिमंथनमस्ति प्रजननं कृतं॥ एतां विश्पत्नीमाभ
राग्निं मंथाम पूर्वथा स्वा०॥ अ०॥ अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु॥
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्हविष्येभिरग्निः स्वा०॥ अ०॥ ॐ उत्ताना यामव भरा चि
कित्वान्सद्यः प्रवीता वृषणं जजान॥ अरुषस्तूपो रुशदस्य पाज इडायास्पुत्रो वयुने ऽजनिष्ट

श्री
२२०

स्वा० अ०॥ पाहि नो अग्न एकरति प्रागाथो ऽग्निर्बृहती॥ अग्निद्वयसं०॥ पाहि नो अग्न एकया पाह्यू३त द्विती
यया॥ पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो स्वा०॥ अ०॥ ग्न्यपरिशिष्टमतेतु स्रुवेणैवाज्या
हुतयः॥ ताश्च॥ ॐ अग्निनाग्निः० स्वा० अ०॥ ॐ त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता॥ सखा सख्या स
मिध्यसे स्वा० अ०॥ अस्तीदमिति तत्र च उक्तः॥ पाहि न इत्युक्ता॥ ॐ पाहि विश्वस्माद्रक्षसो अराव्णः प्रस्म
वाजेषु नो ऽव॥ त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे स्वा० अ०॥ ॐ आ नो अग्ने वयोवृधं रयिं
विश्वायुपोषसं॥ रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरं स्वा० अ०॥ एवं हुत्वा स्विष्टकृदादि हो
मशेषं समाप्य॥ आयतने ऽग्निं निधाय यथा पूर्वं परिचरेत्॥ कृतस्याग्निद्वयसंसर्गकर्मणः सांगता

सिध्यर्थंश्रोत्रियाययुग्मंदक्षिणांददे॥पत्न्योरेकायदिग्नादग्ध्वातेनैवतांपुनः॥आदधीतान्ययासार्ध
माधानविधिनागृह्णीति॥इत्यग्निद्वयसंसर्गप्रयोगः॥अथाशौचेहोमविधिः॥तत्रजननाशौचाशौच
योःऋत्विगादिनासायंप्रातर्होमौकारयेत्॥स्वयंचद्रव्यत्यागंकुर्यात्॥ऋत्विगाद्यन्याभावेतुआ
शौचपातात्पूर्वंहोमान्नेववक्ष्यमाणप्रकारेणाग्निसमारोपणंकृत्वासूतकनिवृत्तौस्नात्वाकृतनित्यक्रि
योग्निंप्रतिष्ठाप्यप्राणानायम्यदेशकालौसंकीर्त्यममनित्यहोमातिक्रमजन्यदोषपरिहारार्थंप्रायश्चि
त्तपूर्वकंअतिक्रांतहोमंकरिष्ये॥परिसमूहनादिकृत्वा॥सवितुरितिमंत्रेणसकृत्तूष्णींद्विवारमाज्यो
त्पवनंकृत्वाज्यंस्रुवेणस्रुचिचतुर्गृहीत्वा॥ॐमनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधा

तु॥याइष्टाउषसोयाअनिष्टास्ताःसंतनोमिहविषाघृतेनस्वाहा॥ज्योतिषइ०॥ततोनित्यहोमवत्प
रिसमूहनादिकृत्वातंडुलादिद्रव्यंसंस्कृत्यअतीतकालादारभ्यक्रमेणद्वेद्वेआहुतीहुत्वातत्का
लेहोमंचकृत्वापुनःपरिसमूहनं॥ॐचमेइतिसंस्थाजपांतंसर्वंकुर्यात्॥इत्याशौचेहोमविधिः॥
अथापत्कर्तव्योहोमद्वयसमासप्रयोगः॥एवंगुणेत्यादिआद्यसायमपकृष्यप्रातर्होमंसमस्ये
पूर्ववत्सायंकालीनाहुतिद्वयंहुत्वापर्युक्षणादिकंकृत्वाकिंचित्कालंनिनीयवापुनःपर्युक्षणा
दिकंकृत्वाश्वःकर्तव्यप्रातराहुतिद्वयमपकृष्यहुत्वोपस्थानंकुर्यात्॥उपस्थानेमंत्राः॥हविष्पां
तमितिपंचर्चस्यमूर्द्धावामदेव्यःसूर्योवैश्वानरौत्रिष्टुप्॥उपस्थाने०॥हविष्पांतमजरंस्वर्विदिदिवि

स्पृश्याहुतं जुष्टमग्नौ॥ तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत॥ गीर्णं भुवनं तमसापगूल्ह
माविस्वरभवज्जाते अग्नौ॥ तस्य देवाः पृथिवी द्यौरुतापोरणयंनोषधीः सख्ये अस्य॥ देवेभिर्न्विषि
तो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहंतं॥ यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्षं॥ यो
होतासीत्प्रथमो देवजुष्टो यं समाजंनाज्येना वृणानाः॥ स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणो
ज्जातवेदाः॥ यज्जातवेदो भुवनस्य मूर्द्धन्नतिष्ठो अग्ने सह रोचनेन॥ तं त्वाहेम मतिर्गीभिरुक्थैः स
यज्ञियो अभवो रोदसिप्राः॥ ३॥ इत्युपस्थाय॥ पर्युक्षणाद्यंगजातं सकृत्कुर्यात्॥ इति समस्य होमः॥
अथ गुर्वापदि पक्षहोमः॥ तत्र एवं गुणेत्यादि प्रतिपदि सायमारभ्य चतुर्दशी सायंकालपर्यंतं पक्ष

होमान्करिष्ये॥ परिसमूहनादि कृत्वा आहुतिप्रमाणेन तंडुलान्पात्रद्वयेन प्रतिपात्रं चतुर्दशवारं ग
हीत्वा प्रथमपात्रस्थानग्नये स्वाहेति सर्वान् जुहुयात्॥ तथैव प्रजापतये स्वाहेति सर्वान् हुत्वा उप
स्थापनाद्यंगजातं सर्वं कुर्यात्॥ एवं द्वितीयायां प्रातरारभ्य पर्वप्रातःपर्यंतान्सूर्याय स्वाहेति पू
र्ववद्धुत्वा तथैव प्रजापतिं चतुर्थ्यंतं मनसा ध्यायन्स्वाहेति हुत्वोपस्थानाद्यंगजातं सकृत्कुर्या
त्॥ इति पक्षहोमः॥ पक्षमध्ये वा आपन्ने आगामिचतुर्दशी सायंकालीन होमान्तान् शे
षहोमान्सायं समस्येत्॥ पर्वप्रातर्होमांतांश्च प्रातः शेषहोमान्समस्येत्॥ सर्वथा पर्वसायं
होमप्रतिपत्प्रातर्होमश्च पृथगेव होतव्यौ॥ इति शेषहोमः॥ अथ सभार्यस्य प्रवासे प्रसक्ते

अ॰ प्र॰ २३३

अग्निसमारोपविधिः॥ कालहोमानंतरं अयंयोनिरित्यस्यगाथीपुत्रोविश्वामित्रोग्निस्त्रिष्टुप्॥ अग्निसमारोपणेविनियोगः॥ ॐ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः॥ तंजानन्नग्नआसीदाथानोवर्धयागिरः॥ अनेनाश्वत्थसमिधिसमारोपयेत्॥ तत्रप्रादुष्करणकाले॥ प्रत्यवरोहजातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन्॥ प्रजांपुष्टिंरयिमस्मासुधेह्यथाभवयजमानायशंयोः॥ इतिमंत्रेणतांसमिधंश्रोत्रियागारादग्निमाहृत्यसंस्कृतेस्थंडिलेनिदध्यात्॥ एवंकालद्वयेएककालेवापूर्ववज्जुहुयात्॥ इदंसमारोपणंद्वादशरात्रमेवकुर्यात्॥ इतिभार्यस्यप्रवासविधिः॥ अथपुरुषस्यैवप्रवासकालेकर्तव्यं॥ प्रवासश्चसाग्निकेनद्रव्यार्जनादिदृष्टकार्यार्थमेवकेवलेनपुरुषेणकार्यः॥ नतुतीर्थयात्राद्यदृष्टार्थं॥ तत्रहोमांतेपूर्वोक्तमंत्रैरुपस्थायपुनःप्रवासार्थमभयंवोभयंमेस्त्वितिमंत्रेणाग्निमुपस्थायद्विमासमध्यवर्त्तिकालेष्वन्यतमकालपर्यंतंप्रोष्यपुनःस्वगृहसमीपमेत्य॥ ॐ गृहामाबिभीतमावेपध्वमूर्जंबिभ्रतएमसि। ऊर्जंबिभ्रद्वःसुमनाःसुमेधागृहानैमिमनसामोदमानः॥ ... [best reading of remaining lines:] वास्मासुचप्रजायध्वंमाचवोगोपतीरिषदितिमंत्रेणगृहंनिरीक्ष्य॥ ॐ गृहानहंसुमनसःप्रपद्येवीरघ्नोवीरवतःसुवीरान्॥ इरांवहंतोघृतमुक्षमाणास्तेष्वहंसुमनाःसंविशामि॥ इतिमंत्रेणगृहंप्रविश्य॥ ॐ शिवंशग्मंशंयोरस्त्विवीक्ष्यहोमकालेउपस्थानांतंकृत्वा॥ ॐ अभयंवोभयंमेस्त्वितिपुनरग्निमुपतिष्ठेत्॥ ततोज्येष्ठपुत्रशिरउभाभ्यांपाणिभ्यांपरिगृह्य॥ ॐ अंगा

श्री
२३३

मा
नि

दंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतं॥ इति मंत्रं पठित्वा मूर्धानं त्रिराजिघ्रेत्॥ एवमितरेषां च पुत्राणां क्रमेण कृत्वा ऽप्रत्तदुहितॄणां तूष्णीमेव शिरो जिघ्रेत्॥ तत्पुत्रेणापि पित्रोः प्रत्यागते भवति॥ अवगतमथ प्रियं प्रवासादागतं प्रति तदहर्निवेदयेयुः॥ इति प्रवासोपस्थानविधिः॥ अथ विवाहोत्तरं दंपत्योर्गृहप्रवेशः॥ गृहप्रवेश दिनादारभ्य दर्श संक्रांति व्यतीपात वैधृत्यादि रहिते चतुर्थादौ मौहूर्तिकोक्ते शुभदिने गृहप्रवेशं करिष्यमाणा श्वशुरगृहेभ्यः प्रस्थाता रात्रौ स्वदेशाचारानुसारेण नागवल्यादि कृत्वा॥ श्वशुरदत्त दासी दास पर्यंकादियुतः सुवासिनी कृत नीराजनः श्वशुरादिभ्यो गृहीत आशीर्वचनः स्वलंकृतया वध्वा सह विवाहा

ग्निं शकटे च स्थाप्य जलं नयन्॥ पूषा त्वेत इत्यस्य सूर्या सावित्री त्रिष्टुप्॥ वध्वा यानारोहणे वि॰॥ ॐ पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन॥ गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमावदासि॥ अनेन मंत्रेण यथाविभवं गजाश्वादि यानमारोहयेत्॥ याने प्रयाण एवासौ नियमः॥ यानादन्येन शिबिकादिना प्रयाणे न मंत्रः॥ स्वग्रामविवाहपक्षे स्वगृहगमने नायं मंत्रः॥ गमने यद्यंतरा नाव्या नादी स्यात्तदा ऽश्मन्वती रीयत इति ऋचा ऽर्धर्चेन वधूं नावमारोहयेत्॥ अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतरता सखायः॥ अत्रा जहाम ये इत्युत्तरेणार्धर्चेन उदकादुत्तारयेत्॥ अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान्॥ नीयमाना वधूर्यदि बंधुवियोगादिना

मा

रोदति॥ तदा जीवं रुदंतीतिमंत्रं च पठेत्॥ जीवं रुदंति विमयंते अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः॥
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे॥ अयं विधिः स्वग्रामेपि भवति॥ अविशेषा
त्॥ शोभनेषु देशवृक्षचतुष्पथेषु मा विदन्परिपंथिन इति मंत्रं जपेत्॥ मा विदन्परिपंथिनो य आसीदं
ति दंपती॥ सुगेभिर्दुर्गमतीतामपद्रांत्वरातयः॥ वसंतौ वसत्वा वीक्षकाः संतिचेत्ताः॥ सुमंगलीरि
यं वधूरिमां समेत पश्यत॥ सौभाग्यमस्यै दत्वायाथास्तं विपरेतन॥ इह प्रियमित्यनया वधूं गृहं प्रवे
शयेत्॥ इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि॥ एना पत्या तन्वं १ संसृजस्वाथा
जिव्री विदथमावदाथः॥ अयं विधिः स्वग्रामविवाहेपि भवति॥ अत्रायमनुष्ठानक्रमः॥ वरो वधूमु

क्तमंत्रेण यानमारोप्य विवाहाग्निं शकटारोपितमजस्रमग्रतो नयन्सुमंगलीसूक्तं पठद्भिर्विप्रबंधु
भिः सुवासिनीभिरष्टमंगलसंज्ञकदर्पणपूर्णकलशकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगल
तूर्यनादैश्च सहसितछत्रयुतः स्वगृहद्वारे सुवासिनीभिर्नीराजितो विग्रहो वधूं पाणौ गृहीत्वा
शुभे मुहूर्त्ते इह प्रियं प्रजयात इति स्वगृहं प्रवेश्य स्वयं च प्रविश्य तंडुलचतुष्के कुलदेवतां लक्ष्मीं
च संपूज्य विप्रैः पुण्याहं वाचयेत्॥ ततः गृहप्रवेशनीयहोमः कार्यः॥ अस्माभिस्त्वाचारानुसारे
णापूर्वं कर्त्तव्यतयोक्तः॥ ततः शुभदिने स्वस्त्यादि वाचयित्वा स्वलंकृतः स्वलंकृतां वधूं रात्रा
वुपगच्छेदिति॥ नागवलिस्तु नवबलिप्रयोगस्तु सर्वदेशेष्वनुष्ठानाभावान्नोक्तः॥ इति वधूसहि

तगृहप्रवेशनीयविधिः॥ अथ प्रायश्चित्तान्युच्यंते॥ अथाव्याध्यादिनिमित्तककर्मसु संकल्पो लिख्य
ते॥ एवंगुणेत्यादि व्याधितत्वपरिहारार्थं षडाहुतिचरुहोमं करिष्ये॥ अस्मिन्नन्वाहितेग्नाविता
दिचक्षुषी आज्येनेत्यंतमुक्त्वा ऽत्र प्रधानं॥ यक्ष्महणं चरुद्रव्येण शेषेण स्विष्टकृतमित्यासिसघोय
क्ष्ये॥ परिसमूहनादि पूर्णपात्रनिधानांतं कृत्वा॥ अग्नेः अत्यस्पावित्रवति शूर्पे चतुरो मुष्टीन्निरू
प्यतथैव प्रोक्ष्यावघातादि चरुश्रपणं कृत्वाऽज्यसंस्काराद्याज्यभागांतं कृत्वावदानधर्मेणाव
दाय॥ मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्रजापतिऋषिः॥ यक्ष्मनाशनो देवता॥ त्रिष्टुप्छंदः॥ अं
त्यानुष्टुप्॥ राजयक्ष्मनाशनप्रधानचरुहोमे॰॥ ॐ मुंचामि त्वा॰॥ स्वाहा यक्ष्महनइ॰॥ एवमग्रे

पि त्यागः॥ यदि क्षितायु॰॥ सहस्राक्षेण॰॥ शतं जीव॰॥ आहार्षंत्वा॰॥ स्विष्टकृदादि होमशेषं समाप्ये
ति॥ अथाशुभस्वप्नदर्शनसूचितारिष्टपरिहारार्थं प्रायश्चित्तं करिष्ये इति संकल्प्य॥ अद्यानइतिमंत्रद्वय
स्य श्यावाश्व ऋषिः॥ सविता देवता॥ अनुष्टुप्छंदः॥ सूर्योपस्थाने वि॰॥ अद्यानो देव सवितः प्रजाव
त्सावीः सौभगं॥ परा दुःष्वप्न्यं सुव॥ विश्वानि देव सवितर्दुरितानि परासुव॥ यद्भद्रं तन्न आसुव॥ य
श्च गो षु इति पंचर्चस्य त्रित ऋषिः॥ उषा देवता॥ पंक्तिछंदः॥ सूर्योपस्थाने वि॰॥ ॐ यच्च गोषु दुःष्वप्न्यं य
च्चास्मे दुहितर्दिवः॥ त्रिताय तद्विभावर्याप्त्याय परावहानेहसो व ऊतयः सुऊतयो व ऊतयः॥ निष्कं
वा घा कृणवते स्रजं वा दुहितर्दिवः॥ त्रिते दुःष्वप्न्यं सर्वमाप्त्ये परिदद्मस्यनेहस॰॥ तदन्नाय तदपसे तं भा

गमुसेस्मिन्दुषे॥ त्रिताय चद्वितायचैषोदुष्वप्न्यंसुवहानेह०॥ यथाकलांयथाशफंयथऋणंसंनयाम
सि॥ एवादुष्वप्न्यंसर्वमाप्त्येसंनयामस्यनेह०॥ अजैष्माद्यासनामचाभूमानागसोवयं॥ उषोय
स्मादुष्वप्न्यादभैष्मापतदुच्छत्वनेह०॥५॥ यज्ञ॥ योमेराजंनित्यस्यगृत्समदऋषिः॥ वरुणोदेवता
त्रिष्टुप्छंदः॥ सूर्योपस्थानेविनि०॥ अशुभस्वप्नदर्शनसूचितारिष्टपरिहारार्थंसूर्योपस्थानेवि०॥ ॐ
योमेराजन्युज्योवासखावास्वप्नेभयंभीरवेमह्यमाह॥ स्तेनोवायोदिप्सतिनोवृकोवात्वंतस्माद्वरु
णपाह्यस्मान्॥ इत्येकर्चंवाजपेत्॥ अथस्रुतादिनिमित्तककर्मणितुक्षुतनिमित्तकदोषपरिहारा
र्थंसुचक्षाइतिमंत्रजपंकरिष्ये॥ इतिक्षुते॥ तथाजृंभादिदोषपरिहारार्थंमित्यमनोज्ञदर्शनेवि

शेषः॥ पायगंधादिदोघ्राणनिमित्तकदोषपरिहारार्थमितिपायगंधघ्राणेविशेषः॥ अक्षिस्पंदननि
मित्तकदोषपरिहारार्थमित्यक्षिस्पंदनेविशेषः॥ कर्णध्वननिमित्तकदोषपरिहारार्थंकर्णध्वनेविशे
षः॥ शेषंसर्वंक्षुतवत्॥ सुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांमयिदक्षक्रतूद्
तिमंत्रंसर्वत्रजपेत्॥ अगम्यागमनादिनिमित्तकर्मसुअगमनीयागमननिमित्तकदोषपरिहारा
र्थंपुनर्मामैत्विति द्वाभ्यामाज्याहुतीहोष्यामीतिआज्यहोमपक्षे॥ समिदाधानपक्षेतुसमिधेहोष्या
मीतिसमिद्धोमपक्षे॥ जपपक्षेतुआज्याहुतीहोष्यामीतिस्थानेजपंकरिष्यइतिविशेषः॥ अगमनी
यागमनंतुरजस्वलाभार्यागमनंनिषिद्धतिथ्यादौस्वभार्यागमनंवा॥ अयाज्ययाजननिमित्तक

अ०प्र०
२२८

दोषपरिहारार्थमित्ययाज्ययाजनेविशेषः॥अयाज्यस्तुनस्तास्तिर्ज्यः॥अभोज्यभोजननिमित्तकदोषप
रिहारार्थमित्यभोज्यभोजनेविशेषः॥अभोज्यंलशुनादिकणकांनादिच॥अप्रतिग्राह्यप्रतिग्रह
निमित्तकदोषपरिहारार्थमित्यप्रतिग्रहेविशेषः॥अप्रतिग्राह्यंशस्त्रविषादि॥चैत्ययूपोपघातनि
मित्तकदोषपरिहारार्थमितिचैत्ययूपघातेविशेषः॥चैत्ययूपोपघातोग्निचयनस्ययूपस्पर्शः॥पु
नर्मामैत्विंद्रियंपुनरायुःपुनर्भगः॥पुनर्द्रविणमैतुमांपुनर्ब्राह्मणमैतुमांस्वा०॥अग्नय०॥इमेयेधि
ष्ण्यासोअग्नयोयथास्थानमिहकल्पतां॥वैश्वानरोवावृधानोन्तर्यच्छतुमेमनोहृदंतरमृतस्यके
तुस्वाहेति॥अव्याधितस्वापकालीनास्तसमयनिमित्तककर्मणितु॥अव्याधितस्वापकालानादित्या

श्री
२२८

स्तमयजनितप्रत्यवायपरिहारार्थंप्रायश्चित्तंकरिष्येतिसंकल्प्य॥येनसूर्यज्योतिषेतिपंचर्चस्यसूर्यपुत्रो
मितपाऋषिः॥सूर्योदेवता॥जगतीछंदः॥सूर्योपस्थानेवि०॥ॐयेनसूर्यज्योतिषाबाधसेतमोजगच्चवि
श्वमुदियर्षिभानुना॥तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुष्वप्न्यंसुव॥विश्वस्यहिप्रेषितोर
क्षसिव्रतमहेळयंनुच्चरसिस्वधाअनु॥यदद्यत्वासूर्योपब्रवामहेतंनोदेवाअनुमंसीरतक्रतुं॥तंनोद्या
वापृथिवीतंनआपइंद्रःशृण्वंतुमरुतोहवंवचः॥माशूनेभूमसूर्यस्यसंदृशिभद्रंजीवंतोजरणा
मशीमहि॥विश्वाहात्वासुमनसःसुचक्षसःप्रजावंतोअनमीवाअनागसः॥उद्यंतंत्वामित्रमहो
दिवेदिवेज्योग्जीवाःप्रतिपश्येमसूर्य॥महिज्योतिर्बिभ्रतंत्वाविचक्षणभास्वंतंचक्षुषेचक्षुषेमयः॥

आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रतिपश्येम सूर्य ॥५॥ इति पंचर्चं सूक्तं जपेत् ॥ विहितकर्म
भ्रांतस्वापकालीनादित्योदयनिमित्तकर्मणि तु ॥ विहितकर्मभ्रांतस्वापकालीनादित्योदयजनित
प्रत्यवायपरिहारार्थं प्रायश्चित्तं करिष्येति संकल्प्य ॥ यस्य ते विश्वेति चतसृस्य सूर्यपुत्रोभितपा ऋषिः ॥
सूर्यो देवता ॥ जगती छंदः ॥ सूर्योपस्थाने वि० ॥ यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशंते अ
क्तुभिः ॥ अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ॥ शं नो भव चक्षसा शं नो
अह्ना शं भानुना शं हिमा शं घृणेन ॥ यथा शमध्वं छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रं ॥ अस्मा
कं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ॥ अदत्पिबदूर्जयमानमाशितं तदस्मे शंयो

र रपो दधातन ॥ यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं ॥ अरावा यो नो अभि दुच्छुनाय
ते तस्मिन्तदेनो वसवो नि धेतन ॥४॥ इत्यृचचतुष्टयं जपेत् ॥ अंगारोपरिकपोतोपवेशनादिनिमित्त
कर्मणि तु ॥ अंगारोपरिकपोतोपवेशनसूचितारिष्टपरिहारार्थं देवाः कपोत इति सूक्तेन प्रत्यृचमाहु
तीर्होष्यामीति होमपक्षे ॥ जपपक्षे तु देवाः कपोत इति सूक्तं जपं करिष्ये ॥ इति विशेषः ॥ कपोतस्या
गारसमीपगमने तु कपोतागारसमीपगमनसूचितारिष्टपरिहारार्थमिति विशेषः ॥ देवाः कपो
त इति पंचर्चस्य सूक्तस्य कपोत ऋषिः ॥ विश्वेदेवा देवता ॥ जगती छंदः ॥ आगारोपरिकपोतो
पवेशनसूचितारिष्टपरिहारार्थं होमे वि० ॥ जपपक्षे पक्षे तु जपे वि० ॥ एवमेव गृहसमीपगमनेपि द्वे

यं॥ ॐ देवाः कपोत इषितो यदिच्छन्दूतो निरृत्या इदमाजगाम॥ तस्मा अर्चाम कृणवाम निष्कृतं शं नो अस्तु द्विपदे शं चतुष्पदे स्वाहा॥ विश्वेभ्यो देवेभ्य इदं०॥ एवं सर्वत्र त्यागः॥ शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहं नः॥ अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु॥ हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने॥ शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः॥ यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति॥ यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे॥ ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वं॥ संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्रपतात्पतिष्ठः॥ स्वाहेति त्यागः पूर्ववत्॥ अथार्थगमननिमित्तकर्मणि तु अर्थसि

ध्यर्थं वयमु त्वा पथस्पत इति प्रत्यृचमाज्याहुतीर्होष्यामीति होमपक्षे॥ जपपक्षे तु पक्षे तु वयमु त्वा पथस्पत इति सूक्तजपं करिष्ये इति विशेषः॥ वयमु त्वा पथस्पत इति दशर्चस्य सूक्तस्य भरद्वाज ऋषिः॥ पूषा देवता गायत्री छन्दः॥ अष्टम्यनुष्टुप्॥ अर्थसिद्ध्यर्थं जपे वि०॥ वयमु त्वा पथस्पते रथं न वाजसातये॥ धिये पूषन्नयुज्महि स्वा०॥ पूष्ण इदं न ममेति सर्वत्र त्यागः॥ अभि नो नर्यं वसु वीरं प्रयतदक्षिणं॥ वामं गृहपतिं नय॥ अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय॥ पणेश्चिद्वि म्रदा मनः॥ वि पथो वाजसातये चिनुहि वि मृधो जहि॥ साधन्तामुग्र नो धियः॥ परि तृन्धि पणीनामारया हृदया कवे॥ अथेमस्मभ्यं रन्धय॥ वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियं॥ अथे०॥ आ रिख किकिरा कृणु पणीनां हृदया कवे॥ अथे०॥ यां पूषन्ब्र

अ०प्र०
२३१

ब्रह्मचोदनीमारां बिभर्ष्याघृणे॥ तया समस्य हृदयमारिख किकिरा कृणु॥ या ते अष्ट्रा गोओपशाघृणे पशुसाधनी॥ तस्यास्ते सुम्नमीमहे॥ उत नो गोषणिं धियमश्वसां वाजसामुत॥ नृवत्कृणुहि वीतये स्वाहेति॥१०॥ नष्टलाभार्थकर्मणि तु नष्टलाभार्थं संपूषन्विदुषेति सूक्तेन प्रत्यृचमाज्याहुतीर्होष्यामीति होमपक्षे॥ जपपक्षे तु सूक्तं जपं करिष्ये इति विशेषः॥ संपूषन्निति दशर्चस्य सूक्तस्य भरद्वाज ऋषिः॥ पूषा देवता॥ नष्टलाभार्थे होमे वि०॥ ॐ संपूषन्विदुषा नय यो अंजसानुशासति॥ य एवेदमिति ब्रवत्स्वाहा॥ पूष्ण इदं न ममेति सर्वत्र त्यागः॥ समु पूष्णा गमेमहि यो गृहां अभिशासति॥ इम एवेति च ब्रवत्॥ पूष्णश्चक्रं न रिष्यति न कोशोवपद्यते॥ नो अस्य व्यथते पविः॥ यो अस्मै हविषाविधन्नतं पूषापि मृष्यते॥ प्रथमो

श्री
२३१

श्री

विंदते वसु॥ पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः॥ पूषा वाजं सनोतु नः॥ पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः॥ अस्माकं स्तुवतामुत॥ माकिर्नेशन्माकीं रिषन्माकीं संशारि केवटे॥ अथारिष्टाभिरागहि॥ शृण्वंतं पूषणं वयमिर्यमनष्टवेदसं॥ ईशानं राय ईमहे॥ पूषन्तव व्रते वयं न रिष्येम कदाचन॥ स्तोतारस्त इह स्मसि॥ परि पूषा परस्ताद्धस्तं दधातु दक्षिणं॥ पुनर्नो नष्टमाजतु॥ स्वाहेति पूर्ववत्॥१०॥ प्रजाहीनत्वेन तु प्रजाकामो हं संपूषन्नित्यादि प्रत्यृचं होमत्यागौ॥ प्राग्वज्जपो वा॥ मध्वादिगमननिमित्तककर्मणि तु महाध्वगमनसंभावितानेकदुःखपरिहारार्थं संपूषन्नध्वन इति सूक्तेन प्रत्यृचं होष्यामीति॥ संपूषन्नध्वन इत्यस्य सूक्तस्य कण्व ऋषिः॥ पूषा देवता॥ गायत्री छंदः॥ महाध्वगमनदुः

स्वपरिहारार्थं होमे दि०॥ अपपश्चेतु स्त्यक्तजपं करिष्ये॥ भयंकरमार्गगमने तु भयनिरसनार्थमिति विशेषः॥
सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्॥ सक्ष्वा देव प्रणस्पुरः॥ यो नः पूषन्नघो वृको दुःशेव आदिदेशति॥
अपस्म तं पथो जहि॥ अप त्यं परिपंथिनं मुषीवाणं हुरश्चितं॥ दूरमधि स्रुतेरज॥ त्वं तस्य द्वयाविनो
घशंसस्य चित्॥ पदाभितिष्ठ तपुषिं॥ आ तत्ते दस्र मंतुमः पूषन्नवो वृणीमहे॥ येन पितॄन चोदयः॥ अ
धा नो विश्वसौभग हिरण्य वाशीमत्तम॥ धनानि सुषणा कृधि॥ अति नः सश्चतो नय सुगा नः सुपथा
कृणु॥ पूषन्निह क्रतुं विदः॥ अभि सूयवसं नय न नवज्वारो अध्वने॥ पूषन्निह०॥ शग्धि पूर्धि प्रयंसि
च शिशीहि प्रास्युदरं॥ पूषन्निह क्र०॥ न पूषणं मेथामसि सूक्तैरभिगृणीमसि॥ वसूनि दस्ममी

महे॥ १०॥ औपासनाग्न्यनुगतनिमित्तकर्मणि तु उपशांतमौपासनाग्निं श्रोत्रियागाराहृताग्निप्रति
ष्ठापनस्य यमुपवासाभ्यामुत्पादयिष्ये इति विशेषः॥ एवं संकल्प्याग्निमानीयाग्निध्यानांतं कृत्वा प
रिसमूहन परिस्तरणपर्युक्षणानि कृत्वाज्यमुत्पूयस्रुवसंमार्जनाग्न्यर्चनादि कृत्वा॥ अयाश्चे
ति मंत्रस्य विमद ऋषिः॥ अया अग्निर्देवता॥ पंक्तिश्छंदः॥ गत्याग्न्यनुगतप्रायश्चित्ताज्याहोमे०॥
अयाश्चाग्ने० स्वाहा॥ अग्नय इ०॥ सर्वप्रायश्चित्तं करिष्ये॥ भूर्भुवः स्वः स्वाहा॥ प्रजापतय इ०॥
ततः परिसमूहन पर्युक्षणे कृत्वा चमेति संस्थाजपांतं कुर्यात्॥ सायं वा प्रातर्वेदं यथाकालं होमं कु
र्यात् इति॥ अन्वाहितानुगमने तु पूर्ववदग्निमुत्पाद्य अन्वाहिताग्न्यनुगमननिमित्तं पुनरन्वा

धानंकरिष्येइति संकल्प्य॥ आहुतिभिः समिधादध्यात्॥ ततः स्थालीपाकं कुर्यात्॥ अन्वाधानो
त्तरं कुत्रचिद्यजमानस्यागत्य प्रयाणनिमित्तकर्मणि तु अन्वाहिताग्निप्रयाणनिमित्तं तुभ्यं
ताइत्याज्याहुत्यादि करिष्ये॥ तुभ्यं तेति मंत्रस्यांगिरा ऋषिः॥ विरूपोग्निर्देवता॥ गायत्री छंदः॥
अन्वाहिताग्निप्रयाणनिमित्ताज्याहुतिहोमे०॥ ॐ तुभ्यंता अंगिरस्तमविश्वाः सुक्षितयः पृथ
क्॥ अग्ने कामाय येमिरे स्वाहेति हुत्वावह्निं समारोपयेत्॥ औपासनहोमलोपजनितप्रत्य
वायपरिहारार्थं मनः स्वस्त्यायनचतुर्गृहीतं होष्यामीति॥ मनोज्योतिर्जुषतामाज्यं विच्छिन्नं
समिमं दधातु॥ या इष्टा उषसो या अनिष्टास्ताः संतनोमि हविषा घृतेन स्वा०॥ ज्योतिषद्वयं॥

विच्छिन्नसंधाने तु विच्छिन्नस्य गृह्याग्नेः पुनः संधानं करिष्ये इति संकल्प्य॥ तत्र कारिका॥ आ
द्वादशदिनादेवमूर्ध्वं विच्छिन्ने तु नलः॥ प्रायश्चित्तं तु यस्तोक्तमग्नित्यागोपपातके॥ मनुभानत्र
कुर्वितत्तत्कालानुसारतः॥ उपलेपादिकं कुर्यादाधानांतं विवाहवत्॥ विवाहाज्याहुती हुत्वा
लाजाहोमो भवेदिह॥ गृहप्रवेशनीयाश्च हुत्वा स्याद्दध्यांजनं॥ परिणीत्यादिनास्तत्र ला
जानावपतिस्स्वयं॥ समानतंत्रकं चेह होमद्वयमिदं भवेदिहेति॥ पार्वणस्थालीपाकातिविपत्ति
निमित्तके तु॥ पौर्णमासस्थालीपाकातिपत्तिजनितप्रत्यवायपरिहारार्थं पथिकृत्स्था
लीपाकेनैयक्ष्ये॥ इति पौर्णमासातिपत्तौ॥ दर्शातिपत्तौ तु दर्शस्थालीपाकातिपत्तिजनिते

विशेषः॥ दर्शपूर्णमासस्थालीपाकातिपत्तिजनिते तिविशेषः॥ पुनराधेये तु॥ स्थालीपाकत्रयाति
पाते तु॥ विच्छिन्नस्य गृह्याग्नेः पुनरग्न्युत्पत्त्यर्थं पुनराधेयं करिष्ये॥ इति स्थालीपाकत्रयातिपा
ते॥ समारूढसमिन्नाशे तु विच्छिन्नस्येति विशेषः॥ अन्याग्नौ स्वयं यजने तु॥ अन्याग्नौ स्वयं
यजननिमित्तं पथिकृतस्थालीपाकेन यक्ष्येति॥ स्वाग्नावन्ययजने तु॥ स्वाग्नावन्ययज
ननिमित्तकमिति विशेषः॥ पूर्णाहुतिपक्षे तु पथिकृतस्थालीपाकस्थाने पूर्णाहुतिं होष्या
मीति॥ स्रुवाहुतिपक्षे तु स्रुवाहुतिनिमित्तमिति विशेषः॥ अर्वाक् शम्यापरासादग्न्यपक्षणे॥ अ
र्वाक् शम्यापरासाग्न्यपक्षणनिमित्तं प्रायश्चित्तं करिष्ये॥ इदं त एकं पर ऊत एकं तृतीयेन ज्यो

तिषा संविशस्व॥ संवेशने तन्व १ श्चारुरे — प्रियो देवानां परमे जनित्रे॥ इत्यग्निप्रक्षेपं कृत्वा॥ भूर्भु
वः स्वाहेत्याज्याहुतिं जुहुयात्॥ शम्यापरासात्परस्तादपक्षाणे तु॥ शम्यापरासादग्न्यपक्षाण
निमित्तं प्रायश्चित्तं करिष्य इति॥ संकल्प्येदं त एकमित्येकर्चाग्निप्रक्षेपं कृत्वा पथिकृत्स्थाली
पाकं कुर्यात्॥ अथवा पूर्णाहुतिं कुर्यात्॥ अग्नये पथिकृते स्वाहेत्येवंरूपः॥ इध्माधानोत्त
रं हविर्दोषे दुष्टहविःस्थाने आज्यं प्रतिनिधिं कृत्वा स्थालीपाकं समाप्य दुष्टहविरप्सु प्रक्षिप्ये
ध्माधानोत्तरं तद्देवतास्थालीपाकहविर्दोषनिमित्तं तद्देवतास्थालीपाकं यक्ष्य इति प्राय
श्चित्तं कुर्यात्॥ इध्माधानोत्तरं तद्देवताकहविर्दोषे॥ इध्माधानात्पूर्वं तद्देवताकहविर्दोष

निमित्तं तद्देवताकं हविः पुनरुत्सादयिष्ये॥ अंगहविर्दोषेतु॥ अंगहविः पुनरुत्सादयिष्येति संक
ल्प्याज्यं पुनरन्यदुत्पूयांगहोमं समापयेत्॥ स्विष्टकृदर्थदोषेतु॥ स्विष्टकृदर्थहविर्दोषनिमित्तमा
ज्येन स्विष्टकृद्यागं करिष्ये॥ दोषस्तु॥ प्रच्युते स्कन्नरवेः केशैः कीटैर्वा मध्यसेविभिः॥ वसासृक्
शुक्रमज्जास्थिमूत्रविण्मेददूषकैः॥ श्लेष्माद्यैरपि वीभत्सैर्दुष्टानि स्युर्हवींषि चेत्॥ भिन्नानि चे
वसर्वाणि दुष्टानि स्युः क्षिपेज्जले॥ स्रुक्छिद्रिघृतेनत्वन्यामाहृत्य जुहुयाद्धविः॥ वानस्पत्यानि
भिन्नानि प्राग्दंडान्यनले क्षिपेत्॥ इत्यादि॥ अन्यगृह्याग्निना स्वगृह्याग्नि संसर्गनिमित्तं अ
ग्नये विविचये स्थालीपाकं करिष्य इति॥ पूर्णाहुतिपक्षेतु॥ स्थालीपाकमित्यस्य स्थाने पूर्णाहु

तिमिति विशेषः॥ अग्नये विविचय इति नामदेवतायै निर्वापप्रयोगो नत्तः॥ एवं सर्वत्र स्थालीपाके
प्रायश्चित्तं॥ गृह दाहेतु गृहदाहनिमित्तमग्नये क्षामाय स्थालीपाकं करिष्य इति॥ शवाग्निनागृ
ह्याग्नि संसर्गेतु शवाग्निना गृह्याग्नि संसर्गनिमित्तं अग्नये शुचये स्थालीपाकं करिष्य इति॥ वै
द्युतेन संसर्गेतु॥ वैद्युतेन स्वगृह्याग्नि संसर्गनिमित्तं अग्नये अप्सुमते स्थालीपाकं करिष्य इति॥
पर्वण्यश्रुपातेतु॥ पर्वण्यश्रुपातनिमित्तं अग्नये व्रतभृते स्थालीपालीपाकं करिष्य इति॥ पर्वव्रत
लोपेतु॥ पर्वव्रतलोपनिमित्तं अग्नये व्रतपते स्थालीपाकं करिष्य इति॥ सर्वत्र विध्यपराधनिमित्तं
सर्वप्रायश्चित्तं करिष्ये इति संकल्प्य॥ सर्वप्रायश्चित्तं कुर्यात्॥ स्वयमग्निप्रज्वलननिमित्तं॥ उद्दीप्यस्व

तिद्वाभ्यां समिधावाधास्ये॥ इति॥ उद्दीप्यस्व जातवेदोपघ्नं निर्ऋतिं मम॥ पशूंश्च मह्यमावह जीवनं च दिशो दश॥ मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत्॥ अबिभ्रदग्न आगहि श्रिया मा परिपालय स्वाहा॥ अग्न पह०॥ अग्न्युपघाते तु॥ अग्न्युपघातनिमित्तं पुनस्त्वेति समिधमाधास्ये॥ पुनस्त्वादित्या०॥ रुद्रा०॥ वसुनीथा येदं०॥ अकृताग्रयणस्य नवान्नप्राशने तु॥ अकृताग्रयणस्य नवान्नप्राशननिमित्तं अग्नये वैश्वानराय स्थालीपाकं करिष्य इति॥ द्विषदन्नभोजने तु॥ द्विषदन्नभोजननिमित्तं॥ कपालनाशे तु॥ कपालनाशननिमित्तं इति विशेषः॥ वैश्वानराय स्थालीपाक एवं ज्ञेयः॥ हविःश्रपणात्पूर्वं कपालभेदे तु॥ हविःश्रपणात्पूर्वं कपालभेदनिमित्तगा

यत्र्या तेक कपालसंधानं अभिन्न इति द्वाभ्यां अप्सु प्रक्षेपं करिष्ये॥ गायत्र्या त्वा शताक्षरया संदधामि इति संदधाय॥ अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन्पुनः॥ इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंतरंतु॥ त्रयस्त्रिंशत्तंतवो यान्वितन्वत इमं यज्ञं स्वधया ये यजंते तेभ्यो छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवान्॥ इति॥ कपालस्याशुचिसंसर्गे तु कपालस्याशुचिसंसर्गनिमित्तं अभिन्न इति द्वाभ्यां मप्सु कपालप्रक्षेपं करिष्य इति॥ भेदने तु भेदननिमित्तमिति विशेषः॥ मन्मयांतरस्याशुचिसंसर्गे भिंने वा॥ अशुचिसंसर्गनिमित्तं भूमिर्भूमित्यप्सु प्रक्षेपं करिष्ये॥ भूमिर्भूमिमगान्माता मातरमप्यगात्॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भि

अ० प्र०
२३७

ष्यनामिति ॥ पुरोडाशस्फुटनेतु ॥ पुरोडाशस्फुटननिमित्तं किमुत्सनसीतिवर्हिषिनिधानं ॥ मा
हिंसीरित्यभिमंत्रणं च करिष्य इति ॥ उत्सनने तु उत्सननिमित्तविशेषः ॥ किमुत्सतसि किमु
लोष्ठाः शांतः शांतेरिहागहि ॥ अघोरो यज्ञियो भूत्वासीद सदनं स्वमासीसदनं समित्यनेन
वर्हिषिनिदध्यात् ॥ माहिंसीर्देव प्रेरित आज्येन तेजसास्व ज्यमानः किं चनरीरिषः ॥ योगक्षे
मस्य शांत्या अस्मिन्नासीद वर्हिषि ॥ इत्यभिमंत्रणं कुर्यात् ॥ जीवतः स्वस्यमृतशब्दश्रवणे
तु ॥ जीवतः स्वस्य मृतश्रवणनिमित्तं अग्नये सुरभिमते स्थालीपाकं करिष्य इति ॥ पूर्णाहु
तिहोमपक्षे तु पूर्णाहुतिमिविशेषः ॥ यमलजनने तु ॥ भार्यायाः यमलजनननिमित्तं मरु

श्री
२३७

द्भ्यः स्थालीपाकं करिष्ये इति ॥ गोर्यमलजनने गोर्यमलजनननिमित्तविशेषः ॥ आहुतिस्कंदने तु ॥
आहुतिस्कंदनिमित्तं देवां जनमित्यभिमर्शनं करिष्य इति संकल्प्य ॥ तत्र त्वाद्रप्सश्चेत्येन दाहुतिं
अग्नौ प्रक्षिपेत् ॥ देवान् जनमगन्यज्ञस्ततस्य माशीरवतु वर्धतां ॥ भूतिर्घृतेन मुंचतु यज्ञो यज्ञपति
मंहसः ॥ भूपतये स्वाहा ॥ भुवनपतये स्वाहा ॥ भूतानांपतये स्वाहा ॥ यज्ञ [illegible] स्य त्वाप्रमयो
न्मयाभिमयाप्रतिमयाइत्यभिमृश्य ॥ द्रप्सश्चस्कंद प्रथमां अनुद्यूनिमं च योनिमनुयश्च पूर्वः ॥
समानं योनिमनुसंचरंतं द्रप्सं जुहोम्यनुसप्तहोत्राः ॥ स्वाहेति तामाहुतिं जुहुयात् ॥ नत्र कारिका ॥
द्रप्सश्चेत्याहुतिं तां च प्रक्षिपेदनले पुनः ॥ देवान् जनेति सर्वत्र स्कंने त्वभिमृशेद्बुधैरिति ॥ अनाहु

तिरूपेस्कंदनेतु॥ अनाहुतिरूपहविः स्कंदननिमित्तं देशान् जनमित्यभिमर्शनं करिष्य इति संकल्प्याभिमर्शनमेव॥ निमित्तानंतरं सर्वप्रायश्चित्तं भवेदिह॥ भागे वीत्यधेते दोष आज्यसंस्कारतोयदि॥ प्रायश्चित्तं भवेदाज्यसंस्कारानंतरं ततः॥ देवताव्युत्क्रमे तु देवताव्युत्क्रमनिमित्तं यद्वोदेवा इत्याहुति होमं ब्रह्मणे मुख्यहोमद्रव्यदानं करिष्ये॥ स्वयं होमं ब्रह्मण इत्यस्य स्थाने यस्मै कस्मै चिद्ब्राह्मणायेति विशेषः॥ एवं मंत्रव्युत्क्रमनिमित्तं॥ अवदानव्युत्क्रमनिमित्तं॥ द्रव्युत्क्रमनिमित्तं॥ निर्वापव्युत्क्रमनिमित्तं॥ यागव्युत्क्रमनिमित्तं इत्यादि तत्तद्व्युत्क्रमे ज्ञेयं॥ यद्वोदेवा इत्यस्य अभितपा ऋषिः॥ मरुतो देवता॥ त्रिष्टुप् छंदः॥ तत्तद्व्युत्क्रमनिमित्तमाज्याहुति होमे वि०॥ यद्वोदेवा०

स्वा० मरुभ्य इदं०॥ हविषो अपाके तु अपक्केनैव हविषा यागं समाप्य यागसाधनीभूतहविरपक्कतानिमित्तं॥ चतुःशरावपरिमितं व्रीहिनिष्पादितौदनेन चतुरो ब्राह्मणान्भोजयिष्य इति॥ हविर्दाहे तु यदावदानपर्याप्तमदग्धं लभ्यते तदा तेनैव यागः॥ नैवैशिषिकं प्रायश्चित्तं॥ यदा तु अवदानपर्याप्तं न लभ्यते तदानुतार न्माज्येणैव यागं कृत्वा॥ तत्र शेषं समाप्य॥ अनवशिष्टयागपर्याप्तं हविर्दाहनिमित्तं पुनर्यागं करिष्य इति संकल्प्य पुनर्यागं कुर्यात्॥ सर्वहविर्दाहे तु पुनर्हविरंतरं तोसत्तिं कृत्वारब्ध एव यागः कार्यः॥ न च पूर्वोक्तरीत्या प्रायश्चित्तिः॥ मध्यात्पूर्वार्धतो वृत्तं यदि दुष्टं हविर्भवेत्॥ तस्येव हविषो वद्येन्मध्यात्पूर्वार्धतः पुनः॥ पंचमहायज्ञलोपे तु॥ तत्तन्महाय

ज्ञलोपनिमित्तं मनस्वत्या चतुर्गृहीतं होष्यामीति संकल्प्य ॥ मनो ज्योतिः ॥ एतेन स्वाहा ॥ इति जुहु
यात् ॥ द्व्यहं त्र्यहं वा लोपे तु द्व्यहं त्र्यहं वा तत्तन्महायज्ञनिमित्तं तिसृभिस्तंतुमतीभिर्होमं चतसृ
णां वारुणीनां जपं करिष्ये ॥ इति संकल्प्य ॥ जपं होमं कुर्यात् ॥ तंतुं तन्वन्नित्यस्य वामदेव ऋष
यः ॥ अग्निर्देवता ॥ जगती छंदः ॥ पंचमहायज्ञलोपजनितप्रत्यवायपरिहारार्थे जपे वि० ॥
तंतुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ॥ अनुल्बणं वयत जोगुवाम
पो मनुर्भव जनया दैव्यं जनं स्वाहा ॥ अग्नये तंतुमत इ० ॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते
संसृजेथामयं च ॥ पुनः कृण्वंस्त्वा पितरं युवानमन्वातांसीत्त्वयि तंतुमेतं स्वा० अग्नये तं० ॥

त्रयस्त्रिंशत्तंतवो ये वितत्निरे य इदं यज्ञं स्वधया ये यजंते ॥ तेषां विछिंनं प्रत्येतद्दधामि स्वाहा घर्मो
देवां अप्येतु स्वा० ॥ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ॥ क्षयन्नस्मभ्यमसु
र प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथा
य ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ इमं मे वरुण श्रुधी हवमद्या च मृ
ळय ॥ त्वामवस्युरा चके ॥ तत्त्वा यामि० ॥ इति जपेत् ॥ सर्वेषां महायज्ञानां दशाहं द्वादशा
हं वा लोपे चतसृभिर्वारुणीभिर्होमं तंतुमतस्थालीपाकं करिष्य इति संकल्प्य ॥ आज्यभा
गांतं कृत्वा चतसृभिर्वारुणीभिराद्यावाज्यहोमं कृत्वा तिसृभिस्तंतुमतीभिश्चरुहोमं कु

यीत् ॥ ततः कर्मशेषं समापयेदिति ॥ उपवासपक्षे तु नित्यमहायज्ञलोपजनितमुपवासं करि
ष्ये ॥ इति विशेषः ॥ स्नातकव्रतलोपे तु ॥ स्नातकव्रतलोपजनितमुपवासं करिष्य इति ॥ ए
वमष्टकाद्यावश्यककर्मस्वपि नित्यकर्मलोपजनितमुपवासं करिष्ये ॥ इति विशेषः ॥ पिंड
पितृयज्ञलोपे तु ॥ पिंडपितृयज्ञलोपप्रायश्चित्तार्थं सद्यो होतारं समहं होष्यामि ॥ जुहूं
चतुर्गृहीतमाज्यं गृहीत्वा ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजा अग्नीत् ॥
अच्युतमना उपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ ॥ अयास्य उद्गाता ॥
वाचस्पते हृद्विधे नामन् ॥ विधेम ते नाम ॥ विधेस्त्वमस्माकं नाम ॥ वाचस्पतिः सोम

मपात् ॥ मो दैव्यस्तंतुश्छेदि मा मनुष्यः ॥ नमो दिवे नमः पृथिव्यै स्वाहा ॥ वाचस्पतय इदं न
मम ॥ सीमंतव्रतचौड[illegible]न्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठा
सु च ॥ पुंस्युत्यावसथप्रवेशनसुता[illegible]श्रमस्वीकाररक्षितियाभिषेक इयिताद्यन्नौ च
नांदीमुखं ॥ १ ॥ इति श्रीअनंतदीक्षितविरचिते प्रयोगरत्ने प्रायश्चित्तांतः समाप्तः ॥ श्रीम
न्नीलसरस्वती प्रीयतां ॥ ॥ मेधाजननात्पूर्वकालीनाग्निकार्यं यावदुपनयनाग्निनाशे उ
पनयनाहुतिभिः कंठसूत्रधारणादि माणवकसंस्कारावक्षारणाग्निकार्यगायत्र्युपदेशवर्जं
पूर्वोत्तरतंत्रसहिताभिरग्निमुत्पाद्य तत्रानुप्रवचनीयात्पूर्वभाव्यग्निकार्यपूर्वकमनुप्रवचनीयादि

कार्यं॥ न च संस्कृतमाणवकस्य संस्कारैः प्रयोजनं॥ पुनः संधाने पाणिग्रहणादीनामिवा
त्रापि स्फटिकसूत्रधारणादीनां निवृत्तिः॥ अथ प्रयोगः॥ नष्टस्योपनयनाग्नेः पुनरुत्पत्तिं क
रिष्ये इति संकल्प्य॥ स्थंडिलादि॥ नष्टस्योपनयनाग्नेः पुनरुत्पत्तिहोमे०॥ इदानीं कर्माणि
सप्तावशिष्टेषु प्रथमं तावत् श्रवणाकर्मोच्यते॥ श्रवणाकर्म सर्पबलिं चमुत्काकरणापुत्रं
तूपवासि॥ नेव॥ श्रावण्यां पौर्णमास्यां पूर्वाह्णे स्वस्तिवाचनं वृद्धिश्राद्धं चरुत्वादिवेव यवानां
व्रीहीणां वा लौकिकाग्नौ प्रस्थमितानां भर्जनेन धानाः कृत्वा यवैर्व्रीहिभिर्वा सक्तुभिर्नवं क
लशं प्रपूर्य वैकंकतीं दर्वीमपि संपाद्य धनदुभयं नवे शिक्ये निधाय वल्यं पर्यगृहे प्राच्यां दिशि

उहकरिष्यामीति॥ शुचिदेशं परिगृह्य व्रीहिं चरुपात्रं कपालं च संपाद्य धानासमा ऽ ऽ दीप्तस्याद्ग्रौ ऽ ज्येनाक्ताः कृत्वैकपात्रे निधा
य अपरपात्रां नरे अनक्तधानानि निधाय ततोऽस्तमिते औपासनं हुतप्राणानायम्य देशकालौ सं
कीर्त्य मम पुत्रपौत्रादीनां च रोगनिवारणसमस्तपापक्षयादिद्वारा श्री० नित्यविधिरूपं श्रवणा
कर्म करिष्ये॥ इति संकल्प्य॥ अ। ग्निध्यानांतं कृत्वा॥ क्रियमाणे श्रवणाकर्महोमे देवतापरि
ग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा ऽ त्र प्रधानं॥ अग्निं ४ चरुणा अच्युत भौमं पुरो
डाशेन अग्निं आशयाज्येन वाजिदेवताधानाद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योय
क्ष्ये॥ व्याहृतिभिः द्वे समिधमग्नावाधाय परिसमूहनादि कृत्वा चरुस्थालीप्रोक्षण्योद

वेः स्रुवौ प्रणीताऽऽज्यपात्रे इध्माबर्हिषी कपालशरा— दृश्शूर्पं कृष्णाजिनं शम्याउलूखलमुसलं
दृषदुपलवेदः मेक्षणमदंति आशायपात्रंउपवेषः एतानि पात्राण्यासाद्य पूर्णपात्रं निधानांतं
कृत्वा ते पवित्रे शूर्पे निधाय चरुपुरोडाशदेवतानां पंचानां तूष्णीं चतुरश्चतुरो मुष्टीं निरुप्य ते
पवित्रेउपरि निधाय॥ तथैव तूष्णीं प्रोक्ष्य ततः प्रत्यग्ग्रीवं ऊर्ध्वलोम कृष्णाजिनं निधाय तदुपरिउ
लूखलं निधाय व्रीहीणोप्य पत्नी तंडुलान् त्रिः शुक्लीकुर्यात्॥ त्रिः प्रक्षाल्य चरुपुरोडाशतंडुला
न्यथाभागं पृथक्कृत्य दृषदुपले पुरोडाशीयान्स्वयं पिष्टीकृत्य कृष्णाजिने प्रस्कंध पत्न्या पेष
यित्वा चर्वर्थमग्नेर्दक्षिणभागे स्थालीं निधाय अग्नेरुदग्देशे उपवेषाग्र्य प्रादेशमित

यज्ञियकाष्ठेन द्वावंगारौ पृथक्कृत्य तयोरेकं वायव्ये निरस्यापरस्य ध्रुवशिष्टांगारे कपालं निधा
य तदुपर्यपरांगारान् निक्षिप्य पात्रांतरे पिष्टसेकार्थमपः आनाप्य पिष्टभर्जनशरावे क्षालितेग्नौ
प्रताप्य स्वाग्रे निहिते सपवित्रे पिष्टं निक्षिप्याग्नौ भर्जनं कृत्वा पूर्णपात्रोदकं स्रुवेण पिष्टे प्र
क्षिप्य तप्तोदकेन पिष्टं संमिश्र्य पिंडं मध्ये शफपात्रं कूर्माकृतिं कृत्वा कपालादंगारं वेदेनापो
ह्य स्थाल्यां तंडुलानोप्य कपाले पुरोडाशं निधायाद्भिः श्लक्ष्णीकृत्य परिस्तरणादुत्तरतः अं
गारानपोह्य तदुपरि आज्यपात्रं निधाय वामहस्ते दर्भाग्रद्वयं धृत्वा उल्मुकेनावज्वल्य द
र्भाग्रद्वयं निक्षिप्य उल्मुकेन चत्वारि हवींषि त्रिः पर्यग्नि कृत्वा उल्मुकं निरस्य अंगारान

ग्नौ क्षिपेत्॥ सवितुष्ट्वेति आज्यस्योत्सवनं कृत्वा पुरोडाशमुल्मुकैः प्रताप्य तत्रैव सुश्रुतं श्रपयि
त्वा तदुपरि सांगारं भस्म निक्षिप्य हस्तं प्रक्षाल्य ततो बर्हिरास्तरणं आज्यस्थापनं स्रुवसंमार्ज
नं कृत्वा॥ पुरोडाशोपरिस्थं भस्म वेदेनापोह्य चरुपुरोडाशावभिघार्य। उदगुद्वास्य चरुं बर्हिष्या
साद्य तदुत्तरे पात्रांतरस्थित लौकिकाज्ये पुरोडाशं मज्जयेत्यक ट पृष्ठं वा कुर्यात्॥ तदुत्तरतः अ
क्ताधाना अनक्ताधाना आसाद्य अग्निमलंकृत्य॥ विश्वानि नो०॥ इध्ममहवनादि आज्य
भागांतं कृत्वा॥ अवदानधर्मेण चरुमवदाय अंगुष्ठपर्वमात्रं मध्यात् गृहीत्वा दर्व्यामोप्य॥ पू
र्वार्धाच्च गृहीत्वा दर्व्यामोप्य पश्चार्द्धादिति पंचावत्तिना चरुमभिघार्य॥ अवत्त [illegible] मभिघारयेत्॥

अग्ने [illegible] नयेति चतसृणामगस्त्य ऋषिः॥ अग्निर्देवता त्रिष्टुप्छंदः॥ श्रवणाकर्मप्रधान
चरुहोमे वि०॥ ॐ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्य
स्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहा॥ अग्नय इ०॥ अग्ने त्वं पारया नव्यो अ
स्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः
स्वा०॥ अग्न०॥ अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमंत कृष्टीः॥ पुनरस्मभ्यं सुवि
ताय देव क्षां विश्वेभिरमृतेभिर्यजत्र स्वा० अग्न०॥ पाहि नो अग्ने पायुभिरजस्रैरुत प्रि
ये सदन आ शुशुक्वान्॥ मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः स्वा० अग्न०

अ०प्र०
२४४

ततः सव्येन पाणिना दक्षिणं पाणिमुपस्तीर्य हस्तं पुरोडाशमादाय द्विरभिघार्य पंचावत्तीतु त्रिः॥
ॐ अच्युताय भौमाय स्वाहेति हुत्वा॥ अच्युताय भौमायेदं०॥ ततः यस्मिन्नाज्ये पुरोडाशस्था
पितः स्तदाज्यं स्रुवेणादाय॥ मानो अग्न इत्यस्यागस्त्योग्निस्त्रिष्टुप्॥ श्रवणाकर्मप्रधान आ
ज्यहोमे वि०॥ ॐ मानो अग्ने वस्रजो अघायाविष्यवे रिपवे दुछुनायै॥ मादत्वते दशते
मादत्ते नो मारीषते सहसावन्परादाः स्वा० अग्न०॥ ततः स्रुवां जलावन्येनोपस्तरते प्रागक्ता
धानादि स्त्रिर्वीपयित्वाभिघार्य॥ शंनो भवंत्वित्यस्य वसिष्ठो वाजिनस्त्रिष्टुप्॥ श्रवणाक
र्मप्रधान ध्याहोमे वि०॥ ॐ शंनो भवंतु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः॥ जंभयंतोहिं
ना१

श्री
२४४

वृकं रक्षांसि सनेम्यस्मद्युयवंनमीवाः स्वा०॥ अंजलिना हुत्वा वाजिभ्य इदं०॥ ततः अनभ्यक्ता धानाः
पुत्रादिभ्यो मात्सेभ्यो दत्वा चरुधाने कदेशतः स्विष्टकृतं हुत्वा॥ दर्व्यामुपस्तीर्य चरोरुत्तरार्द्धात्सकृ
त्सकृद्गृहीत्वा दर्व्यां मोप्यपंचावत्तीतु हविर्भागद्वये पिउत्तरार्द्धात्पूर्वार्द्धाच्च द्विर्द्विरवदाय पात्रस्थमन
भिघार्य अवत्तं तु द्विरभिघार्य॥ यदस्येति स्विष्टकृदादि होमशेषं समाप्य॥ यस्य स्मृत्या०॥ यथा
शक्ति ब्राह्मणान्भोजयेत्॥ इति श्रवणाकर्मप्रयोगः॥ अथ सर्पबलिः॥ श्रवणाकर्मानंतरं प्रा
णानायम्य देशकालौ स्मृत्वा मम भार्यादि पुत्रापत्त दुहितृ सहितस्य भौमादि सर्वसर्पेभ्यः संभा
वित बाधापरिहार द्वारा श्री० नित्यविधिरूपं सर्वबल्याख्यं कर्म करिष्ये॥ दर्वीमादाय शिक्य

स्थापितकलशाहितसक्तुभिः स्तामाद्यर्यं गृहीत्वा गृहान्निर्गत्य प्राच्यां दिशि पूर्वपरिगृहीतं देश
मासाद्य प्रोक्ष्य॥ ॐ सर्पदेवजनेभ्यः स्वाहेति मंत्रेण दर्व्या स्थसक्तून् प्राङ्मुखो निक्षिप्य सर्पदेवज
नेभ्य इदं०॥ ततः कृतांजलिः॥ ये सर्पाः पार्थिवा य आंतरिक्ष्या ये दिव्या ये दिश्यास्तेभ्य इमं बलि
मुपाकरोमीति मंत्रेण सर्पानुद्दिश्य नत्वा बलिं प्रदक्षिणीकृत्य बलेः पश्चादुपविश्य॥ ॐ सर्पोसि
सर्पतां सर्पाणामधिपतिरस्यं नेनमनुष्यां॥ स्त्रायसे धूपेन सपान्यज्ञेन देवास्त्वपिमा संतंत्वयि
मां संतः सर्पा मा हिंसिषुः॥ ध्रुवा देवदत्तं परिददामीति ज्येष्ठक्रमेण नामग्रहं पुत्रादीन्परिद
ध्यात्॥ ये वं ध्रुवा सावित्री ते परिददामीति अप्रत्तदुहितॄः ततो ध्रुवा समवंती ते परि भार्यां ध्रु

वनारायणशर्माणं परिददामी सात्मानमंते॥ अन्यः कर्ता चेन्मापदस्याने यजमाननाम द्वितीयां
तमुच्चरेत्॥ ततः प्रतिपदमारभ्य प्रत्यवरोहणपर्यंतं सायं प्रातः काले पुतथैव दर्व्या तैरेव सक्तुभिः
शुचिदेशे बलिं हरेत्॥ तत्र नमस्कारादि परिदानांतं न कार्यं॥ अथवा श्रावणप्रतिपदामार
भ्य यस्मिन्नहनि प्रत्यवरोहणं मार्गशीर्षशुद्धचतुर्दश्यां पौर्णमास्यां वा क्रियते तस्माद्दर्वाची
नदिनानि ह्रासवृद्धिभ्यां परिगणय्य तेषु यावंतः सायंप्रातः कालास्तावतो बलिंस्तदेव द
द्यात्॥ तदा च प्रथमबलिदानांते नमस्कारादि परिदानांतं सकृदेव न प्रत्येकं॥ पवित्रग्रंथिं
विस्रस्य शुद्धदेशे क्षिपेत्॥ तदहरेवाखिलबलिदानं मुख्य यज्ञः॥ वृद्धिश्राद्धं नूभयत्र तंत्र

अ० प्र०
२४६

मेमेव॥ बलेर्बलिंदातुं शांतरांकेनापि प्रधानं न कार्यमापरिदानात्॥ इति सर्पबलिः॥ अथ आश्व
युजीकर्म॥ आश्विनशुक्लपौर्णमास्यां आश्वयुजी कर्म॥ कर्तापूर्वेद्युरुपले पादिना गृहं सम्मी
कृत्यालंकृत्यापरेद्युस्त्रीपुत्रादिसहितोभ्यंगादि कृत्वा प्रातरौपासनं हुत्वाभ्युदयिकं विधाय॥
प्राणानायम्य देशकालौ स्मृत्वा मम स्त्रीपुत्रादिसहितस्य न्यूनापेक्षितविषयसंपूर्णता
पूर्णानवसादनसिद्धिद्वारा श्री॰ नित्यविधिरूपमाश्वयुजीकर्म करिष्ये॥ इति संकल्प्य॥
अग्निध्यानांतं कृत्वा॥ क्रियमाणे आश्वयुजिहोमे देवतापरिग्रहार्थमित्यादि चक्षुषी
आज्येनेत्यंतमुक्त्वा॰ अत्र प्रधानं॥ पशुपतिं॰ शिवं॰ शंकरं॰ पृषातकं॰ चरुणा पृषातकं पृषातक

श्री
२४६

द्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्ये इत्यंतमुक्त्वा व्याहृतिभिरग्निमाधाय॥ परिसमूहनादि
पात्रासादने विशेषः॥ चरुस्थाली पृषातकस्थाली प्रोक्षण्योदर्वीस्रुवौ प्रणीताज्यपात्रे इध्माबर्हि
षि शूर्पं कृष्णाजिनउलूखलमुसलं चेति॥ पूर्णपात्रनिधानांतं कृत्वा ते पवित्रे शूर्पे निधाय पशुप
तये त्वा जुष्टं निर्वपामी चतुरो मुष्टीन्निरूप्य ते पवित्रे व्रीहीणामुपरि निधाय॥ प्रजापतये त्वा जु
ष्टं प्रोक्ष्यामीति चतुर्वारं प्रत्यग्ग्रीवं उर्ध्वलोम कृष्णाजिनं निधाय तदुपरि उलूखलं निधा
य चरुश्रपणादि आज्यभागांतं कृत्वा अवदानधर्मेणादाय॥ स्रुतादिभिः अन्वारब्धस्तु
कृ पार्श्वेन॥ ॐ पशुपतये शिवाय शंकराय पृषातकाय स्वाहेति हुत्वा पशुपतये शिवाय

पयस्याज्ये निषिक्ते नु तु पयस्याः पृषातकं। पयं तु स्त उभयं पृषातकं

शंकराय पृषातकायेदं॥ ततो यजमानो जलावन्यः कश्चिदुपस्तीर्य स्रुवेण पृषातकं द्विरव
दायाभिघार्य यजमानः॥ ॐ ऊनं मे पूर्यतां पूर्णं मे मोपसदत् पृषातकाय स्वाहेत्यंजलिना हु
त्वा पृषातकायेदं॥ आज्यमिश्रं पृषातकं चरुं पृषातक शेषेण स्विष्टकृतं॥ दर्व्यामुपस्तीर्य
चरोरुत्तरार्धात्सकृत्सकृदुद्गृहीत्वा दर्व्यामोप्य पंचावत्तीतु हविर्भागद्वये पिउत्तरार्धात्पूर्वा
र्धीयं द्विर्द्विरवदाय पात्रस्यमनभिघार्यं अवत्तं तु द्विरभिघार्य स्रुवेण पृषातकं अवदाय
यदस्येति स्विष्टकृदादि होमशेषं समाप्य॥ यथाशक्ति ब्राह्मणान्भोजयिष्ये॥ इति
आश्वयुजी कर्मप्रयोगः॥ अथाग्रयणं॥ शरदि पौर्णमास्यां पर्वणि व्रीतदलाभे कृत्ति

कादि विशाखांतेषु देवनक्षत्रे प्रत्यतमे चंद्रानुकूल्ये आग्रयणं कार्यं॥ प्रातरौपासनं हुत्वाभ्यु
दयिकं विधाय॥ प्राणानायम्य देशकालौ स्मृत्वा मम रोगजरानिवृत्ति श्रीयशोन्नप्राप्तिद्वारा
श्री॰ नित्यविधिरूपमाग्रयणं करिष्ये॥ अग्न्याधानांतं कृत्वा क्रियमाणे आग्रयण होमे देव
तापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं इंद्राग्नी विश्वान्देवान् द्यावापृ
थिव्यौ नवान्न चरुणा शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्ये अग्न्यान्वाधाय परिसमूहनादि
पूर्णपात्रनिधानांतं कृत्वा तानि पवित्रे शूर्पे निधाय तूष्णीं द्वादशमुष्टीर्निरूप्य तथैव प्रोक्ष्य चरुश्रप
णादि आज्यभागांतं कृत्वा॥ अवदानधर्मेणादाय अन्वारब्धेन॥ ॐ सजूरृतुभिः सजू

र्विधाभिः सजूरिंद्राग्निभ्यांस्वा० इंद्राग्निभ्यामिदं० ॥ॐ सजूर्ऋतुभिः सजूर्विधाभिः सजू
र्विश्वेभ्योदेवेभ्यस्वा० विश्वेभ्योदेवेभ्यइ० ॥ॐ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृथि
वीभ्यांस्वा० द्यावापृथिवीभ्यामिदं० ॥तिस्र आहुतिर्हुत्वास्विष्टकृदादि होमशेषं रुद्रप्रहर
णं कृत्वा मध्यमवैश्वदेवहविःशेषवर्ज्यंहुतावशिष्ट चरोरेकदेशं सव्येपाणौगृहीत्वा ॥ॐ
प्रजापतयेत्वाग्रहंगृह्णाम्यमत्यंयशसेमह्यमंनाद्यायेति मंत्रेण विहाराद्बहिः प्राङ्मुखोपवि
ष्टोभिमृश्यदक्षिणेनपाणिना ॥ॐ भद्रान्नः श्रेयः समनैष्टदेवास्त्वयावशेनसमशीम
हित्वा ॥सनोमयोभूः पितवाविशेहशन्नोभवद्विपदेशंचतुष्पदेइतिमंत्रेणप्राश्यद्विराच

म्यतत्रैवोपविष्टः ॥ॐ अमोसिप्राणतदृतंब्रवीम्यमासिसर्वानसिप्रविष्टः ॥समेजरांरोगमपनुद्य
शरीरादमामएधिमाम्रथामइंद्रेतिमंत्रेणनाभिमालभेत ॥ततः पत्नीमध्यमवैश्वदेवहविः
शेषममंत्रकंप्राश्नीयात् ॥प्रायश्चित्तादि होमशेषंसमापयेत् ॥सांगतासिध्यर्थंब्राह्मणा
न् २०।८ ॥यथाकालंभोजयिष्ये ॥यथाशक्तिभूयसींदद्यात् ॥इदमाग्रयणपदाश्वयुजांपौ
र्णमास्यांक्रियतेतदैककाल्त्वादाश्वयुजीकर्मणासमानतंत्रताभवति ॥तत्राश्वयुजी
कर्मप्रधानहोमंकृत्वाग्रयणप्रधानहोमः ॥द्वयोः स्थवोत्तरार्धादेकंस्विष्टकृतमिति अ
ग्रयणमकृत्वानवान्नंभक्षणस्यनिषिद्धत्वादुर्भिक्षेजीर्णधान्यालाभेनवधान्यमक्षणा

धिकारार्थं मलमासेपि कार्यं॥ अनापदि तु शुद्ध एव॥ अकृताग्रयणो श्रियान्नवान्नं यदि वे
नतः॥ वैश्वानरायकर्त्तव्य श्चरु पूर्णाहुति स्रुवा॥ वैश्वानरस्थालीपाक पूर्णाहुतिं वा कुर्या
त्॥ इत्याग्रयणप्रयोगः॥ अथ प्रत्यवरोहणं॥ तत्र॥ मार्गशीर्ष्यां पौर्णमास्यां चतुर्द
श्यां वा कार्यं॥ कर्त्तादिने व गृहं कुड्य लेपन तदाच्छादन निम्नोन्नभूमि समाकरणादि
निवेशनमलं कृत्य फलरहित धान्यतृणनिर्मितं कटं संपाद्य नांदीश्राद्धं कृत्वास्त
मिते औपासनानंतरं देशकालौ स्मृत्वा मम स्त्री पुत्रादिसहितस्य जलस्थलचर सर्प
बाधा निवृत्यभय हेमंत सेमनस्य सिद्धि द्वारा श्री० नित्य विधि रूपं प्रत्यवरोहणाख्यं

थ्यं कर्म करिष्ये॥ अग्निध्यानांतं कृत्वा॥ अस्मिन्प्रत्यवरोहणहोमे देवतापरिग्रहार्थमित्या
दि चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं॥ श्वेतं श्वेतं पायसेन इध्मसंनहनेन रुद्रं इत्या
दि पूर्णपात्रनिधानांतं कृत्वा ते पवित्रे शूर्पे निधाय तूष्णीं अष्टौ मुष्टीं निरूप्य तथैव प्रोक्ष्य
चरुश्रपणादि आज्यभागांतं कृत्वा अवदानधर्मेणादाय स्रुतादिभिः अन्वारब्धः॥ ॐ
अप श्वेत पदाजहि पूर्वेण चापरेण च॥ ॐ सप्त च वारुणीरिमाः सर्वाश्च राजबांधवीः स्वा०
श्वेताय इदं०॥ न वै श्वेतश्चाध्यागारे हि र्जघान किंचन॥ श्वेताय वैदार्वायनमः स्वा० श्वेता
य इदं०॥ द्वे पायसाहुती हुत्वा॥ अभयं नः प्राजापत्येभ्यो भूयादित्यग्निमीक्षमाणो जपित्वा॥

अ०प्र०
२५०

शिवो नः सुमना भवेति हेमंतं संबुध्यं तं मनसा स्मरेत्॥ ध्यात्वा पूर्वं निर्मितं कटमग्नेः पश्चा
दास्तीर्य स्त्रीपुत्रादिसहितस्तस्मिन्नुपविश्य॥ स्योना पृथिवी नो भवेति तिसृभिर्गायत्री॥
जपेद्वि०॥ स्त्रीबालव्यतिरिक्ताः स्योना पृथिवीत्यादि स्वस्त्ययनपर्यंतान्मंत्राञ्जपे
युः॥ स्योना पृथि०॥ प्राक्शिरा उदङ्मुखा दक्षिणपार्श्वेन शायीत गृहिणोऽनंतरं ज्येष्ठ
क्रमेण तथैव शायीरन्॥ ततउत्थायोपविश्य प्राङ्मुखाः सर्वे॥ अतो देवा मेधातिथि
र्विष्णुर्गायत्री॥ जपेद्वि०॥ अतो देवा०॥ इत्यृचं जपित्वा पुनरपि तथैव शायीत्वा उत्थायो
पविश्य॥ दक्षिणमुखाः अतो देवा अवंतु नः इति प्रथमपादं सकृज्जपित्वा॥ पुनरपि

श्री
२५०

तथैव शायीत्वा उत्थायोपविश्य पश्चिमाभिमुखाः यतो विष्णुर्विचक्रमे इति द्वितीयपादं सकृज्जपित्वा॥ पु
नरपि तथैव शायीत्वा उत्थाय उपविश्य उदङ्मुखाः पृथिव्याः सप्तधामभिः इति तृतीयपादं स
कृज्जपेयुः॥ ततः कर्त्रास्विष्टकृद्धर्ज्जेध्मरज्जुप्रहरणादिकर्मशेषं समाप्य॥ ततः सर्वे य
थाशाय्यं शयित्वोत्थायोदिते सूर्ये कृतनित्यक्रियाः संगम्य सौर्याणि स्वस्त्ययनानि च
जपेयुः॥ तानि च॥ उदुत्यमित्यस्य त्रयोदशर्चस्य सूक्तस्य प्रस्कण्व ऋषिः॥ सूर्यो देव
ता नव गायत्र्य अंत्याश्चतस्रोऽनुष्टुभः॥ जपे वि०॥ चित्रं देवानामिति षळृचस्य सूक्त
स्यांगिरसः कुत्सः सूर्यस्त्रिष्टुप्॥ नमो मित्रस्येति द्वादशर्चस्य सूक्तस्य सौर्योऽभित

पः सूर्यो जगती दशमी त्रिष्टुप्॥ सूर्यो नो दिवस्पात्विति पंचर्चस्य सूक्तस्य सूर्यपुत्र चक्षुः सू
र्यो गायत्री॥ आ नो भद्रा इति दशर्चस्य राहूगणो गोतमो विश्वे देवाः पंचाद्याः सप्तमी च ज
गत्यः॥ षष्ठी विराट् शेषास्त्रिष्टुभः॥ स्वस्ति नो मिमीतामिति पंचर्चस्यात्रिर्विश्वे देवा आद्या
स्त्रिष्टुभोंत्यानुष्टुभौ॥ परावत इति सप्तदशर्चस्य मानवो नाभानेदिष्ठो विश्वे देवा जगती
अंत्ये त्रिष्टुभौ॥ सर्वे जपे वि॰॥ एतानि सर्वाणि जपेयुः॥ उदु त्यं जातवेदसं॰ १३॥ चित्रं दे

वानां॰ ६॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत॥ दूरेदृशे देवजाता
य केतवे दिवस्पुत्राय सूर्याय शंसत॥ सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र त

ततनन्नहानि च॥ विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः॥ न ते अदे
वः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि॥ प्राचीनमन्यदनु वर्तते रज उदन्येन ज्यो
तिषा यासि सूर्य॥ येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना॥ तेना
स्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव॥ विश्वस्य हि प्रेषितो रक्षसि व्रत
महेळयन्नुच्चरसि स्वधा अनु॥ यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुं॥
तन्नो द्यावापृथिवी तन्न आप इंद्रः शृण्वंतु मरुतो हवं वचः॥ मा शूने भूम सूर्यस्य संदृशि
भद्रं जीवंतो जरणामशीमहि॥ ॥ विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावंतो अनमी

वा अनागसः॥उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रतिपश्येम सूर्य॥महि ज्योतिर्बिभ्र
तं त्वा विचक्षण भास्वंतं चक्षुषे चक्षुषे मयः॥आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रति
पश्येम सूर्य॥यस्य ते विश्वा भुवनानि केतुना प्रचेरते नि च विशंते अक्तुभिः॥अनागास्त्वे
नहरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि॥शन्नो भव चक्षसा शंनो अह्ना शं भानु
ना शं हिमा शं घृणेन॥यथा शमध्वं शमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रं॥अस्माकं देवा
उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे॥अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररे

श्री

पो दधातन॥यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनं॥अरावा यो नो अ

भिदुच्छुनायते तस्मिंतदेनो वसवो निधेतन॥२॥सूर्यो नो दिवस्पातु वातो अंतरिक्षात्॥अग्निर्नः पा
र्थिवेभ्यः॥जोषा सवितर्यस्य ते हरः शतं सवां अर्हति॥पाहि नो दिद्युतः पतंत्याः॥चक्षुर्नो देवः सवि
ता चक्षुर्न उत पर्वतः॥चक्षुर्धाता दधातु नः॥चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः॥संचेदं विच
पश्येम॥सुसंदृशं त्वा वयं प्रतिपश्येम सूर्य॥विपश्येम नृचक्षसः॥३॥आ नो भद्रा॰ स्वभयन्नो अस्तु॥
॥१७॥परावतो ये दिधिषंत आप्यं मनुप्रीतासो जनिमा विवस्वतः॥ययातेर्ये नहुष्यस्य बर्हिषि देवा
आसते ते अधिब्रुवंतु नः॥विश्वा हि वो नमस्यानि वंद्या नामानि देवा उत यज्ञियानि वः॥दिव्यो गये
न॥इत्यंतं वर्गत्रयं पठित्वा॥यथाशक्ति ब्राह्मणान्भोजयित्वा भूयसीं च दत्वा तैः स्वस्त्ययनं वाचये

दिति॥इतिप्रत्यवरोहणप्रयोगः॥अथपिंडपितृयज्ञः॥अथखंडपर्वणि केवलपिंडपितृयज्ञः॥अमा
वास्यायामपराह्णे औपासनाग्निं प्रज्वाल्याचम्यप्राणानायम्यदेशकालौस्मृत्वापितृतृप्तिद्वारा
श्रीप०पिंडपितृयज्ञेन यक्ष्ये इति संकल्प्याग्नेयाभिमुखोग्निंध्यात्वा॥अग्नेराग्नेयीदिशिमारभ्या
प्रदक्षिणमेवंपरिसमुह्याग्नेयाग्नेकैर्दर्भैः परिस्तीर्याग्नेरीशान्यां वायव्यां वाग्नेयाग्न्यकान्दर्भाना
स्तीर्यतथैवपर्युक्ष्यास्तीर्णदर्भेष्वेवैकैकशः पात्रासयासादयेत्॥चरुस्थालीशूर्पस्य चोलूखलमु
सलस्रुवध्रुवकृष्णाजिनसकृदाच्छिन्नबर्हिरिध्ममेक्षणं जलपूर्णकमंडलुंचेतिपात्राण्यग्नित्वा
न्येकैकश आग्नेयसंस्थान्यासाद्योत्तानानिकृत्वा कमंडलुजलेन प्रोक्ष्य चरुस्थालीं शूर्पचाद

याग्नेर्दक्षिणतस्थितंव्रीहिमयकटं दक्षिण आकृष्य शूर्पे निहितांस्थालीं व्रीहिभिरापूर्य यथास्था
लीमुखोपरिस्थाः शूर्पे पतंतितथानिम्रज्यस्थालीमुखप्रदेशितः पतितान्व्रीहीन् शकटे प्राश्या
ग्नेः पश्चिमतदेशेवायव्यग्नीवास्तीर्णेकृष्णाजिने उलूखलंनिधायतत्रस्थालीस्थान्व्रीहीन्नि
धायाग्नेयाभिमुख्यातिष्ठंत्सापत्न्यावघातितान्सकृत्फलीकृतान्विविच्यसकृत्प्रक्षालितान्जी
वतंडुलान् श्रपयित्वा चरुमुद्गुह्यास्ये वाग्नेरेकं पदीत्तमुल्मुकं गृहीत्वा अग्नेराग्नेय्यांदिशिकृते
शुचिस्थंडिले॥येरूपाणिप्रतिमुंचमाना असुरासंतः स्वधयाचरंति॥परापुरोनिपुरोयेभरंत्यग्नि
ष्टाँल्लोकात्प्रणुदात्वास्मात्॥इतिमंत्रेण निधाय पूर्ववत्परिसमूहनादिकृत्वा औपासनाग्निप्रणी

स॰ सं॰

२५४

तयोर्नंतरास्येच्चनसव्योत्तरपाणिद्वयगृहीतेन आग्नेयसंस्थामानैऋत्याभिमुखे अपहता सुरारक्षांसिवेदिषदइतिलेखामुल्लिख्यतामभ्युक्ष्यसकृत्तावछिन्नबर्हिषावस्तीर्य॥ आज्यंकृचित्वा त्रेनिषिच्यतेनैवपात्रेणाज्यंध्रुवायांनिषिच्यध्रुवाज्येनपक्वंचरुमभिघार्य अग्नेरुत्तरतोदक्षिणतोवा उद्वास्यपुनरभिघार्य अग्नेःपश्चिमदेशे आस्तीर्णबर्हिषिनिदध्यात्॥ ध्रुवांदक्षिणतआंजनाभ्यंजकौशिनकशिपूपबर्हिणानि चासादयित्वाग्निंप्रज्वाल्यप्राचीनावीतिभूत्वातमभिध्मंतुष्णीं अग्नौहुत्वास्रुवेणध्रुवाज्यंगृहीत्वाज्येनमेक्षणेउपस्तीर्यमेक्षणेन चरुंद्विरवदायस्रुवेणचरुमभिघार्यावदानंप्रत्यभिघार्य सोमायपितृमतेस्वधानमः॥ अग्नौहुत्वासोमायपितृमतइदं॰॥ पुनस्तथै

श्री

२५४

वावदायअग्नयेकव्यवाहनायस्वधानमः॥ अग्नयेकव्यवाहनायेदं॰॥ यज्ञोपवीताभूत्वामेक्षणमग्नौप्रहृत्यप्राचीनावीतीलेखां आदौमध्येअंतेचशुंधंतांपितरइत्यादिमंत्रैः उदकेनपरिषिच्यतस्यांपितृतीर्थेनततोहुतशेषेणचरुणाध्रुवाज्येत्रीन्पिंडान्कृत्वातस्यांरेखायांपराचीनपाणिःपितृतीर्थेन आग्नेयापवर्गंप्राचीनावीतीएतत्ते अस्मत्पितःअमुकशर्मन्अमुकगोत्रवसुरूपयेचत्वामत्रानु॥ एतत्ते अस्मत्पित्रे अमुकशर्मणे अमुकगोत्रायवसुरूपाययेचत्वामनुगच्छंतितेभ्यश्चअयंपिंडस्तस्मैतेस्वधानमः॥ एवंपितामहप्रपितामहादि॥ ततःपिंडान्सकृदत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिसकृत्पिंडाननुमंत्र्यसव्येन [illegible] नपार्श्वेनव्यावृत्योदङ्मुखोभूत्वा

नं३

यथाशक्ति प्राणान्नियम्याभ्यावृत्यामीमदंतपितरोयथाभागमावृषाईषतेति पुनस्तानतुमंत्र्य चरुशे
षमुपवीती सव्यघाया चम्यप्राची नावीती शुंधंतांपितर इत्यादि त्रिभिः कमंडलुं जलं निनीय अ
मुकशर्मन् अमुक गोत्र वसुरूप अभ्यंक्ष्वाएवं पितामह प्रपितामह रुद्र रूप आदित्यरूप॥ अंजनं
तैलं घृतं च दर्भेण दत्वा अंक्ष्वेति अंजनं दद्यात्॥ एतद्वः पितरो वासो मानो तो न्यत्पितरो युद्ध्वं
इति प्रतिपिंडं मंत्रावृत्या नववासो दशां पंचाशद्वर्षाधिक वर्षश्चेत्स्वकोष्ठहृदयान्यतरलोम वा
दत्वा कशिपूपबर्हिणे निवेद्य सव्येन पार्वण पूजनं कृत्वांजलिराग्नेयाभिमुखः पिंडानुपतिष्ठे
त्॥ नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः पितरः शुष्माय नमो वः पितरो घोराय नमो

वः पितरो जीवाय नमो वः पितरो रसाय स्वधा वः पितरो नमो वः पितरो नम एता युष्माकं पित
र इमा अस्माकं जीवा वो जीवद्व इह संतः स्याम॥ मनो न्वाहुवामहे नाराशंसेन सोमेन॥ पितृणां
च मन्मभिः॥ आ तएतु मनः पुनः क्रत्वे दक्षाय जीवसे॥ ज्योक् च सूर्यं दृशे॥ पुनर्नः पितरो मनो
ददातु दैव्यो जनः॥ जीवं व्रातं सचेमहि॥ इति चतसृभिः उपस्थाय॥ परेतन पितरः सोम्यासो गं
भीरेभिः पथिभिः पूर्विणेभिः॥ दत्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छते त्युद्वासये
त्॥ इति मंत्रेण पिंडानाग्नेयाभिमुखं संकृदुत्तानेन हस्तेन चालयन्॥ तत औपासनाग्निकं ग
च्छेत्॥ ॐ अग्ने तम द्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं॥ ऋध्यामा त ओहैः॥ इत्यौपासना

ग्निसमीपंगत्वा॥यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजहिंसिम॥अग्निर्मातस्मादेनसः
प्रमुंचतुदुरितायानिचकृमकरोतुमामनेहसं॥इतिमंत्रेणवायव्यदेशेस्थित्वोपविशेत्॥केचि
द्द्वाभ्यामभिमंत्राभ्यामग्न्युपस्थानमाहुः॥वीरंमेदत्तपितरइतिमध्यमंपिंडमादायसुपुत्रप्राप्त्यै
पत्न्यैप्राशयेत्॥ॐ आधत्तपितरोगर्भंकुमारंपुष्करस्रजं॥यथायमरपाअसत्॥इतिमंत्रं
पठित्वाप्राशयेदितरावप्स्वग्निप्रणीतेवाप्रक्षिप्यास्वादितानांपात्राणांयानिअवस्पृष्टानिते
षांद्वंद्वशउत्सर्गः॥शिष्टंसहहरणेनेति॥ततोपवीतीपरिस्तरणविसृज्यपूर्ववत्परिसमूहनप
र्युक्षणंकृत्वाअग्निंसंपूज्यकर्मेश्वरार्पणंकुर्यादिति॥इतिकेवलपिंडपितृयज्ञः॥अथखंड

श्री

पर्वणिव्यतिषंगेनश्राद्धंकर्त्तव्यं॥व्यतिषंगोनामपिंडपितृयज्ञदर्शश्राद्धयोःसहानुष्ठानं॥
अथपिंडपितृयज्ञव्यतिषंगप्रयोगः॥देशकालौस्मृत्वाप्राचीनावीतीदक्षिणाभिमुखोस्म
त्पितृपितामहप्रपितामहानांगोत्राणांअमुकशर्मणांवसुरुद्रादित्यस्वरूपाणांसपत्नी
कानांमस्मन्मातामहमातुःपितामहमातुःप्रपितामहानांममुकगोत्राणाममुकशर्मणांवसु
पोमधुमत्योंतरिक्षेलोकेउपदत्यतामक्षीयमाणास्स्वधानमः॥इतिद्वितीयमंत्रंजपेत्॥पुनःप्रे
तपाददेशेतृतीयंछिद्रंकृत्वा इमा आपोमधुमत्योस्वर्गेलोकेउपदत्यतामक्षीयतामाणाः स्वधा
नमः॥इतितृतीयंजपेत्॥परिक्रमणंसर्वेषांसगोत्राणांएवंत्रिःप्रदक्षिणीकृत्यप्रेतशिरो
देशेकुंभंस्फोटयित्वासव्यमावृत्यपृष्ठतोअनवेक्षमाणाकनिष्ठपूर्वइमेजीवाइतिमंत्रंक
र्तापठतेनिर्गच्छेयुः॥इमेजीवेतिसंकुशकोमृत्युस्त्रिष्टुप्॥सव्यमावृत्यागमनेवि०॥इमे

श्री
२८८

जीवाविमृतैरावरत्नंनभूद्भद्रादेवहूतिर्नोअद्य॥प्रांच्चोअगामनृतयेहसायद्राघीयआयुःप्र
तरंदधानाः॥अयंमंत्रःकर्त्तुरेव॥कपालमोक्षानंतरंसर्वेसगोत्रिणःरद्धपूर्वाःदक्षिणाभिमुखाः
सकृन्निमज्जाचम्योत्तीर्यथेनाश्मनाकुंभछिद्राणिकृतानितंतीरेनिधायापसव्येनअमुकगोत्रा
ऽमुकशर्मन्प्रेतैतत्तिलांजलिरुपतिष्ठतांमितिसगोत्रास्त्रियोपिदद्युः॥ब्रह्मचारीनदद्यात्स्ववा
हकेभ्योदेयं॥अन्येमित्रादयोपितीरेजलंदद्यादशमनियमः॥ततःकर्त्तादाहजनिततापोपश
मनार्थंवासोदकमुपभिष्ठतां॥इतिवासोदकंघोर्दत्॥ततःसर्वेअन्यानिवासांसिपरिधा
यदिनदाहेआनक्षत्रदर्शनात्रात्रिदाहेआसूर्यदर्शनात्शवस्पर्शानामप्येवंकर्तानआर्द्रव

२८९

स्त्रः॥ अद्येत्यादि० अमुगोत्रस्यामुकशर्मणेप्रेतस्यप्रेतत्वविमोक्षार्थंउत्तमलोकप्राप्त्यर्थंप्रथमदिनवि
धिंकरिष्ये॥ तान्नादिनेवभांडेपिंडार्थंहविः श्रपयित्वाऽमुकगोत्रस्याऽमुकशर्मणःप्रेतस्यप्रेतत्व
विमोक्षार्थंदाहजनिततापोपशमनार्थंमृत्तिकास्नानंकरिष्ये॥ उद्धृतामितिमृदंगृहीत्वासूर्या
यदर्शयित्वा॥ सहस्रशीर्षेतिशिरसि॥ अंगादंगादितिसर्वांगे॥ स्नात्वाचम्य॥ अमुकगोत्रस्य
प्रेतस्यदाहजनिततृषोपशमनार्थंतिलतोयांजलिमुपतिष्ठतु॥ एवंप्रत्यहंत्रयंवादद्यात्।
प्रत्यंजलिस्नानंकार्यं॥ पिंडदानंकरिष्ये॥ अमुकगोत्रस्य० प्रथमेहनिशिरोवयवनिष्पत्त्य
र्थंअयंचरुपिंडमुपतिष्ठतु॥ पिंडस्योपरितिलोदकमुपतिष्ठतु॥ अंजनाभ्यंजनमुपतिष्ठ

श्री
२८९

तु॥ नैवेद्यमुपतिष्ठतु॥ अनादिनिधनोदेवशंखचक्रगदाधर॥ अक्षय्यः पुंडरीकाक्षप्रेतमुक्तिप्रदोभव॥
इदंपिंडदानंसतिलोदकंप्रेताप्यायनमस्त्वितिवदेत्॥ पिंडमुदकेनिक्षिप्यस्नात्वाचम्य॥ अथनव
श्राद्धं॥ प्रथमेचतृतीयेह्निपंचमेसप्तमेतथा॥ नवमेकादशेचैवतन्नवश्राद्धमुच्यते॥ इतिवचनान्न
वश्राद्धेमंत्राभावः॥ आचम्यतिथ्यादिस्मृत्वा अमुकेत्यादिप्रेतस्येत्यंतमुक्त्वाप्रेतत्वविमोक्षार्थं
आद्येहनिनवश्राद्धंकरिष्ये॥ ततो अमुगौत्रैकगोत्रेत्यादिप्रेतेतिसंबुध्यंतंअयंतेक्षणमुपति
ष्ठतां॥ इतिक्षणंतथैवपाद्यं॥ आसनमर्घ्यंचदत्वा अमुकेत्यादिषष्ठ्यंतमुक्त्वानवश्राद्धे। इदमा
सनमुपतिष्ठतामित्यासनंततोदक्षिणाग्रंकुशंएकंनुध्वत्वा॥ तत्रैकमर्घ्यपात्रमासाद्यतत्रैकंप

५५८

२९०

वित्रं क्षिप्त्वामुकेत्यादि संबुध्यंतं प्रेतेत्येवंतमुक्त्वा नवश्राद्धे इदमर्घ्यं तवोपतिष्ठतां ॥ इत्यर्घ्यं दत्वा ॥ ततो
घृतादिक्तमामदायामुकगोत्रामुकप्रेतायस्वधानमइत्येकामाहुतिं जुहुयाद्द्विजपाणौ इदमन्नौ
करणं केचिदिदं नेच्छंति ॥ ततः आमं द्विजाग्रे निधाय ॐ विष्णो आमं इदं रक्षस्वेति स्पृष्ट्वा तत्सीपा
त्रमालभ्या अमुकगोत्रेत्यादि अमुकप्रेताय इदमामं दास्यमानं वा यथाशक्ति सोपस्करं सद
क्षिणमुपतिष्ठतां इति सकुशं तिलोदकं दद्यात् ॥ ततो नामगोत्रादि चतुर्थ्यंतमुक्त्वा आहविष
मश्राद्धे अयं सक्तुपिंडमुपतिष्ठतामिति पिंडं दत्वा तिलोदकं दत्वा तूष्णीं विकिरं दत्वा अना
दिनिधनो देवेति श्लोकमेकं पठित्वा अभिरम्यतामिति उक्त्वा ॥ अभिरताःस्मेति प्रयुक्तः ॥॥

श्री
३९६

पिंडं प्रवाह्य ॥ ततः आचम्य प्राणानायम्य अद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिरत्यर्थं
नग्नप्रच्छादनश्राद्धं करिष्ये ॥ क्षणपाद्यादि पूर्ववत् ॥ ततः स्नात्वा चम्य अद्येत्यादि अमुगोत्रस्य अ
मुकप्रेतस्य मनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धं करिष्ये ॥ क्षणपाद्यापूर्वतं ।दि पूर्ववत् ॥
स्नात्वा चम्य तिथ्यादि संकीर्त्य ॥ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवास्यर्थं अस्थिसंचयनं
करिष्ये ॥ शमीशाखया क्षीरोदकेनापसव्यं त्रिपरिक्रमन् श्मशानदेशं प्रोक्षयेत् ॥ शीतिकेतिद
मनोग्निस्त्रिष्टुप् ॥ अस्थिप्रोक्षणे वि० ॥ ॐ शीतिके शीतिकावति ह्लादिके ह्लादिकावति ॥ मडु
क्या ३ सुसंगमइमंस्वा ३ ग्निं हर्षय इति प्रोक्षयेत् ॥ अंगुष्ठोपकनिष्ठाभ्यां गृहीत्वा एकैकमे

स्थिं पादप्रभृतिशिरःपर्यंतं नवे कुंभे निदध्युः ॥ स्त्रियाः कुम्भ्यां ॥ उपसर्पेति संकुशकः पृथिवी त्रि
ष्टुप् ॥ अस्थिकुंभस्य गर्तक्षेपणे वि० ॥ उपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां ॥ उ
र्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥ अनेन घटं गर्ते दध्यात् ॥ उच्छ्वंचस्वे
ति संकुसुकः शाक्यो मृत्युः प्रस्तारपंक्तिः ॥ पांसुक्षेपे वि० ॥ उच्छ्वंचस्व पृथिवि मा नि बाधथाः सू
पायनास्मै भव सूपवंचना ॥ माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥ अनेन खातं मृदं क्षिपेत् ॥ श्री
उच्छ्वंचमाने संकुसुकः पृथिवी मृत्युर्जगती ॥ अस्थिसंमीते जपे वि० ॥ उच्छ्वंचमाना पृथि
वी सु तिष्ठतु सहस्रं मित उप हि श्रयंतां ॥ ते गृहासो घृतश्चुतो भवंतु विश्वाहास्मै शरणाः २०१

संत्वत्र ॥ इति मंत्रं जपेत् ॥ उत्ते स्तभ्नामीति संकुसुकः पृथिवी मृत्युस्त्रिष्टुप् ॥ कपालेन घट
स्यापिधाने वि० ॥ उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोकं निदधन्मो अहं रिषं ॥ एतां स्थूणां पितरो
धारयंतु तेऽत्रा यमः सादना ते मिनोतु ॥ ततः यथा कुंभो न दृश्यते तथा मृदं निधाय नवेक्षमा
णः स्नायात् ॥ ततो गोमयेन श्मशानदेशमुपलिप्य तत्र त्रिकोणवेदिं जलपूर्णकुंभं तदुपरि म
हांतं सक्तुपिंडं च स्थापयित्वा अद्येत्यादि अमुकगोत्रायामुकप्रेताय भोजनार्थमयं पिंडं च
स्थापयित्वा ॥ अद्येत्यादि अमुकगोत्रायामुकप्रेताय भोजनार्थमयं पिंडं च स्थापयित्वा ॥ अ
द्येत्यादि अमुकगोत्रायामुकप्रेताय भोजनार्थमयं पिंडः पानार्थं चेदं कुंभोदकं उपतिष्ठतां

इति जलं क्षिपेत्॥ तत्पश्चिमभागे श्मशानवासिनेभ्यः छायायं पिंड उपतिष्ठतां इति दद्यात्॥ श्मशानवा
सिभ्यः प्रेतेभ्यो यं पिंड उपतिष्ठतामित्युत्तरतः॥ पिंडांतरं ततः क्रमेण अमुकस्मै तिलोदकमुप
तिं०॥ इति दद्यात्॥ कालाय दहनपतये मृत्यवे दहनपतये यमाय दहनपतये पोलिकात्रयं पा
डुकाषट्कं चत्रेत्र यं उपतिष्ठतां॥ ततो यमश्राद्धमिदमुपतिष्ठतामिति पोलिकादि दत्वा स्नायात्॥
ततो अमुकस्य प्रेतत्वनिवृत्त्यर्थं अस्थिसंचयनश्राद्धं करिष्ये॥ मंडलं कृत्वा दक्षिणाग्रदर्भ
शिखायां क्षणपाद्यादि पूर्ववत्॥ अथ द्वितीयदिनकृत्यं॥ पूर्वदिनकृत्यदेशं गत्वा॥ अमुक
गोत्रस्यामुकप्रेतत्वनिवृत्त्यर्थं द्वितीयदिनविधिं करिष्ये॥ प्रत्यहं पूर्ववन्मृत्तिकादिस्नानं

श्री

३००२

कृत्वा॥ श्मोपक्षिप्य प्रत्यहं तोयांजलित्रयं दद्यात्॥ हविः श्रपयित्वा॥ अद्येत्यादि अमुकप्रेत चक्षुःश्रोत्र
नासावयवनिष्पत्त्यर्थं अयं पिंड उपतिष्ठतां इति पिंडं दत्वा तिलोदके अंजनाभ्यंजनं॥ अनादिनि०
पिंडप्रवाहस्नानं॥ सर्व एवं पूर्वदिनेषु॥ अवयवोच्चारणे विशेषः॥ तृतीये भुजवक्षो ग्रीवामुखा
वयवानि०॥ नवश्राद्धं च॥ चतुर्थे पार्श्वकुक्षिकटिनाभिगुदलिंगाव०॥ पंचमे ऊरूजानूजंघाव०॥
षष्ठे गुल्फपादांगुलिमर्माद्यवयव०॥ सप्तमे अस्थिमज्जाशिरोवयव०॥ नवश्राद्धं च॥ अष्टमे न
खलोमावयव०॥ नवमे वीर्यादि सर्वाव०॥ नवश्राद्धं च॥ दशमे क्षुत्पिपासानिवृत्त्यर्थं अयं चरुपिं
ड उपतिष्ठतां॥ अन्यत्सर्ववत्॥ ततो मृदा त्रिकोणां वेदिं कृत्वा गोमयेन संमृज्य हरिद्रयालंकृत्य

३००३

तत्रकुंभपंचकंजलपूर्णंस्थापयेत्॥तदुपरिओदनपिंडाश्च अमुकगोत्रायामुकशर्मणेप्रेतायक्षु
त्पिपासानिवृत्त्यर्थंअयंपिंडःसोदकुंभोमुपतिष्ठतां॥इतिमध्यस्थंनिवेदयेत्॥प्रेतसखिभ्यइ
तिपूर्वस्थं॥वैवस्वताययमायेतिदक्षिणस्थं॥वायसेभ्यइतिपश्चिमस्थं॥प्रेताधिपतयेरुद्रायेे
त्युत्तरस्थं॥पिंडोपरितिलोदकंदत्वापादुकाछत्रपताकादिपोलिकादिप्रत्येकंतेभ्यस्तेभ्यःउप

प३

तिष्ठतांमितिदद्यात्॥ततःपश्चिमदेशस्थंवांसोयावद्दूरस्तयतितावत्तिष्ठेत्॥ततोश्मानंतैलेना
भ्यज्यजलेक्षिपेत्॥प्रेतस्यप्रेतत्वविमुक्तोत्तमलोकप्राप्त्यर्थंदशदानानिकरिष्ये॥गोभूति
लहिरण्याज्यवासोधान्यंगुडानिच॥रौप्यंलवणमित्याहुर्दशदानाप्रकीर्तिताः॥सर्वेवांध

श्री

३००३

वासंवंधिनश्चत्रीस्त्रीधर्मोदकांजलीनेकैकंवाप्रेतोद्देशेनजलेनीरेदधुः॥ततःपुत्रादीनांयथा
चारंवपनंकृप्तलानितिलामलकादिस्नात्वाशुक्लवासस्सोगृहंगत्वासुहृद्भिःसुखीभुंजीरन्॥इति
दशाहकृत्यं॥एकादशेहनिपक्वानांभांडानांत्यागः॥गृहानुलेपनंसर्वेषांसपिंडानांसचेलस्ना
नंपंचगव्यप्राशनं॥ततोवृषोत्सर्गंकुर्यात्॥एकादशेह्निप्रेतस्ययस्यनोत्सृज्यतेवृषः॥प्रेतत्वं
सुस्थिरंतस्यदत्तैश्राद्धशतैरपि॥अत्रनाचार्यवर्णनं॥देशकालौस्मृत्वाअमुकगोत्रस्यामुक
प्रेतस्यप्रेतत्वविमुक्त्योत्तमलोकप्राप्त्यर्थंवृषोत्सर्गंकरिष्ये॥तदंगमग्निप्रतिष्ठापनंचकरिष्ये॥
अग्निंप्रतिष्ठाप्यअन्वाधानंकुर्यात्॥अस्मिनंन्वाहितेत्यादिआज्यभागांतमुक्त्वाअत्रप्रधा

३०४

नं॥ रुद्रं वरुणा सोमं पायसेन॥ इंद्रं पावकेन शेषेण स्विष्टकृतमित्यादि परिसमूहनादि पूर्णपात्रनि
धानांतं कृत्वा निर्वापादिक्रमेण हविस्त्रयं संपाद्य जुहुयात्॥ कद्रुद्रायेति प्रस्कण्वो रुद्रो गायत्री॥ रौ
द्रचरुहोमे वि०॥ कद्रुद्राय प्रचेतसे० स्वाहा॥ रुद्रायेदं०॥ सोमो धेनुं गोतमः सोमस्त्रिष्टुप्॥ सौम्यपाय
सहोमे वि०॥ सोमो धेनुं० स्वा० सोमायेदं०॥ इंद्रं वो मधुच्छंदा इंद्रो गायत्री॥ ऐंद्रपावकहोमे वि०॥ इं
द्रं वो विश्वत० स्वा० इंद्रायेदं०॥ ततः स्विष्टकृदादि मार्जनांतं कुर्यात्॥ केचिन्नाममंत्रेण होममाहुः॥

श्री

लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः॥ श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥ ततश्च तस्य
एकां वा एकवर्षाधिकां वत्सरीमानीय गोसहितवृषस्य मंत्रैरभिषेकः॥ कार्यः॥ आपो हिष्ठेति त्र

३०४

स्य सिंधुद्वीप आपो जगती॥ वत्सतर्यभिषेके वि०॥ आपो हिष्ठा० ३ कया न इति तिसृणां गोतमो वामदे
व इंद्रो गायत्री॥ वत्सतर्य०॥ कया न० कस्त्वा सत्यो० अभी षु णः०॥ वृषं वत्सतरीं च वस्त्रगंधादिभिः अ
लंकृत्य॥ ऋषभमिति सूक्तस्य वैराजः शाक्वर ऋषभो देवता॥ अनुष्टुप् छंदः॥ अंत्या महापंक्तिः॥ ऋ
षभस्थाने वि०॥ ऋषभं मा समानानां सपत्नानां विषासहिं॥ हंतारं शत्रूणां कृधि विराजं गोपतिं गवां॥
अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः॥ अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः॥ अत्रैव वोपि न
ह्याम्युभे आर्त्नी इव ज्यया॥ वाचस्पते नि षेधेमान्यथा मदधरं वदान्॥ अभिभूरहमागमं विश्वकर्मेण
धाम्ना॥ आ वश्चित्तमा वो व्रतमा वो हं समितिं ददे॥ योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्द्धा

नमस्कृमीम॥ अधस्पदान्मउद्धदतमंडूकाद्वोदकान्मंडूकाउदकादिव॥ततोवृषंप्रदक्षिणमग्निपूर्वमा
नीयास्यदक्षिणबाहुंस्थचिन्हभस्मनात्रिशूलाकारंवामेचक्राकारमंकयित्वातदुपरितप्तलोहेनां
कारयेत्॥ततःप्रांचमुत्सृजेत्॥व्रजंतमनुमंत्रयेत्॥एकंयुवानंपरिवोददामितेनक्रीडंतीश्चरति
प्रियेण॥मानःसाम्रजनुषासुभागारायस्पोषेणसमिषामदेम॥शंतापृथिवी०सर्वतोव्रजेस्वेति
ब्रूयात्॥ततोवृषंपूर्वाभिमुखंकृत्वा॥कद्रुद्रायेतिनवर्चस्यघोरःकण्वोनिर्ऋतिर्गायत्री॥पूर्वदिगु
पस्थानेवि०॥कद्रुद्राय०१यथानोअदि०२यथानोमित्रो०३गाथपतिं०४यःशुक्रइवसू०५
शंनःकरत्यर्वते०६अस्मेसोम०७मानःसोम०८यास्तेप्रजा०९भोवृषराजगोभिःसहज

श्री
३००५

लंपिबतृणंभक्षयथासुखंक्रीडस्वेतिवदेत्॥ततोदक्षिणाभिमुखंकृत्वा॥इमारुद्रायेतवसइत्येकाद
शर्चस्यसूक्तस्यकुत्सोरुद्रोजगतीअंत्येद्वेत्रिष्टुभौ॥दक्षिणाभिमुखंदिगु०॥इमारुद्रायतवसे०१॥
मृळानोरुद्रो०२॥अश्यामतेसुमतिं०३॥त्वेषंवयंरुद्रं०४॥दिवोवराहमरुषं०५॥इदंपित्रेमरुतां०६॥
मानोमहांतमुत०७॥मानस्तोके०८॥उपतेस्तोमान्०९॥आरेतेगोघ्नमुत०१०॥अवोचामनमो०११
गोभिःसहजलंपिबतृणंभक्षेतिपूर्ववत्॥ततःपश्चिमाभिमुखंकृत्वा॥आतेपितरितिपंचदशर्च
स्यसूक्तस्यगृत्समदोरुद्रस्त्रिष्टुप्॥पश्चिमदिगुपस्थानेवि०॥आतेपितर्मरुतां०१॥त्वादत्तेभी
रुद्रशंतमेभिः०२॥श्रेष्ठोजातस्य०३॥मात्वारुद्रचुक्रुधा०४॥हवीमभिर्हवते०५॥उन्मामंमंदर

षभो० ६ ॥ कु १ स्यते रुद्र० ७ ॥ प्रबभ्रवे वृष० ८ ॥ स्थिरेभिरंगैः० ९ ॥ अर्हन्बिभर्षि० १० ॥ स्तुहि श्रुतं० ११ ॥
कुमारश्चित्पितरं० १२ ॥ या वो भेषजा० १३ ॥ परिणो हेती रुद्रस्य० १४ ॥ एवा बभ्रो वृषभ० १५ ॥ अ
पांते गोभिरित्यादि पूर्ववत् ॥ ततो उदङ्मुखं कृत्वा ॥ इमा रुद्रायेति चतस्रो रुद्रो जगती ॥ अंत्ये द्वे
त्रिष्टुप् ॥ उत्तरादिगुपस्था० ॥ इमा रुद्राय स्थिरधन्वने० १ ॥ स हि क्षयेण० २ ॥ या ते दिद्यु० ३ ॥ मा
नो वधी रुद्र० ४ ॥ अपां ते गोभिरित्यादि पूर्ववत् ॥ ततः पुष्पे प्रेतस्य गोत्राद्युच्चार्य तर्पणं कुर्यात् ॥
केचित् धेनावत्सतरी वा श्रिव पूजितादि कुर्यात् ॥ ततो रुद्र सोमेंद्रेभ्य आज्य त्रयं सदक्षिणं दद्यात् ॥
ततो वृषोत्सर्ग संपूर्णतासिद्ध्यर्थं तिलान् उदकुंभं गां वासो हिरण्यं च यथाशक्त्या दक्षिणा ॥

श्री
उ० ६

पतिपुत्रवत्याः सुवासिन्या न वृषोत्सर्गः ॥ तत्स्थाने एका पयस्विनी गौर्देया ॥ इति वृषोत्सर्गवि
धिः ॥ ततो महैकोद्दिष्टं तस्मिन्नेवाहन्येकं ब्राह्मणं निमंत्र्य अद्येत्यादि अमुकप्रेतस्य प्रेतत्वनिर
सोत्तमलोकप्राप्तये एकादशाहे महैकोद्दिष्टं करिष्ये ॥ द्विजाभावे लौकिकाग्निं प्रतिष्ठाप्य अग्ना
वेकोद्दिष्टं श्राद्धं करिष्ये ॥ क्षणास्तु नांतं कृत्वा तत्रार्घे दक्षिणाग्रकुशोपरि एकमर्घ्यपात्रमा
साद्य तत्रैकं पवित्रं जलं च क्षिप्त्वा ॥ तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः ॥ प्रत्नवद्भिः प्र
त्तः स्वधया पितॄनिमाँल्लोकान्प्रीणयाहि नः इति मंत्रेण तूष्णीं वा तिलान्क्षिप्त्वा अमुकगोत्रा
यामुकशर्मणे प्रेतायायं स्वाहेति हस्ते एकाम्राहुतिं हुत्वा तदंते अन्नेन शिष्येत ॥ नवपाणिहोमः

मुकप्रेतमहैकोद्दिष्टइदमर्घ्यंतवोपा [illegible] ताभिसर्घ्यंदत्वापात्रे घृतात्कंसिद्धान्नमादाया
मुकगोत्रायामुकशर्मणेप्रेतायस्व [illegible] त्तिर्हस्तेएकामाहुतिंहुत्वातदंनं अग्नौक्षिपेत्॥न
वापाणिहोमः॥अग्निपक्षेपूर्वव [illegible] ।दक्षिणादि अर्घ्यांते अग्निसमीपेद [illegible] त्॥अमु
कगोत्रायेत्यादिप्रेतायस्वाहेति [illegible] नावेकाहुतिर्होमः॥इति॥असमीपेपरिवेषणा
दि अंगुष्ठनिवेशनांतंकृत्वा अमु [illegible] गोत्रायामुकप्रेतायेदंमन्नंयथाशक्तिसोपस्क
रंमम्रुतरूपमुपतिष्ठतामितिसं [illegible] स्याविप्रोशनादिदद्यात्॥अग्निप [illegible] क्षेपरिवे
षणाद्यापोशनांतंकृत्वा॥उदीर [illegible] षष्टभिर्मंत्रैप्रणवाद्यैस्वाहाकारांतैश्चतुर्वारा

श्री
३०७

हत्वाष्टत्रिंशदाहुतीश्चासमिनाःसोप [illegible] शान्नस्यजुहुयात्॥इदंनममेतिवर्जयेत्॥उदीरतांम०१
स्वा०इदंपितृभ्यो०स्वा०१आहंपितॄन् [illegible] वित्रां अविवित्सिनपातंचविक्रमणंचविष्णोः॥वर्हिषदो
येस्वधयासुतस्यभजंतिपित्वःस्तइ [illegible] गमिष्ठास्वा०॥वर्हिषदःपितरऊत्या१गिमावोहव्या
चकृमाजुषध्वं॥नआगतावसाशंतमे [illegible] थानःशंयोररपोदधातस्वा०॥उपहूताःपितरःसोम्या
सोवर्हिष्येषुनिधिषुप्रियेषु॥तआग [illegible] सइहश्रुवंत्वधिब्रुवंतुतेवंत्वस्मान्॥आच्याजानु
दक्षिणतोनिषद्येमंयज्ञमभिगृणीत [illegible] म्वे॥माहिंसिष्टपितरःकेनचिन्नोयद्वआगःपुरुषता
करामस्वा०॥आसीनासोअरुणीन [illegible] उपस्थेरयिंधत्तदाशुषेमर्त्याय॥पुत्रेभ्यःपितरस्तस्यव

स्वः प्रयच्छन्तत्वइहोर्जंदधातस्वा ०॥ येनः पूर्वेपितरः सोम्यासोनूहिरे सोमपीथंवसिष्ठाः॥ तेभिर्य
मः संरराणोहवींष्युशंनुशद्भिः प्रतिकामम्नत्तुस्वा ०॥ एवंषट्त्रिंशद्द्वात्रिंशदाहुतीर्हुत्वाउच्छिष्ट
पिंडोनदेयः॥ ततः दर्भशिरवायांममुकगोत्रायामुकप्रेतायमहेकोद्दिष्टश्राद्धे अयंपिंडउपति
ष्ठभोइतिपिंडंदद्यात्॥ तिलोदकं॥ अनादि ०॥ अभिरम्यतांविसर्जनं॥ अभिरतास्महेति
प्रतिवचनं॥ स्नात्वाचम्यदेशकालौस्मृत्वा अमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्यर्थंरुद्र
गणश्राद्धंकरिष्ये॥ अजैकपाद्रूपिणे अमुकप्रेतायक्षणमुपतिष्ठतु॥ एकब्राह्मणायचतु॥
अजैकपात्॥१॥ अहिर्बुध्न्य॥२॥ कपाली॥३॥ रुद्र॥४॥ कपाली॥५॥ शंभू॥६॥ कप

श्री
३०८

र्द्दी॥७॥ रैवत॥८॥ र्हं॥९॥ बहुरूप॥१०॥ त्र्यंबक॥११॥ एतद्रूपीपराजितः॥ एतद्रूपिणे अ
मुकगोत्रायक्षणमुपतिष्ठतां॥ एवंपाद्यार्घ्यासनादिदद्यात् आमंयथाशक्तिसोपस्करंउपतिष्ठ
तां॥ अभिरम्यतामितिस्थलं॥ अत्रपिंडाद्यग्नौकरणाभावः॥ अथवसुगणश्राद्धंइदंवृ
ताकृतं॥ भिन्नब्राह्मणपक्षेध्रुवरूपिणे अमुकप्रेतायक्षणमुपतिष्ठतु॥ एकब्राह्मण
पक्षेध्रुवः १ अध्वरः २ सोमः ३ आपः ४ अनिलः ५ नलः ६ प्रत्यूषः ७ प्रभासः ८ एत
द्रूपिणेप्रेतायक्षणमुपतिष्ठतु॥ अन्यत्रुद्रगणश्राद्धवत्॥ इत्येकादशाहकृत्यं॥ अ
थषोडशश्राद्धानि॥ आद्यमासिक १ ऊनमासिक २ द्वितीय ३ त्रैपक्षिक ४ तृतीय ५

चतुर्थमा ६ पंचममा ७ षण्मासि ८ ऊनषाण्मासि ९ सप्तम १० अष्टम ११ नवममा १२ दशममा १३ ए
कादश १४ द्वादश १५ ऊनाब्दिक १६ ॥ मध्ये कश्चिदधिकमासस्तदा तन्मासिकं द्विवारं कार्यं ॥ ए
वं सप्तदश श्राद्धानि भवंति ॥ अथ प्रयोगः ॥ तस्मिन्नेवाहनि षोडश ब्राह्मणान्निमंत्र्य षोडश
पाकानि अशक्तौ ओदनभेदं कृत्वा श्राद्धमुपक्रमेत् ॥ अत्यशक्तौ आमान्नेन वा कुर्यात् ॥ दे
शकालौ स्मृत्वा ॥ अद्येत्यादि अमुगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्त्योत्तमलोकप्राप्त्यर्थं आ
द्यमासिकऊनाब्दिकांतमुक्तो एतानि षोडश श्राद्धानि स्वस्वकाले कर्तव्यानि द्वादशाहे स

श्री
३०९

पिंडीकरणाधिकारार्थं अपकृष्यैकादशेऽह्नि अन्नेनामान्नेन वा एकोद्दिष्टविधिनानंत्रे

णकरिष्ये ॥ अमुकप्रेतस्याद्यमासिके क्षणः क्रियतां एवं द्वितीयमासिके त्यादि षोडशस्थाने
षु क्षणं दत्वा अमुकगोत्रामुकप्रेता आद्यमासिके द्वितीये त्यादि इदं ते पाद्यं उपतिष्ठतां प्रत्ये
कं षोडशेभ्यो दद्यात् ॥ अन्यत्सर्वं एकोद्दिष्टवत् ॥ अमापक्षे आमान्नस्य संकल्पः सक्तु
पिंडेन च पिंडदानं ॥ अथ सपिंडीकरणं ॥ तत्र देशकालौ स्मृत्वा अमुकशर्मणः प्रेतस्य प्रेत
त्वनिवृत्त्या पितृलोकप्राप्त्यर्थं गोत्रैः शर्मभिः वसुरुद्रादित्यस्वरूपैस्तत्पितृ पितामहप्र
पितामहैः सह सपिंडीकरणं तत्राहादशाहे पार्वणैकोद्दिष्टविधानेनैक रिष्ये ॥ मातुः
सपिंडीकरणे अमुकगोत्राया ऽमुकदाया अस्मन्मातुः अस्मत्पितामही अस्मत्प्रपि

नामहीरुद्रप्रपितामहीरितिशेषः॥ एवंश्राद्धादिसपिंडीकरणेज्ञेयं॥ ततः कामकालकसंज्ञ
कविश्वेदेवस्थानेक्षणंदत्वाभवद्भिः प्रसादः कर्त्तव्यः॥ प्रेतस्थानेक्षणमुपविष्ठतु॥ प्रेतस्य
पितृपितामहप्रपितामहस्थानेक्षणंदत्वाभवद्भिः प्रसादः कर्त्तव्यः॥ इतिक्षणंदत्वामंड
लत्रयंकुर्यात्॥ उत्तरेवैश्वदेवमंडलंचतुष्कोणंदक्षिणेप्रेतमंडलंत्रिकोणं॥ ततोपिदक्षि
णेपितामहादिमंडलंवर्त्तुलंकामकालकसंज्ञकविश्वेदेवाइदंवः पाद्यंइतिविश्वेदेव
मंडलेसव्येनपार्वणवत्पाद्यंदत्वाअमुगोत्रामुकशर्मन्नेतत्पितृरित्यादिक्रमेणमंडले
त्रिभ्यः पाद्यंदद्यात्॥ कर्त्तापादौप्रक्षाल्यद्विराचम्योपक्रांतंसपिंडीकरणंश्राद्धंकरिष्ये॥

श्री
३१०

अपहतासुरारक्षांसीत्युक्त्वा कामकालसंज्ञकानांविश्वेषांदेवानांइदमासनमितिदत्वाअ
मुकगोत्रायामुकप्रेतायेदमासनमुपतिष्ठताभितिदत्वाअमुकगोत्रायेत्यादितत्पित्रेतत्पिता
महायतत्पितामहायेत्यादिक्रमेणप्रेतपूर्वभागेउदङ्मुखेभ्यः त्रिभ्यआसनंदद्यात्॥ तिला
न्विकीर्यार्घ्यएकपात्रमासाद्यतत्पूर्वतः पात्रत्रयमासाद्यप्रेतपात्रेचतुःकुशकूर्चंनिधा
यपात्रांतरेत्रिकुशंनिधायापआसिंच्यप्रेतपात्रेमेहेकोद्दिष्टवत्तिलोसीतिमंत्रेणतूष्णींवा
तिलान्क्षिप्त्वापितृपात्रेषुयथापठितेनतान्क्षिप्त्वागंधपुष्पाणिसर्वत्रक्षिप्त्वापितृपात्रा
णिशन्नोदेवीत्यभिमंत्र्यपितृपात्राणिसंपन्नानीत्यादिपृथ्वास्वधाअर्घ्याइतिनिवेदये

त्॥ततः प्रेतपात्रस्यामेकं पवित्रं प्रेतस्थानीयब्राह्मणहस्ते दत्वा तत्पात्रस्थमुदकं किंचिद्गृहीत्वाऽ
मुकगोत्रामुकशर्मन्प्रेतेदं ते अर्घ्यमुपतिष्ठतां इत्यर्घ्यं दत्वामुकगोत्रामुकप्रेतपात्रोदकममु
कगोत्राणां अमुकशर्मणो प्रेतपितृपितामहप्रपितामहानां अर्घ्यपात्रेण संयोजयिष्ये इति
पृष्टे संयोजयेति ब्राह्मणैरुक्ते प्रेतपात्रस्थं कुशत्रयं पितृपात्रत्रये दत्वा प्रेतार्घ्यपात्रजलं व
क्ष्यमाणमंत्रैः किंचित्किंचित्संयोजयेत्॥मंत्रास्तु॥ये समानाः समनसः पितरो यमराज्ये॥
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां॥ये सजाताः समनसो जीवा जीवेषु मामकाः॥
तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः॥संगच्छध्वं संवदध्वं संवो मनांसि जानतां॥देवा

श्री

३११

भागं यथा पूर्वे संजानाना उपासते॥समानो मंत्रः समितिः समानी समानं मनः सहचित्तमेषां॥
समानं मंत्रमभिमंत्रये वः समानेन वो हविषा जुहोमि॥समानी व आकूतिः समाना हृदया
नि वः॥समानमस्तु वो मनो यथा वः सुसहासति॥मधुवाता इति त्र्यृचमपि पठेत्केचित्॥अमुक
गोत्रामुकशर्मन् प्रेतामुकगोत्रैरमुकशर्मभिः पितृपितामहप्रपितामहैः सह सायुज्यं गच्छ
स्वेत्युक्त्वानंतरं पित्रादिपात्रोदकेन पार्वणवत्तेभ्योप्यर्घ्यं दत्वा गंधादि दद्यात्॥प्रेते द्विगुणं॥त
तः अग्नौकरणं द्वयं कार्यं भोजनादन्नात् किंचित्किंचिदन्नं सघृतं गृहीत्वा गोत्राय स्वोताय
स्वाहा॥इत्येकाहुतिं प्रेतब्राह्मणकरे हुत्वा प्रेतस्थाना हुत्यन्नं वह्नौ प्रक्षिपेत्॥प्रेतस्थानेन

वापाणिहोमः॥पित्रेहुतमन्नंपरिविष्टान्नेनसहभुंजीत॥पञ्चपाणितलेदत्तंयच्चान्यदुपकल्पि
तंएकीभावेनभोक्तव्यंपृथग्भावोनविद्यते॥इतिवचनात्॥ततोन्नंपरिविष्यदैवेपृथिवीतेपात्र
मित्यादिकामकालसंज्ञकेभ्योविश्वेभ्योदेवेभ्यइदमन्नंइत्यादिपार्वणवत्॥ततःप्रेतपात्रेपृ
थिवीतेपात्रमित्यादिगोत्रशर्मन्प्रेतोदेवतेतिविशेषः॥ततःगोत्रायशर्मणेप्रेतायेदमन्नंउ
पतिष्ठतां॥इतिप्रेतस्थानेसंकल्पः॥पित्रादिस्थानत्रयेपार्वणवत्॥भोजनांतेउच्छिष्टपिंडोदे
यः॥ततःपिंडदानंउच्छिष्टसमीपेप्रोक्ष्योल्लिख्यापहतेत्युभ्युक्ष्यदर्भैरवस्तीर्यगोत्रायप्रेताया
यंतेपिंडमुपतिष्ठतामित्येकंपिंडंप्रेतोद्देशेनदत्वातद्दक्षिणतःपंक्तिरूपेणपार्वणवत्पित्रादि

श्री

३१२

भ्यःपिंडत्रयंदद्यात्॥ततःप्रेतस्थानेतूष्णींजलंदत्वाप्रेतस्यपद्दत्तंश्राद्धंतदक्षय्यमुपतिष्ठतु॥इत्यु
क्त्वाविशिष्टदक्षिणांदत्वाभिरम्यतामितिविसर्जयेत्॥स्वैहेववादक्षिणाविसर्जनेभवंतोंते॥ततो
अमुकगोत्रस्यामुकप्रेतस्यपिंडंपित्रादिपिंडैःसहसंयोजयिष्येतिपृष्ट्वासंयोजयेतिद्विजैः
प्रत्युक्तेमधुवाताइतित्र्चेनप्रेतपिंडंत्रेधाविभज्यावयवत्रयंत्रिषुयोजयेदेभिर्मंत्रैः॥येसमाना॰॥
येसजाता॰॥संगच्छध्वं॰॥समानोमंत्र॰॥समानीव॰॥ततोमुकगोत्रामुकप्रेतअमुकगोत्रेणा
मुकशर्मणास्वपित्रासंसृजस्वेतिवदन्॥प्रेतपिंडंप्रथमभागंतत्पितृपिंडेसंयोज्यदधिमधुभ्यां
मिश्रीकुर्यात्॥एवंमधुवानेतित्र्चमुक्त्वामुकगोत्रामुकशर्मन्प्रेतामुकगोत्रेणामुकशर्मणास्व

पितामहेन संसृजस्वेति वदन्॥ प्रेतपिंडे द्वितीयभागं प्रेतपितामहपिंडे संयोज्य दधिमधुभ्यां मिश्री
कुर्यात्॥ एवमेव वदन्॥ प्रेतपिंडतृतीयभागं प्रेतप्रपितामहपिंडे संयोजयेत्॥ दधिमधुभ्यां
मिश्रीकुर्यात्॥ एवं मात्रादिसापिंड्येपि पितामह्यादिपिंडत्रये संयोजयेत्॥ प्रेतपिंडसंयोज
नं येसमाने सादिनामारत्नि॥ केचित्प्रेतपिंडावयवत्रयेण संयोगं त्रीन्पिंडानिदानीं तन
मतमारभ्य पुरुषत्रयस्य पार्वणवत्पुनरपि नामगोत्राद्युच्चार्य दद्यात्याहुः॥ ततः अत्र पितरो
मादयध्वमित्यादि सर्वं पार्वणवत्॥ द्वादशांतं धारितमुत्तरीयं पिंडोपरि दद्यात्॥ तत्राचार्यो गृ
ह्णीयात्॥ अवयवपिंडान्नपाकस्थाली चाचार्याय देया॥ ततः एषवोनुगतः प्रेतपितृभागम

श्री
३१३

वास्तवान्॥ शुभं भवतु शेषाणां जायतां चिरजीविनी॥ इति मंत्रं पठेत्॥ ततो विकिरद्वयं दद्या
त्॥ शिवाः पः संत्वित्यादि सर्वं पार्वणवत्॥ प्रेतस्थानीयविप्रायोत्तरेभ्यो द्विगुणां दक्षिणां दत्वा॥
वाजे वाजे इत्यादि अभिरम्यतामिति विसर्जयेत्॥ आसीमांतमनुव्रज्य पिंडानां गंगादौ प्रक्षि
प्य स्नात्वा गृहमागत्य यथाचारं श्राद्धान्नं शेषं अन्यद्वा इष्टैः सह भुंजीत॥ श्राद्धभोजिनोपि
सचैलं स्नानं कुर्युः॥ अत्र श्राद्धभोक्तॄणां मिथः स्पर्शे तदन्नमत्यजन् द्रुपदागायत्र्यष्टशतं ज
पेत्॥ उच्छिष्टे शिक्ते तत्प्रक्षाल्य द्विगुणं जपेत्॥ उच्छिष्टभोजिने सह स्वं जपेत्॥ इदं मातुः सपिं
डीकरणं सहगमने भर्त्रा वैकेन तदादिभिर्वा उभयथा ब्राह्मणाः सत्यतदभावे पितामह्यादि

भिरित्यादिभिः सहैवपत्न्याप्यतमातृकेनमात्रादिभिसह अमृतमातृकेनतुपितामह्यादिभिरि
त्यादि सर्वंनिर्णयावसरेवक्ष्यामः ॥ इतिसपिंडीकरणं ॥ अथद्वादशाहेत्रयोदशेवाह्निस्नात्वा
देशकालौस्मृत्वामुकगोत्रस्यामुकशर्मणः प्रेतलोकात्पितृलोकगमनार्थं अमोघाणाममुक
शर्मणामस्मत्पितृपितामहप्रपितामहानां वसुरुद्रादित्यस्वरूपाणांपाथेयश्राद्धं सदैवंसपिं
डं करिष्ये ॥ पाद्यार्घादि सर्वंपार्वणवत् ॥ पक्वान्नेन आमान्नेनवाकुर्यात् ॥ ततः कर्ता अभ्यंगस्ना

नंकृत्वात्रयोदशेदिनेपार्वणेनविधिवत्षोडशश्राद्धानिपक्वान्नेन आमान्नेनवाकुर्यात् ॥ त
त्कालेवाकुर्यात् ॥ तिथ्यादि संकीर्त्यसपरिवारस्यमेसकलारिष्टोपशांतयेक्षेमायुःसिध्यर्थं

चगणपतिपूजनंस्वस्तिवाचनंचकरिष्ये ॥ इतिसंकल्प्यस्वस्त्ययनंवाचयित्वा आशिषोगृही
त्वाबंधुभिः सहभुंजीत ॥ इतऊर्ध्वंश्रीखंडधारणंतांबूलभक्षणादिकुर्यात् ॥ अथोदकुंभश्रा
द्धं ॥ तत्रयाज्ञवल्क्यः ॥ अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् ॥ तस्याप्यन्नंसोदकुंभंद
द्यात्संवत्सरांद्विजे ॥ १ ॥ अशक्तौप्रतिमासउदकुंभश्राद्धंकुर्यात् ॥ ततोऽवर्षद्वितीयदिनेसंव
त्सरविमोक्षश्राद्धंपार्वणविधिनाकार्यं ॥ इत्यौर्ध्वदेहपद्धतौसोदकुंभश्राद्धंसमाप्तं ॥ आशि
षोद्विगुणादर्भाजयाशीःस्वस्तिवाचनं ॥ पितृशब्दोस्वसंबंधोशर्मशब्दस्तथैवच ॥ १ ॥ प्रद
क्षिणाविसर्गश्चसीमांतगमनंतथा ॥ अष्टादशपदार्थाश्चप्रेतश्राद्धेविवर्जयेत् ॥ २ ॥ गरु

परिशिष्टे॥ उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये॥ पूर्वदत्तांजलिं दद्यात्पिंडदानं तथैव च॥ आचा
र्यविपर्यये प्येवं॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्॥ प्रथमेहनि यो दद्यात्स दशाहं स
मापयेत्॥ शिलाविपर्यये घटस्फोटनादेनावृत्तिः॥ अत्र लौकिकग्रहणं क्रियाकर्तुर्नाशेऽ
न्येन शेषः समापनीयः॥ एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते॥ तद्बंधुनाक्रिया कार्या सैवै
वा सहकारिभिः॥ इति शुद्धितत्वे बृहस्पतिस्मृतेः॥ पत्न्याः कर्तुर्वा रजोदर्शने तद्दिने कुर्यात्॥
इति दिक्॥ अथ पर्णशरदाहविधिः॥ विदेशमरणे अस्थीनि आहृत्याभ्यज्य सर्पिषा॥ दाह
येदिति शेषः॥ अस्थ्यामभावे पर्णानि शाकलान्युक्तयावृता॥ दाहयेदस्थिसंख्यानि ततः प्रेत

निस्तकं॥ कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिशतषष्ठिभिः॥ पालाशी भिस्समिद्भिर्वा संख्या चैव प्रकीर्तिता॥
भविष्ये॥ चत्वारिंशच्छिरस्थाने ग्रीवायां च दशैव तु॥ बाह्वोश्चैव शतं दद्यात् द्विंशतिं च तथोरसि॥ उद
रे विंशतिं दद्यात् त्रिंशतं कटिदेशयोः॥ ऊर्वोश्चैव शतं दद्यात् त्रिंशतं जानुजंघयोः॥ पादांगुलिषु द
शैव एषा चैप्रेतकल्पना॥ मदनरत्ने यज्ञपार्श्वः॥ अशीत्यर्द्धं शिरे दद्यात् ग्रीवायां तु दशैव तु॥
बाह्वोश्चैव शतं दद्यात् दशैव चांगुलीषु च॥ उरसि त्रिंशतं दद्यात् द्विंशतिं जठरे मुने॥ द्वादशार्द्धं वृषण
योरष्टार्द्धं शिश्न एव तु॥ ऊर्वोश्चैकशतं दद्यात् त्रिंशतं जंघयोर्द्वयोः॥ पादांगुलिषु दिग् दद्यादेत
त्प्रेतस्य कल्पनं॥ मस्तके नारिकेलं तु अलाबु तालुके तथा॥ पंचरत्नं मुखे न्यस्य जिह्वायां कद

लीफलं॥ चक्षुषोस्तु कपर्दे द्वौ नासिकायां तु तालकं॥ कर्णयोर्बस्नपत्राणि केशे वटप्ररोहकाः॥
नालकं कमलानां तु अंत्रस्थाने विनिर्दिशेत्॥ मणिकांतवसा घातु हरितालक जंघकौ॥ शुक्रे
तु पारदं दद्यात् सुरीषे पित्तलं तथा॥ संधिषु तिलपिष्टं तु मांसे स्याद्यवपिष्टकं॥ मधु स्यात् लोहितस्था
ने त्वचस्थाने मृगत्वचं॥ स्तनयोर्जंबके देये नासायां शतपत्रकं॥ कमलं नाभिदेशे स्याद्वृंताकं वृ
षणाश्रिते॥ लिंगे च रक्तमूलं तु परिधानं दुकूलकं॥ गोमूत्रं गोमयं गंधं सर्वौषध्यादि सर्वतः इति॥
ततः पंचगव्यैः पंचामृतैः प्रोक्षयेत्॥ पुनर्नो असुमिरहद्वृष्य्यः प्राणस्त्रिष्टुप्॥ प्राणप्रतिष्ठा
पने वि०॥ पुनर्नो असुं पृथिवी ददातु पुनर्नो द्यौर्देवी पुनरंतरिक्षं॥ पुनर्नः सोमस्तन्वं ददातु पुनः

पूषा पथ्या ३ स्वस्तिः॥ यद्वा॥ यत्ते यमं वैवस्वतं मनो जगाम दूरकं॥ तत्त आवर्त्तयामसीह क्षया
य जीवसे॥ यत्ते दिवं यत्पृथिवीं मनो०॥ तत्त०॥ यत्ते भूमिं चतुर्भृष्टिं मनो०॥ तत्त०॥ यत्ते च
तस्रः प्रदिशो मनो०॥ तत्त०॥ यत्ते समुद्रमर्णवं मनो०॥ तत्त०॥ यत्ते मरीचीः प्रवतो मनो०॥ तत्त०॥
यत्ते अपो यदोषधीर्मनो०॥ तत्त०॥ यत्ते सूर्यं यदुषसं मनो०॥ तत्त०॥ यत्ते पर्वतान्बृहतो मनो०॥
त०॥ यत्ते विश्वमिदं जगन्मनो०॥ तत्त०॥ यत्ते पराः परावतो मनो०॥ तत्त०॥ यत्ते भूतं च भव्यं च
मनो०॥ तत्त०॥ शुक्रमसि ज्योतिरसीति पारदं क्षिप्त्वा अक्षिभ्यां तमिति पञ्चर्चेन शरीरं स्पृ
शेत्॥ शरीरं पठित्वा तच्छरीरं स्नापयित्वा वस्त्रोपवीते परिधाप्यालंकृत्यायं स देवदत्त इति तम

अंत्येष्टि
३१८

भिस्पृश्य इदं वास्योपासनमित्यग्निं ध्यात्वा वैतरण्यादिदानपूर्वकं ऊर्णसूत्रेण वेष्टयित्वा कृष्णाजि
नाद्याधपूर्वोक्तविधिना शववद्दहेत् ॥ आहिताग्नेः प्रकृतिदाहे ऽस्थिदाहे वा दशाहमेवाशौचं ॥
अनाहिताग्नेस्तु त्र्यहं ॥ पर्णशरदाहे पुत्रपत्न्योः अगृहीताशौचयोर्दशाहमेव ॥ गृहीताशौ
चयोस्त्र्यहं ॥ पत्नीपुनःसंस्कारे पत्युश्चैवमेवाशौचं ॥ आहिताग्नेर्विदेशमृतेर्यावद्विधिना सं
स्कारः तावत्तत्पुत्रादीनां नाशौचं न च संध्यादिकर्मलोपः ॥ इति पलाशप्रकृतिदाहः ॥ ततः पाषं
डसंकरजातीनां मरणे चांद्रायणं तप्तकृच्छ्रद्वयं कृत्वा विधिवद्दहेत् ॥ यद्वा लौकिकाग्नेरमंत्र
कं दग्धास्थीनि निस्थापयेत् ॥ प्रायश्चित्तं कृत्वा नारायणबलिं च कृत्वा लोकगर्हापरिहारार्थं

श्री
३१८

श्राद्धादौ योग्यतासिध्यर्थं च कार्यं ॥ नारायणबलिं वत्सरांते ततः संस्कारः ॥ अत एव त्रिरात्र
माशौचं ॥ चतुर्थदिने एकादशाहकृत्यं ॥ पंचमे सपिंडनं ॥ तत्राद्येते हि पिंडत्रयं मध्ये चत्वारः ॥
द्वितीयदिने अस्थिसंचयनं ॥ अथ ब्रह्मचारीमरणे अर्कविवाहः ॥ द्वादशाब्दं षडब्दं वाचरे
त् ॥ अथाग्निमुपसमाधाय एवं गुणेत्यादि अमुकगोत्रस्यामुकनाम्नो मृतस्य ब्रह्मचारिणः
व्रतविसर्गं करिष्ये ॥ तदंगहिरण्येन नांदीश्राद्धं करिष्ये ॥ तत्कृत्वान्वाधा[illegible]नाद्याघारां
तं कृत्वाऽऽज्यं जुहुयात् व्याहृतिमतस्त्रः ४ अग्नये व्रतपतये अग्ने व्रतानुष्ठानसंपादनाय विश्वे
भ्यो देवेभ्यः ततः स्विष्टकृदादि समाप्य ॥ अथार्कशाखामानीयार्कविवाहः ॥ अर्कविप्र्रौ

चारिणो हरिद्रयानुलिप्य पीतसूत्रेणावेष्ट्य वस्त्रयुग्मेनाच्छाद्याग्निमुपसमाधाय॥ एवंगुणे
त्यादि अमुकगोत्रस्येत्यादि और्ध्वदेहाधिकारार्थं अर्कविवाहं करिष्ये॥ तदंगं हिरण्येन नां
दीश्राद्धं करिष्ये॥ इत्याघाघारांतं कृत्वाज्यहोमः॥ अग्नयेस्वाहा॥ बृहस्पतयेस्वा०॥ विधि
हविधियोजकायस्वा०॥ ॐ यस्मैत्वं कामकामाय मह्यं संम्राज्यजामहे॥ तमस्मभ्यं कामंद
त्वाथेदं त्वं घृतं पिबस्वा०॥ कामायेदं०॥ ततस्त्रो व्याहृतयः ७॥ ततः स्विष्टकृतादि अर्कशाखां
ब्रह्मचारिशवं चतुर्षाग्निना विधिवद्दहेत्॥ इति ब्रह्मचारीमरणविधिः॥ एवं स्नातकमरणेपि
॥ अथ कुष्ठीमरणं॥ मृतस्य दिनत्रयं गोष्ठभूमि पुनिखनेत्॥ पश्चादुद्धृत्य षडब्दव्रतपूर्वेण

विधिना त्यंतं कृत्वं चरेत्॥ ततोस्थि गंगायां प्रक्षिपेत्॥ ततः मासि २ पार्वणश्राद्धं कुर्यात्॥ इति
कुष्ठीमरणविधिः॥ अथ पंचकमरणविधिः॥ शवस्य समीपे दर्भमयाश्चत्वारः पुत्तल्याः ऋ
क्षमंत्राभिमंत्रिताः कार्याः॥ एवंगुणेत्यादि अमुकगोत्रस्येत्यादि अमुकस्य धनिष्ठापं
चकादिमरणसूचितवंशारिष्टविनाशार्थं पंचकमरणविधिं करिष्ये॥ ततः गंधमाल्यादिप्र
तिमालंकृत्य सहस्रमयेप्रेतोपरि न्यसेत्॥ प्रथमं शिरसि॥ द्वितीयं नेत्रयोः॥ तृतीयं वामकु
क्षौ॥ चतुर्थं २ नाभौ॥ पंचमी पादयोः॥ तदुपरि ताभ्यो नाममंत्रैः घृताहुती हुत्वोदकधारां च
दत्वा यमाय सोमं त्र्यंबकमिति मंत्राभ्यां प्रतिमासु प्रत्येकमाज्याहुती जुहुयात्॥ ततो वि

भिनाप्रेतं दहेत् ॥ सूतकांतेततः पुत्रः कुर्याच्छांतिकपौष्टिकं ॥ कांस्यपात्रे स्थितं तैलं वीक्ष्यं द
द्याद्द्विजन्मने ॥ ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतयेततः ॥ माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति ॥
स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनं ॥ गोभूदानं षडेतानि कुर्याद्दोषोपशान्तये ॥ अन्य
च्चापि ॥ धनिष्ठापंचरत्नानि तन्मुखे न्यस्याहुतिं चरुं प्रदद्यात् ॥ कर्त्ताशवं ततो निर्हरणं कुर्यात् ॥
दोषसाग्नेर्विधिः स्मृतः ॥ इतरं निखनेद्देव जले वा प्रतिपादयेत् ॥ द्विपदर्क्षे मुखेतत्र्हिरण्यश
कलं मुखे ॥ इति पंचकमृतविधिः ॥ सर्पहते नागव्रतं कार्यं ॥ श्रावणशुक्लपंचमीमारभ्य पंचम्या

मुपवासः ॥ यद्वा चतुर्थ्यामेकभक्तं पंचम्यां दार्मयं हेममयं मृन्मयं वा नागफणां कृत्वा गंधादि
भिः अनंतं वासुकिं शंखं पद्मं कंबलं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालीयं तक्षकं क
पिलं च प्रतिमासं नामभिः शुक्लपंचमीषु संपूज्य ब्राह्मणान्घृतपायसमोदकैर्जुहुयात् ॥ ए
वंमब्दविधिः ॥ नाना नागमभ्यर्च्य पूर्णेब्दे यथाशक्ति सौवर्णं नागं गां च दद्यात् ॥ ततो नाराय
णबलिं कृत्वा श्राद्धादि सर्वं कुर्यात् ॥ अथ पूर्वोक्तपापव्याधीनां बुद्धिपूर्वकं आत्मघातिनां नारा
यणबलिं कुर्यात् ॥ शुक्लैकादश्यां पुण्यतीर्थे गत्वा चम्य देशकालौ स्मृत्वा अमुकगोत्र
स्य अमुकशर्मणः आत्मघातादिपारवंडाद्दिजनितपापोपशमनद्वारा और्ध्वदेहिके
समदानत्वयोग्यतासिध्यर्थं नारायणबलिं करिष्ये ॥ कलशपंचकं व्री ॥ हीणां यवानां चोप

रिस्थापयित्वोदकेनापूर्यापोहिष्ठेतिमंत्रत्रयेणाभिमंत्र्यसर्वौषधीतिलगंधादिकलशेषुप्र
क्षिप्यवस्त्रेणवेष्टयित्वापुष्पाणिपंचरत्नानिचप्रक्षिप्य॥तदुपरिताम्रादिपात्रेब्रह्मविष्णुशि
वयमप्रेतानांपंचमूर्तीःस्थापयेत्॥आवाहनादयउपचाराःकार्याः॥तत्रविष्णोःपुरुष
सूक्तेनपूजांब्राह्मणोहिरण्यगर्भइतिरुद्रस्यकद्रुद्रायेतियमस्ययमायसोममिति॥
प्रेतस्यनाममंत्रैःषोडशोपचारैःपंचदेवताःपूजयित्वास्वगृह्योक्तमार्गेणास्थंडिलेग्निं
प्रतिष्ठाप्यचरुहोमंकुर्यात्॥तत्रान्वाधानेआज्यभागांतमुक्त्वाअन्वाधानसमिद्धोना
रायणषोडशकृत्वाचरुणायक्ष्येइत्युक्त्वाभिंस्विष्टकृतमित्यादिप्रागुक्तंमुक्त्वाअन्वा

धानसमिद्धोहुत्वास्वगृह्योक्तमार्गेचरुनिर्वापादिविधिनाचरुंश्रपयित्वाज्यभागांतंकृत्वापुरुष
सूक्तेनप्रत्यृचंषोडशाहुतीर्जुहुयात्॥नारायणायेदंनममेतित्यागः॥अन्यत्सर्वंप्राकृतंसमा
प्यततोदेवसमीपेअमुकगोत्रायामुकशर्मणेप्रेतायविष्णुरूपिणेमंपिंडइतिमधुघृताप्लु
तान्तिलमिश्रितान्दशपिंडान्विष्णुरूपिणंप्रेतमनुस्मरन्प्रेतस्यनामगोत्रेउच्चार्यदक्षि
णाग्रेषुदर्भेषुदक्षिणाभिमुखोपसव्येनदत्वायत्तेयममितिसूक्तेनपिंडाननुमंत्र्यकुशैःशंखो
दकेनपुरुषसूक्तेनपिंडानभिषिंच्यगंधाद्यैरभ्यर्च्यपिंडप्रवाहणंकृत्वानद्यांनिक्षिपेत्॥नप
त्स्येदद्यात्॥ततःपुरुषसूक्तेनप्रेतनामगोत्रेउक्त्वामुकंनारायणरूपंतर्पयामीतिषोडशवारं

अंत्येष्टि
३२१

तर्पयेत्प्रत्यचं॥ ततः पुरुषाहारपरिमितमन्नं विष्णवे ब्रह्मणे शिवाय सकिंकराय चबलिं गृहीत्वा॥
ब्रह्मविष्णुमहादेवयमश्चैवसकिंकराः॥ बलिं गृहीत्वा कुर्वंतु प्रेतस्य च शुभां गतिं॥ इति संप्रार्थ्य
विष्ण्वादिभ्य इमं बलिं समर्पयामि॥ इति बलिं दद्यात्॥ स्मृत्यर्थसारे होमतर्पणबलयो नोक्ताः॥
ततः प्रतिदैवतं त्रिविधं समर्प्य शर्करामधुगुडसर्पिःपायसानि निवेदयेत्॥ गीतादीनां जागरणं कुर्या
त्॥ तस्यामेव रात्रौ अयुग्मान्पंच सप्त नव ब्राह्मणान्वा आमंत्र्य उपोषितः श्वोभूते मध्याह्ने शिवा
दीनभ्यर्च्य देशकालादि स्मृत्वा नारायणबलौ विहितं श्राद्धपंचकं एकोद्दिष्टविधिना करिष्ये॥
एकोद्दिष्टविधिब्राह्मणपादप्रक्षालनादि कृत्वा यथाज्येष्ठं उदङ्मुखानुपवेश्य आवाहनादि तृ

श्री
३२१

प्ति प्रश्नांतं कृत्वा पिंडपितृयज्ञवदुल्लेखनाग्निधारणप्रोक्षणानि कृत्वा विष्णवे ब्रह्मणे शिवाय यमा
य सपरिवाराय चतुरः पिंडान्दत्वा नामगोत्रविशिष्टं विष्णुरूपं प्रेतं स्मृत्वा पंचमं पिंडं दद्यात्॥ ततो
विप्रान्वासोन्नदक्षिणाभिस्तोषयित्वा तन्मध्ये चैकं गुणवंतं ब्राह्मणं प्रेतस्थाने भोजितं प्रेतबु
द्ध्या संस्मरन्वस्त्रभूम्यादि दत्वा संतोष्याक्षय्यस्थाने तिलदर्भतुलसीयुतशंखोदकधारां दद्यात्॥
ततस्ते पवित्रपाणिभिर्ब्राह्मणैः कृत्वामुकगोत्रायामुकशर्मणे प्रेताय विष्णुरूपायेदं तिलोद
कमुपतिष्ठतां इति वाचयित्वा सकुशतिलयुक्तांजलिं दापयेत्॥ ततस्नात्वा गुडशर्करापाय
सादि स्वजनैः सहितो भुंजीतेति॥ इति नारायणभट्टकृतो नारायणबलिविधानं॥ अथ सह

गमनविधिः ॥ अत्र प्रयोगः ॥ आत्मनो भर्तुश्चैतज्जन्मजन्मांतरपरंपरार्जितसर्वपापक्षयद्वा
राश्रीलक्ष्मीनारायणप्रीतये पुराणोक्तानेकफलप्राप्तये चान्वारोहणं करिष्ये ॥ तदंगतया
विहितं हरिद्राकुंकुमांजनादिसौभाग्यद्रव्ययुतं वंशपात्रदानं च करिष्ये ॥ तत्र मंत्रः ॥ लक्ष्मी
नारायणो देवो वत्सलः सत्यगुणाश्रयः ॥ गाढं सत्वं चमे देया छायनेः परितोषितः ॥ सोपस्क
राणि शूर्पाणि वायनैः सहितानि च ॥ लक्ष्मीनारायणप्रीत्यै सत्यकामाददाम्यहं ॥ अने
न सोपस्करशूर्पदानेन भगवान्लक्ष्मीनारायणप्रीयतां न मम ॥ अग्नेः समीपमाग
त्य पंचरत्नानि पल्लवे ॥ नीलांजनं तथा वध्वा मुखे वै मुक्ताफलेन्यसेत् ॥ ततोग्निप्रार्थनं

कृत्वा मंत्रेणानेन मंत्रितं ॥ स्वाहासंश्लेषनिर्विच्छशर्मगोत्र हुताशनं ॥ सत्यमार्गप्रदानेन नय मां
पत्युरंतिकं ॥ इत्यग्निं प्रार्थ्याज्येनाग्नौ जुहुयात् ॥ अग्नये तेजोधिपतये स्वाहा ॥ १ ॥ विष्णवे स
त्वाधिपतये स्वाहा ॥ २ ॥ कालाय धर्माधिपतये स्वाहा ॥ ३ ॥ पृथिव्यै लोकधात्रिभ्य स्वाहा ॥ ४ ॥
अम्भोरसाधिष्ठात्रीभ्य स्वाहा ॥ ५ ॥ वायवे बलाधिपतये स्वाहा ॥ ६ ॥ आकाशाय सर्वाधिप
तये स्वाहा ॥ ७ ॥ कालाय धर्माधिष्ठात्रेभ्य स्वाहा ॥ ८ ॥ अद्भ्यः सर्वसाक्षिणीभ्यः स्वाहा ॥ ९ ॥
ब्रह्मणे वेदाधिपतये स्वाहा ॥ १० ॥ रुद्राय श्मशानाधिपतये स्वाहा ॥ ११ ॥ एकादशाहुतीर्हु
त्वा कुर्यादग्नेः प्रदक्षिणां ॥ ततः शिलां सोपस्करां तां संपूज्य तामारुह्य फलपुष्पांजलिं ग

हीत्वाग्निंप्रार्थयेत्॥त्वमग्नेसर्वभूतानांमंतश्चरसिसाक्षिवत्॥त्वमेवदेवजानीषेनविदुर्यानि
मानुषाः॥अनुगच्छामिभर्त्तारंवैधर्व्यभयपीडिता॥सत्यमार्गप्रदानेननयमांभर्त्तुरंतिकं॥मंत्र
मुच्चार्यशनकैःप्रविशेत्त्वहुताशनं॥तांप्रेतस्योत्तरत्तःसुतांदेवरःशिष्योवानमस्कृत्यकरेधृ
त्वाउदीर्ष्वेतिमंत्रेणद्वाभ्यांमंत्राभ्यांसत्वरहितामुत्थापयेत्सत्वाधिकातुस्त्रहृदःसमाश्वास्यभ
र्त्तारंविष्णुरूपिणंस्मरंतीप्रविशेत्॥मृतेभर्त्तरियानारीधर्मशीलाधृतव्रता॥अनुगच्छति
भर्त्तारंश्रृणुतस्यास्तुयत्फलं॥तिस्रःकोट्यर्धकोटीचयावत्यंगरुहाणिवै॥तावत्यब्दःसह
स्त्राणिविष्णुलोकेमहीयते॥मातृकंपितृकंचैवयत्रकन्याप्रदीयते॥कुलत्रयंपुनात्येषाभ

र्त्तारंयानुगच्छति॥इत्यादिवाक्यपर्यालोचनयातत्तत्फलमुल्लेख्यं॥अन्वारोहणेअवयवपिं
डास्तुपृथगितिदुदुपद्धतौ॥अन्यत्रतु॥अन्वारोहंतुनारीणांपत्युश्चैवोदकक्रिया॥पिंड
दानंक्रियास्त्वद्धश्राद्धंप्रत्याब्दिकंतथा॥१॥अन्वारोहेकृतेपत्न्याःपृथक्पिंडाश्चतिलांज
लिः॥पृथक्कुशीलेनकुर्वंशिनदद्यादेकशिलेनतथा॥नवश्राद्धानिसर्वाणिसपिंडीकरणंत
था॥नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक्॥एकएववृषोत्सर्गोगौरेकातत्रदीयते॥
अन्वारोहणेएकचित्यारोहणेवास्त्रियाः२पृथक्२सपिंडनंनास्ति॥भर्त्तुःकृतेस्त्रियाः
कृतंभवतीतिस्मृत्यर्थसारे॥भर्त्रैकैकेनतिबहवः॥भर्त्रादित्रयेणेत्यन्ये॥अन्वारोहणं

चबालापत्यानां रजस्वलानां सूतिकानां च निषिद्धं ॥ गर्भिणीनां तत्तद्गर्भेजातनिवधसमं ॥ ब्रा
ह्मण्या एकचित्यारोहणमेव न पृथक्चित्यारोहणं ॥ क्षत्रियादिस्त्रियाः पृथक् सहवाचि
त्तिः ॥ असवर्णायाः पृथक्चितिरेव ॥ पदपारिजाते ॥ अन्वारोहणेन वश्राद्धं मपृथक् ॥ त
त्पित्रापिपित्न्मातामहपार्वणद्वय ... वत्सैदेवानुष्ठानं आपस्तंबः ॥ चितिभ्रष्टा तु यानारी
मोहाद्विचलिता यदि ॥ प्राजापत्येन शुध्येत्तु तस्माद्वै पापकर्मणः ॥ भर्त्रनुगमने चिति
भ्रष्टेत्यर्थः ॥ पत्न्यां रजस्वलायां गर्भिण्यां मृतः सा च देशकालवशाद्देवात्तुगंतुमिच्छ
ति न पंचमादिनं प्रतीक्षते ॥ तत्र विधिरुच्यते ॥ यदा स्त्रियामुदक्यायां पतिः प्राणान् स

मुत्सृजेत् ॥ द्रोणमेकं तंडुलानामवहन्याद्विशुद्धये ॥ मुलाघातैः स्तदसृक्स्रवतेनिजमंडला
त् ॥ विरजस्कामन्यमाना स्वेच्छित्तेत्तदसृक्भक्षयं ॥ दृष्ट्वा शेषं चं प्रकुर्वीत पंचम्यां त्रिकया पृथक् ॥
त्रिंशद्विंशति दशपंचगवां दत्वा लदैहः क्रमात् ॥ विप्राणां वचनाच्छुद्धा समारोहेद्धुताशनं ॥ नारी
णां सरजस्कानां भियं शुद्धिरुदाहृता ॥ इत्यन्वारोहणविधिः ॥ अथ रजस्वलामरणविधिः ॥
अंतरिक्षम्नायेचवक्रावस्मुप्रमादतः ॥ उदक्यां सूतिकानारी चरेच्चांद्रायणत्रयं ॥ संगृ
ह्य पंचभिः स्नापयित्वानुगव्यैः प्रेतां रजस्वलां ॥ वस्त्रांतरेण तां कृत्वा दाहयेद्विधिपूर्वकं ॥ व
द्धशातातपस्क ॥ रजस्वलायाः प्रेतायाः संस्कारादीन्न नाचरेत् ॥ ऊर्ध्वं त्रिरात्रात् स्नानायाः

शवधर्मेण दाहयेत्॥ इति त्र्यहोत्तरं संस्कारमाह॥ अत्र देशकालानुसारात् व्यवस्था॥ अद्येत्या
दि अद्यगोत्राया॥ अमुकस्या रजस्वलावस्थामरणनिमित्तप्रत्यवायपरिहारार्थं और्ध्वदैहिक
योग्यतार्थं च चांद्रायणत्रयप्रायश्चित्तपूर्वकं शूर्पेणाष्टोत्तरशतस्नानानि करिष्ये॥ ब्राह्म
णवचनेन चांद्रायणत्रयं कृत्वा यवपिष्टेन प्रेतमनुलिप्य स्वयं स्नात्वा शूर्पोदकेन शतवारं स्ना
पयेत्॥ पावमानीभिर्यदंतियच्च दूरके आपो हिष्ठेति तिसृभिः कयानइति तिसृभिः सं
स्नाप्य पूर्ववस्त्रं परित्यज्य विधिना दहेत्॥ यद्वा॥ रजस्वलां सूतिकां च मलं प्रक्षाल्य स्नाप
यित्वा काष्ठवद्ध्वा स्थीनि विधिना दहेत्॥ अथ सूतिकामरणं॥ सूतिकामरणे प्राप्ते सर्वौ

षध्यनुलेपनं॥ असूतकी तु संस्पृष्टः शूर्पाणां तु शतं क्षिपेत्॥ पूर्ववत्संकल्प्य ब्राह्मणवच
नात् चांद्रायणं कृत्वा पूर्ववच्छतशूर्पस्नानानि कारयित्वा कुंभे जलमादाय पंचगव्यं तत्र क्षिप्त्वा
आपो हिष्ठीयवामदेव्यवारुणादिपुण्यऋग्भिरभिमंत्र्य पूर्वोक्तमंत्रैः संस्नाप्य विधिवद्दहेत्॥
अथ सूतिकामरणे दिनभेदेन विशेषप्रायश्चित्तं॥ सूतिका तु यदा नारी रजसा तु परिप्लुता॥
म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाचरेत्॥ एतद्धुती यत्र्यहविषयं॥ सूतिका तु यदा साध्वी
विस्नाता मरणं गता॥ त्रिषण्णवदिनादर्वाक् देकाब्देन विशुध्यति॥ दशाहादुत्तरे तु॥ प्रसू
तिका यदा नारी प्राणांश्चैव परित्यजेत्॥ मासमेकावधिं यावत्त्रिभिः कृच्छ्रैर्विशुध्यति॥ अ

थगर्भिणीमरणेविधिः॥ यदागर्भवतीनारीसशल्यासंस्थिताभवेत्॥ कुक्षिंभित्वाततःशल्यंनि
र्हरेद्यदिजीवति॥ मृतांनिक्षिपेन्नत्तुप्रायश्चित्तंततःपरं॥ सायद्यस्त्रिंशताकृच्छ्रैःशुध्यतेश
ल्यदोषतः॥ सगर्भदहनेतस्यावर्णनंवधपातकं॥ प्रायश्चित्तंचत्वारितुशुध्यंतिपापकारि
णः॥ दग्धातुगर्भसंयुक्तांत्रिरब्दंकृच्छ्रमाचरेत्॥ इत्यादिग्रंथांतरतोवगंतव्यं॥ ॥इतिरामे
श्वरसूरिसूनुनारायणभट्टकृतायांऔर्ध्वदेहिकपद्धतौमरणविधिर्नानिसमाप्तानि॥
॥ ॥अथनागबलिः॥ अथवक्ष्यामिसर्पस्यसंस्कारविधिमुत्तमं॥ सिनीवाल्यांपौर्णमा
स्यांपंचम्यांकारयेत्ततः॥१॥ कृतसर्पवधोविप्रःपूर्वजन्मनिवायदि॥ स्नात्वागत्यततो

ब्रह्मदंडंदद्याद्द्विजातये॥२॥ वधंप्रख्यापयेत्पापीचरेत्कृच्छ्रांश्चतुर्दश॥ वधेहजन्मनिकृतेलोह
दंडंद्विजातये॥३॥ दद्यात्पापविशुध्यर्थंश्रोत्रियायकुटुंबिने॥ विप्रायदंडमूल्यंतुवासुभास
तिदापयेत्॥४॥ साक्षाद्बुधाल्कर्मकर्तुरेतदेवप्रदापयेत्॥ निष्कत्रयंद्विनिष्कंवानिष्कमेकंक
नीयसं॥५॥ अनुमत्यादिकर्तॄणांनिष्कमर्द्धंतदर्धकं॥ वित्तशाठ्यंनकुर्वीततदद्याद्वित्तानुसा
रतः॥६॥ अनुज्ञांचगुरोर्लब्ध्वासंस्कुर्यात्तदनंतरं॥ प्रियंगुव्रीहिगोधूमतिलपिष्टेनवा
थवा॥७॥ कृत्वासर्पाकृतिंतेनसर्पभोगसमन्वितं॥ अनेनवक्ष्यमाणेनमंत्रेणप्रार्थयेद्दृढं
॥८॥ एहिपूर्वंमृतसर्प अस्मिन्पिष्टेसमाविश॥ संस्कारार्थमहंभक्त्याप्रार्थयामिसमाहि

तः॥९॥वस्त्रोपवीतंगंधाद्यैरक्षतैःकुसुमादिभिः॥कर्त्ता पुष्पांजलिंदत्वाप्रणिपत्य हरेद्बहिः
॥१०॥प्रक्षालितांघ्रिपाणिस्तुकृत्वाचम्योपविशेद्भुवि॥कुर्यात्संस्कारसंकल्पंप्राणायामपुरः
सरं॥११॥यज्ञोपवीतिनाकार्यंसर्पसंस्काकर्मतु॥लौकिकाग्निंप्रतिष्ठाप्यसमिदाधान
माचरेत्॥१२॥ततोग्नेरष्टदिग्भागेभूमिंसंप्रोक्ष्य वारिभिः॥चितिंकृत्वाथसंस्तीर्यकुशै
राग्नेयकाग्रकैः॥१३॥पर्युक्ष्याग्निंपरिस्तीर्यपरिशिष्टव्यसमर्चयेत्॥कृत्वेध्माधायमंतेस
त्वाज्यासादनादिकं॥१४॥आघारौचक्षुषीहुत्वासर्पिषाथयथाविधि॥सर्पंगृहीत्वायत्ने
नचितिमारोपयेत्सुधीः॥१५॥अपसव्यंश्वास्पर्शेघोत्रंगत्वाचाग्निसमीततः॥स्रुवेणजुहुया

दाज्यमग्नोव्याहृतिभिस्त्रिभिः॥१६॥सर्पास्येजुहुयादाज्यंव्याहृत्याचसमस्तथा॥आ
ज्यशेषंस्त्रुवेणैवसर्पदेहेनिषेचयेत्॥१७॥स्रुवंतत्रनिधायाथयज्ञपात्राणिबर्हिषं॥त्रि
भिःप्रदक्षिणंकृत्वाप्रणिपत्यक्षमापयेत्॥१८॥चमसस्थैर्जलैःसर्पंव्याहृत्याभ्युक्ष्यपाणि
ना॥अग्नेरक्षाणइत्यनयासर्पोयोग्निंप्रदापयेत्॥१९॥उपतिष्ठेदत्यमानंनमोस्तुसर्प
तिमंत्रतः॥ज्ञानतोऽवापिकृतःसर्पवधोमया॥२०॥पूर्वजन्मनिवासर्पतत्सर्वंक्षमय
स्वमे॥इतिसंप्रार्थ्यनागेंद्रंस्नातागत्यततःपुनः॥२१॥क्षीराज्येनतत्रश्चाग्निंप्रोक्ष्यव्याहृ
तिभिस्त्रिभिः॥हुतसर्पंजलेनाग्निमभिषिंचेत्ततःपरं॥२२॥नास्तिसंचयनंकार्याहुत्वा

त्वाचम्य गृहं व्रजेत् ॥ ब्रह्मचर्यादिकं कार्यं त्रिरात्रं शुद्धिरिष्यते ॥ २३ ॥ चतुर्थेह्नि संप्राप्ते सचैलं स्नानमाचरेत् ॥ घृतपायसभक्ष्यैश्च द्विजानष्टौ तु भोजयेत् ॥ २४ ॥ कर्त्ता नामपदैर्विप्रान् र्चयेद्वक्ष्यमाणकैः ॥ सर्पोनंतस्तथा शेषः कपिलो नाग एव च ॥ २५ ॥ कालिकः शंखपालश्च भूधरश्च प्रकीर्तिताः ॥ पादप्रक्षालनं कुर्यादेभिर्नामपदैः स्मृताः ॥ गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान् ॥ २६ ॥ एवं कृते विधाने वै सर्पसंस्कारकर्मणि ॥ सर्पहिंसाकृतात्पापान्मुच्यते नात्र संशयः ॥ २७ ॥ कुष्ठव्याध्यादिभिर्मुक्तः सर्वथा भेषजं त्विदं ॥ आयुरारोग्यमैश्वर्यं प्राप्य कामानवाप्नुयात् ॥ २८ ॥ इति शौनकीये सर्पसंस्कारविधिस्त्रयस्त्रिं

शत्तिमस्खंडः ॥ ॥ इदं पुस्तकं धर्माधिकारी विश्वनाथपंडितेन लिखितं ॥ स्वार्थं परार्थं च ॥
संवत् १८ ३५ आषाढशुद्ध १२ इंदुवासरे तद्दिने समाप्तं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

[OrderDescription]
,CREATED=20.08.19 13:59
,TRANSFERRED=2019/08/20 at 14:54:06
,PAGES=264
,TYPE=STD
,NAME=S0001512
,Book Name=M-713-ANANT BHATI PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF

FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF

FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF

FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF

FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF

FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF

FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,